सरस्वतीभवन-अध्ययनमाला

(१२)

व्याकरणदर्शनपीठिका

पण्डितश्रीरामाज्ञापाण्डेयेन विरचिता

वाराणसेय-संस्कृत-विश्वविद्यालयः

SARASVATĪ BHAVANA STUDIES

Vol. XII

GENERAL EDITOR

Surati Narayana Mani Tripathi
Vice-Chancellor
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

VYĀKARAṆA DARŚANA-PĪṬHIKĀ

by

Sri Rāmājñā Pāndeya

VARANASI
1965

Published by :—

Director, Research Institute
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Printed by :—

Balkrishna Shastri,
Jyotish Prakash Press,
Kalbhairava Marg, Varanasi.

सरस्वतीभवन-अध्ययनमाला

(१२)

श्रीरामाज्ञापाण्डेयविरचिता

व्याकरणदर्शनपीठिका

वाराणस्याम्

१८८६ तमे शकाब्दे

प्राप्तिस्थानम्—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी-२

मूल्यम्—४ रूप्यकाणि

प्रास्ताविकम्

वाराणसेयसंस्कृतविश्वविद्यालयस्य पूर्वरूपेण राजकीयसंस्कृतमहाविद्यालयेन २०१० वैक्रमे वत्सरे पण्डितश्रीरामाज्ञापाण्डेयविरचितस्य व्याकरणदर्शनस्य प्रथमो भागो व्याकरणदर्शनभूमिकाख्यः प्रकाशितः। तस्य ग्रन्थस्य द्वितीयं भागं व्याकरणदर्शनपीठिकाख्यं विद्वत्समाजस्य समक्षमधुना समुपस्थापयामः। ग्रन्थस्यास्य तृतीयो भागश्चाशास्महे सत्वरमेव प्रकाशितो व्याकरणदर्शनप्रतिमाख्यया प्रसिद्धिमेष्यति।

माधवाचार्यप्रणीते सर्वदर्शनसंग्रहे संदृश्यते पाणिनिदर्शनं नाम। पाणिनि–कात्यायन-पतञ्जलिभिर्व्याकरणागमप्रवर्तकैर्मुनिभिः कृतबीजाधानः, संग्रहकारेण व्याडिना संपादितप्ररोहः, वाक्यपदीयकारेण भर्तृहरिणा तट्टीकाकारैर्हेलाराजपुण्यराजादिभिर्महाभाष्यप्रदीपकृत्कैयटेन च लम्भितपत्रपुष्पप्रचयः, नागेशभट्टकौण्डभट्टप्रभृतिभिः प्रापितफलो व्याकरणवटविटपोऽयं शीतलच्छायो विविधशास्त्रपरामर्शतापतप्तानां तपस्विनां विदुषां शरणस्थलमिति नैव विवादास्पदं वस्तु। भागत्रयात्मकमिदं व्याकरणदर्शनमपि तस्यैव तरोर्मिष्टं फलमित्यास्वाद्यतां तत्रभवद्भिः शास्त्रप्रणयिभिर्मनीषिभिस्तस्य द्वितीयोंऽशः। अत्र निरुक्तप्रातिशाख्यशिक्षादिभिः शैवशाक्तवैष्णवाद्यागमिकदर्शनैश्चायं विषयः समुपबृंहितः कामप्यपूर्वां स्वादुतां भजते।

तथाहि—अस्मिन् व्याकरणदर्शनस्य पीठिकाख्ये द्वितीये भागे शिक्षाग्रन्थेषु प्रातिशाख्येषु च प्रतिपादिता विषया दशसु दलेषु प्राधान्येन समालोचिताः। तत्र प्रथमे दले शिक्षारूपस्य वेदाङ्गस्याध्ययनोपेक्षयैव वर्णोच्चारणशैली विकृतिं जगामेति प्रतिपाद्य शिक्षकस्य प्राधान्यम्, द्रुतादिवृत्तिविचारः, ध्वनिस्फोटयोर्विचार इत्यादयो विषयाः प्रतिपादिताः। द्वितीये दले शब्दस्य ज्ञानरूपत्वं साधितम्। तृतीये नित्यत्वकार्यत्वाभ्यां शब्दस्य द्वैविध्यम्, अणूनां वायोर्वा शब्दत्वापत्तिः,

विवर्तवादपरिणामवादयोश्च विचारः कृतः। चतुर्थे दले वैष्णवागममतेन उद्यती क्रियाशक्तिर्नादः, नादाद् बिन्दुः, तस्य विभागाः, स्वरव्यञ्जनयोरुत्पत्तिश्च प्रदर्शिता। एष एव विषयः पञ्चमे दले शैवशाक्तागमावनुसृत्य प्रदर्शितः। षष्ठे दले वर्णानां भौतिकत्वम्, शैवशाक्तागमानुसारं वर्णविषयकमन्यद् विचारजातं च प्रपञ्चितम्। सप्तमेऽष्टमे च दले ऋक्प्रातिशाख्यमनुसृत्य वर्णानां गुणा दोषाश्च निरूपिताः। नवमे दले यजुःप्रातिशाख्यमवलम्ब्य वर्णविचारः समुपस्थापितः। दशमे दले प्रथमं तैत्तिरीयप्रातिशाख्यं तस्य वैदिकाभरणाख्यं त्रिभाष्यरत्नाख्यं च भाष्यमधिकृत्य वर्णानां स्वरूपमुच्चारणपद्धतिश्च प्रदर्शिता। तत ऋक्तन्त्रव्याकरणाभिधं सामप्रातिशाख्यम् अथर्वप्रातिशाख्यं चावलम्ब्य वर्णविचारमुपस्थाप्य विविधप्रातिशाख्यानुसारीणि वर्णोच्चारणस्थानानि निदर्शितानि। अन्ते च याज्ञवल्क्यापिशल्यादिशिक्षाग्रन्थान् सूत्राणि चावलम्ब्यायमेव विचार उपसंहृतः।

ग्रन्थस्यास्य समाप्तौ परिशिष्टद्वयं संयोजितम्। प्रथमे परिशिष्टे भाषाविज्ञानदृष्ट्या मानवीयस्य स्वरोच्चारणमन्त्रस्य वर्णोच्चारणप्रक्रियायाश्च सचित्रं विवरणमुपस्थापितम्। द्वितीये परिशिष्टे च निगमागमविवेकः कृतः।

व्याकरणदर्शनभूमिकाख्ये प्रथमे भागे संक्षेपेण प्रतिपादिता वर्णोच्चारणप्रक्रियाऽत्र विस्तरेण प्रदर्शितेति ग्रन्थस्यास्य संक्षिप्तामुपरि प्रदर्शितां विषयतालिकां दृष्ट्वा वक्तुं शक्यते। संस्कृतपाठशालासु व्याकरणस्याध्ययनमेकाङ्गि संजातम्। निरुक्तप्रातिशाख्यशिक्षादिप्राचीनैर्ग्रन्थैराधुनिकेन भाषाविज्ञानेन च सहैव व्याकरणाध्ययनं सर्वाङ्गपूर्णं भवतीति तथ्यं नूतनग्रन्थरचनासमुद्यमेनोपस्थापितवते पण्डितश्रीरामाज्ञापाण्डेयमहोदयाय साधुवादान् वितरन्तो वयं विद्वत्समाजस्य पुरो ग्रन्थमिममुपहरामः।

वाराणसी।
माघपूर्णिमा, २०२१ वि०

सुरतिनारायणमणित्रिपाठी
वाराणसेयसंस्कृतविश्वविद्यालयस्य
उपकुलपतिः।

विषयानुक्रमणिका

शिक्षारूपाङ्गाध्ययनोपेक्षया वर्णोच्चारणशैथिल्यास्त्यागः	...	...	१
शिक्षकस्य प्राधान्यम्	...	...	२
शब्दस्वरूपम्, तत्र वृत्तिविचारः	...	...	३
उद्द्योतखण्डनम्, प्रदीपमण्डनं च	...	...	४
ऋक्तन्त्रव्याकरणमवलम्ब्य प्रदीपसमर्थनम्	...	...	५
मात्रानिर्णयः, वर्णद्वयोच्चारणमध्ये कियान् कालः	...	...	७
एकस्यापि वर्णस्य स्थानभेदेन कालभेदः	...	...	७
वृत्तिभेदेन कालभेदेऽपि न वर्णभेदः	...	...	८
विलम्बितायां शाकटायनस्य मतभेदः	...	...	९
ध्वनिस्फोटयोर्विचारः	...	...	९
शब्दस्य ज्ञानरूपत्वम्	...	...	११
शब्दो द्विविधः, नित्यत्वकार्यत्वाभ्याम्	...	...	२२
अपरत्राणुर्वायुर्वा	...	...	२३
नित्यत्वे विवर्तः परिणामो वा	...	...	२४
उद्यती क्रियाशक्तिर्नादः	...	...	२८
नादाद् बिन्दुः	...	...	२९
बिन्दोर्द्वैविध्यम्	...	...	३०
पुनरपि द्विधा	...	...	३०
स्वरनिरूपणम्	...	...	३१
व्यञ्जननिरूपणम्	...	...	३२
अन्तःस्थानामुत्पत्तिः	...	...	३३
मकारोत्पत्तिः	...	...	३३
कर्मेन्द्रियोत्पत्तिः	...	...	३३

अहिर्बुध्न्यसंहितायाः स्वरा व्यञ्जनानि च ३४
उद्यती क्रियाशक्तिर्नादः ३६
शैवशाक्ततन्त्रानुसारं वर्णोत्पत्तिः ३६
बीजम् ३७
स्वराः ३८
व्यञ्जनानि ४३
तन्त्रालोकानुसारं पश्यन्तीमध्यमावैखरीणां प्रत्येकं त्रैविध्यम् ... ४८
वर्णा भौताः ५२
मातृकाचक्रानुसारतो वर्णाः ५२
वर्णाः, तेषां कालश्च ५३
बिन्द्वादीनां समष्टिर्नादः ५३
वर्णस्थानानि ५६
मातृका ५७
षोडश स्वराः, कादीनि व्यञ्जनानि ६६
ऋक्प्रातिशाख्यानुसारं वर्णक्रमः ६९
व्यञ्जनानि ६९
संहिताविवेचनम् ७२
ऋक्प्रातिशाख्ये संहिताभेदाः ७४
वर्णानां प्रकृतिः ७८
अनुस्वारोच्चारणप्रक्रिया ८२
सन्ध्यक्षरविचारः ८३
हिन्दी-संस्कृतभाषीयोच्चारणविचारः ८४
वर्णदोषाः ८५
सूत्रकारमते दोषाः ८७
प्रातिशाख्यरीत्या दोषाणां नामानि ८९

प्रातिशाख्येषु करणद्वैविध्यम्	...	...	१०४
यजुःप्रातिशाख्यानुसारं वर्णविचारः	...	...	१०५
वर्णानां करणविचारः	...	...	१०८
यमविचारः	...	...	११०
वर्णसमाम्नायविचारः	...	...	११३
सन्ध्यक्षराणि	...	...	११३
व्यञ्जनानि	...	...	११३
अन्तःस्थानामाद्ययकारस्योच्चारणप्रक्रिया	...	...	११६
उदात्तादिस्वरविचारः	...	...	११८
तैत्तिरीयप्रातिशाख्यानुसारं वर्णाः	...	...	१२०
अन्यशाखीयः स्वरितविचारः	...	...	१२९
वर्णानां ध्वनिविचारः	...	...	१३१
वर्णानां स्थानकरणाभ्यन्तरप्रयत्नविचारः	...	...	१३४
स्वरभक्तिविचारः	...	...	१४७
वर्णविशेषोत्पत्तिः	...	...	१५०
सामवेदानुसारं वर्णाः	...	...	१५२
वाचो वृत्तिनिरूपणम्	...	...	१५३
वर्णाः संज्ञाप्रत्याहारसमाः	...	...	१५४
व्यञ्जनानि	...	...	१५७
अन्तस्थाः	...	...	१५७
अयोगवाहविचारः	...	...	१५८
यमविचारः	...	...	१५८
अनुस्वारविचारः	...	...	१५८
वाचोवृत्तिविचारः	...	...	१६१
वर्णाः संज्ञाप्रत्याहारसमाः	...	...	१६२

अन्तस्थाः १६२
अयोगवाहविचारः १६३
अनुस्वारविचारः १६३
ह्विटनीसमुद्धतभाष्यांशार्थः १७८
यजुर्वेदप्रातिशाख्ये हकारस्य त्रैविध्यम् १८०
तैत्तिरीयप्रातिशाख्ये उच्चारणस्थानानि १८७
तैत्तिरीयप्रातिशाख्ये व्यञ्जनानामुच्चारणस्थानानि १८८
ऋक्प्रातिशाख्यानुसारमुच्चारणस्थानानि १९०
सामप्रातिशाख्यानुसारमुच्चारणस्थानानि १९१
सामप्रातिशाख्यानुसारं वर्णानां स्थानादीनि १९१
अथर्ववेदीयमाण्डूक्यशिक्षोक्तानि स्थानानि १९२
याज्ञवल्क्यशिक्षानुसारं वर्णनिरूपणम् १९३
अनुस्वारविशेषः १९५
यकारस्य वर्गीयजकारोच्चारणम् १९६
वकारोच्चारणप्रक्रिया १९७
हकारोच्चारणम् १९७
रङ्गविचारः १९८
संयोगपिण्डविचारः १९८
आपिशलिशिक्षायाः पुनर्विचारः २०१
करणनिरूपणम् २०४
प्रयत्ननिरूपणम् २०५

परिशिष्टम्—१

मानवस्वरोच्चारणयन्त्रम् २०७
वर्णोच्चारणप्रक्रिया २०८

परिशिष्टम्—२

निगमागमविवेकः २१७

द० ६८८२७
पू० आ० वा० वि० पु०

व्याकरणदर्शनपीठिका

बुद्धिं योऽष्टगुणां ददाति सदयं भक्ताय सत्कात्मने
तत्प्राप्त्या चिदचिद्विभागमखिलं विश्वं समुद्भासते ।
योऽन्तःस्थो बहिरेत्य योगकलया तत्त्वान्तरङ्गत्रयं
दत्त्वा पूतमनस्कतां वितनुतां नारायणः सोऽचिरात् ॥ १ ॥

यावत् त्वां भजते जनो मधुरिपो तावत् स भक्ता भवेत्
त्वां भक्तुं यतते यदा करुणया भक्तस्तदा सोच्यते ।
स्वीयोक्तिं द्रढयन् दयस्व भगवन् त्वल्लब्धभावस्य मे
याचे नाथ यतस्त्वदङ्घ्रिकमले मां तादृशं त्वं कुरु ॥ २ ॥

एतद् व्याकृतिदर्शनं त्वमदिशः कर्तुं जनं तावकं
क्षिप्रं तस्य कुरुष्व पूर्त्तिमधुना धुन्वन्नघानां ततीः ।
यद् दृष्टं मुनिभी रहस्यमहितं दाक्षीसुताद्यैः पुरा
तन्मत्संविदि दीव्यतादनुदिनं नान्यं त्वदन्यं श्रये ॥ ३ ॥

प्रथमं दलम्

शिक्षारूपाङ्गाध्ययनोपेक्षया वर्णोच्चारणशैल्यास्त्यागः

अथाहं व्याकरणदर्शनं स्थापयितुं भूमिकोपस्थापनानन्तरं पीठिकां तत्र निधातुं पीठिकाभिव्यक्तये प्रयस्यामि । अस्यां पीठिकायां शिक्षायाः प्रातिशाख्यस्य च प्राधान्यं भविष्यति । अद्यत्वे शिक्षामनधीत्यैव बाला अन्यान्यङ्गानि किमुत दर्शनानि साहित्यं चाध्येतुं प्रवर्तन्ते । तस्यैवायं

परिणामो यदस्मिन्नार्यावर्तेऽपि कोऽप्येतादृशः पुरुषो नावलोक्यते, यो हि शिक्षानुसारं वर्णानुच्चारयितुं शक्नुयात् । उदात्तादिस्वरोच्चारणकथा तु दूरापास्तैव प्रतिभाति । यद्यपि वेदे केचन वैदिकाः स्वरानुच्चारयितुं शक्नुवन्ति, तथापि तेऽप्यन्यान् वर्णान् यथास्थानप्रयत्नमभिधातुं न पारयन्ति । इतः पूर्वमासन्नेतादृशाः पुरुषा ये हि शिक्षां सम्यगधीत्य तद्रीत्या वर्णोच्चारणं च तथाऽभ्यस्य प्राप्तमन्त्रोच्चारणजन्यसामर्थ्या अनुष्ठापितयज्ञादिक्रियाभिः संसाधितयजमानमनोरथा यशःस्तोममलभन्त । पुरा कल्पे तु ऋष्यश्रृङ्गादय ऋत्विजः पुत्रियामिष्टिमनुष्ठाय वैदिकीं पद्धतिं सुगमां व्यदधुः । उक्तञ्च वाल्मीकीये रामायणे आदिकाण्डे पञ्चाशे सर्गे षोडशे श्लोके—

ततो भागार्थिनो देवान् द्रष्टुमर्हसि कौशिक ।

(वा. रा. का. १ स. ५० श्लो. १६) इत्यादिना । यथास्थानप्रयत्नमन्त्रोच्चारणशक्तितोषिता देवाः प्रत्यक्षं यज्ञमागमन् । नेदानीं कापि दृश्यते श्रूयते वा देवानामागमनम् ।

शिक्षकस्य प्राधान्यम्

शिक्षामेवाधिकृत्य ऋक्प्रातिशाख्यभाष्ये—

उक्तोदाहरणं किञ्चिद् बहुग्रन्थधरो नरः ।
आक्षिप्तः शैक्षिकेणेह तृणाग्निरिव शाम्यति ॥
सुबहुज्ञोऽपि यो भूत्वा शिक्षां चेन्नाधिगच्छति ।
न राजति सभायां स [1]शैक्षिकस्य समीपतः ॥
ब्राह्मणेषु समेतेषु विद्वत्सु च बहुष्वपि ।
ब्रह्मोद्ये संप्रवृत्ते यः शैक्षिकः स विराजते ॥ इत्युक्तम् ।

(ऋक्प्रा० प० १४ सू० ६९)

---

१. 'शैक्षिक' इत्ययं प्रयोगश्चिन्त्यः, ऋमादिषु शिक्षाशब्दपाठात् 'तदधीते तद्वेद' (पा० ४।२।५९) इत्यधिकारे वुनि शिक्षामधीत इति शिक्षक इति रूपस्यैव साधुत्वात् ।

एतेन शिक्षाध्ययनं सर्वतः प्रथममपेक्ष्यते । तदर्थमेवाहमस्मिन् पीठिकारूपे ग्रन्थे तथा प्रयतिष्ये यथैनमधीत्य विद्वांसः स्वशिष्यान् शिक्षयेयुः। येन—"दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥" (म० भा० पस्प० पृ० २) इति श्रौतोक्तिविषयीभूतास्ते मा भूवन्। अत्रत्याः केचनांशा भूमिकायामपि मया संक्षेपेण निर्दिष्टाः सन्ति । ते चावश्यमेवात्र विस्तरेण प्रदर्शयिष्यन्ते । अपि चाहं पीठिकायामपि सूत्राण्येव प्रथममुपन्यस्य तेषां व्याख्यामपि यथास्थानं दर्शयिष्ये । तत्र ग्रन्थारम्भे मङ्गलार्थं स्वाभिप्रेतार्थप्रदर्शनार्थं च 'अथ शब्दानुशासनम्' इति पातञ्जलसूत्रमेव स्वाभीष्टप्रसाधकत्वेन निश्चित्य दलभेदभिन्नां पीठिकामिह प्रदर्शये। तस्या इदमादिमं सूत्रम्—'अथ शब्दानुशासनम्'।

तत्र शब्दानुशासनपदघटकं शब्दपदमपि वर्तते। तत्र च कोऽयं शब्द इति जिज्ञासोदेति । तां तु संक्षेपेणैवात्र शमयामि । विस्तरेण तु प्रतिमायां प्रकटयिष्ये ।

शब्दस्वरूपम्, तत्र वृत्तीनां विचारः

एवं च 'तपरस्तत्कालस्य' (पा० सू० १-१-७०) इति सूत्रभाष्ये शब्दोच्चारणविचारणायां त्रयः पदार्था निर्दिष्टाः सन्ति। एका वृत्तिः, अपरो ध्वनिः, तृतीयश्च स्वरः। तत्र द्रुता-मध्यमा-विलम्बितभेदेन त्रिविधा वृत्तयः। अत्र कैयटः—"द्रुतं श्लोकम् ऋचं वोच्चारयति वक्तरि नाडिकाया[1] यस्या नव पानीयपलानि स्रवन्ति तस्या एव मध्यमायां वृत्तौ द्वादश पलानि स्रवन्ति। नवानां त्रिभागास्त्रीणि पलानि तदधिकानि नव

१. नाडिकाया इत्यस्य सुषुम्णाया इत्यर्थो नागेशभट्टेन कृतः। परं कालमानार्थमधुनाऽपि घटीयन्त्रं रक्ष्यते। यस्यां घटिकायां जलं स्थाप्यते, तस्यैव जलस्य नव बिन्दवः पतन्तीत्यर्थे न काचिद् बाधा भवेत्। योगिजनमन्तरा सुषुम्णायाः प्रत्यक्षस्यासम्भवात्।

द्वादश सम्पद्यन्ते। विलम्बितायां वृत्तौ तु षोडश पलानि स्रवन्ति" इत्याह। भाष्ये 'द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानम्, कालभेदात्' (पा० सू० १-१-७० वा०-४) इति वार्त्तिकव्याख्यायाम्—"द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम्। तथा मध्यमायां द्रुतविलम्बितयोः। तथा विलम्बितायां द्रुतमध्यमयोः। किं पुनः कारणं न सिद्ध्यति? कालभेदात्। ये हि द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायाम्। ये च मध्यमायां वर्णास्त्रिभागाधिकास्ते विलम्बितायाम्" इत्युक्तम्। अत्रोद्द्योते—"त्रिभागाधिका इति भाष्यस्य तृतीयभागाधिका इत्यर्थः, कैयटात् तथा प्रतीतेः। त्रयो भागाधिका इत्यर्थस्तु उचितः। केवलसंख्यावाचकानां पूरणप्रत्ययान्तार्थकत्वे मानाभावात्, तत्रासाधुत्वाच्चेति परे" इत्युक्तम्।

उद्द्योतखण्डनम्, प्रदीपमण्डनञ्च

अत्रेयं विचारणा—

अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्।
शिष्याणामुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम्॥

(ऋक्प्रा० प० १३ सू० ४९) इति सूत्रतो वृत्तीनां तावदेव तारतम्यं प्रतीयते, यावद्धि कैयटेनोक्तम्। यदि हि उद्द्योतानुसारं व्याख्या क्रियते, तर्हि द्रुतायां वृत्तौ यावान् कालोऽपेक्ष्यते ततस्त्रिगुणः कालो मध्यमायां लभ्येत; एवं ततस्त्रिगुणो विलम्बितायाम्। तच्चासम्भवम्, व्यवहारे तथा प्रतीत्यभावात्। तथा हि—द्रुतायां यद्येका मात्राऽपेक्ष्यते तर्हि मध्यमायां भागत्रयाधिक्याच्चतस्रो मात्रा अपेक्ष्येरन्, एवं विलम्बितायां षोडश मात्राः, तच्चासम्भवम्।

यदि च सुषुम्णाया नवामृतबिन्दवो द्रुतायां स्रवन्ति, तर्ह्यमृतस्य नव भागा मन्तव्याः। एवं च त्रयो भागा अधिका मध्यमायामिति स्वीकारे नवभिस्त्रयाणां योगे द्वादश बिन्दवो मध्यमायां सम्पद्येरन्। एवं विल-

म्त्रितायां द्वादशभिस्त्रयाणां योगे पञ्चदश सम्पन्ना भवेयुः। परमेतन्नहि युक्तियुक्तम्, यथा कश्चन कञ्चन ब्रूते देवदत्ताय द्वादश मुद्रा दीयन्ताम्, तासां त्रयो भागा यज्ञदत्ताय दीयन्ताम्। तत्र नियुक्तः पुरुषः किं कुर्यात्? यज्ञदत्ताय षट्त्रिंशन्मुद्रा दास्यति। यद्वा तिस्र एव। किं वा द्वादशानां मुद्राणामाणकानि प्रकल्प्य तत आणकत्रयमेव दास्यति। एतन्मते महती अनवस्था पतिष्यति। एतदर्थमेतद् भाष्यं दृष्ट्वा यत्रावयविवाचकशब्दमुपादाय तदनन्तरं भागशब्देनांशशब्देन वा सह समस्तसंख्यावाचकशब्दप्रयोगो भवति, तत्र संख्यावाचकशब्दानां लक्षणया पूरणार्थकतैव युक्तियुक्ता भवति। इयमेव रीतिर्बहुषु स्थलेषु दृश्यते, यथा बृहत्संहितायाम्—

"देवागारद्वारस्याष्टांशोनस्य यस्तृतीयोंऽशस्तत्पिण्डिकाप्रमाणम्, प्रतिमा स्यात् तद्द्विगुणपरिमाणा" (बृहत्सं० ५७।७३)।

अत्र हि यावद् द्वारमानं तस्याष्टानामंशानामूनताऽसम्भविनी स्यात्, एतदर्थं तत्राष्टमांश एवोनितो भवति। किञ्च वाल्मीकीयरामायणे आदिकाण्डे मदीये काश्मीरपुस्तके—

चतुर्भागं द्विधा कृत्वा सुमित्रायै ददौ तदा।

इति श्लोकेऽपि चतुःशब्दस्य पूरणार्थकता भागशब्दसंनिधाने साधु प्रतीयते। नित्यापोडशिकार्णवे षष्ठविश्रमे—"ज्योत्स्नाकारास्तथाष्टांशाः" (श्लो० २९) इत्यत्रापि पूरणार्थक एवाष्टशब्दः, भाष्यप्रामाण्यात्तथैव प्रतिपत्तव्यम्। एवं चात्र शब्दशक्तिसामर्थ्यात्तात्पर्यानुपपत्त्या लक्षणया वक्ष्यमाणयुक्तिभिश्च कैयटोक्तार्थ एव साधीयान्।

ऋक्तन्त्रव्याकरणमवलम्ब्य प्रदीपसमर्थनम्

अत एव ऋक्तन्त्रव्याकरणे (प्र० २ दशक ४) शाकटायनः—"द्रुतायां मात्रा" (सू० १) द्रुतायां मात्रा त्रिकला भवति। "चतुष्कला मध्यमायाम्" (सू० २ भा०) चतुष्कला मात्रा मध्यमायां भवति। "पञ्चकला विलम्बितायाम्" (सू० ३) पञ्चकला मात्रा

विलम्बितायां भवति । (सू० ३४) "वर्णान्तरं परमाणु" (सू० ४ वर्णान्तरं परमाणुमात्रं भवति । "तत् कलार्धम्" (सू० ३५) । "स्वरयोरर्धमात्रा" (सू० ५) स्वरयोरन्तरमर्धमात्रा भवति । ऋक्प्रातिशाख्ये शौनकश्च—"तिस्रो वृत्तीरुपदिशन्ति वाचो विलम्बितां मध्यमां च द्रुतां च" (ऋक्प्रा० प० १३ सू० ४६ भा०) तिस्रो वृत्तीर्वाच उपदिशन्त्याचार्याः । विलम्बितां बालानामध्यापनादिपूपदिशन्ति । मध्यमां व्यवहारादिपूपदिशन्ति । द्रुतामध्ययनस्य बहुरूपाभ्यास उपदिशन्ति । "वृत्त्यन्तरे कर्मविशेषमाहुः" (ऋक्प्रा० प० १३ सू० ४७) अन्या वृत्तिर्वृत्त्यन्तरं तस्मिन् वृत्त्यन्तरे कर्मविशेषमाहुराचार्याः । विलम्बितायां प्रातःसवनं भवति । मध्यमायां माध्यन्दिनं सवनम् । द्रुतायां तृतीयं सवनमित्यादि । "मात्राविशेषः प्रतिवृत्त्युपैति" (ऋक्प्रा० प० १३ सू० ४८) वृत्तिं वृत्तिं प्रति प्रतिवृत्ति मात्राविशेषो मात्राधिक्यमुपैत्युपगच्छति । द्रुतायां वृत्तौ ये वर्णास्ते मध्यमायां त्रिभागाधिका भवन्ति । तथा मध्यमायां ये वर्णास्ते विलम्बितायां त्रिभागाधिका भवन्ति । चतुर्भागाधिका भवन्तीत्येके[1]" इत्यादिभिः सूत्रैः पूरणप्रत्ययान्तार्थकतैव सूचिता भागशब्दसन्निधाने संख्यावाचकानाम् ।

एवं सत्यत्रत्यशब्दशक्तिसामर्थ्यात् कैयटोक्त एवार्थः साधीयान् । अत एव दण्डिकृष्णादयोऽप्येवमिति लिखितं छायायाम् । तथा च वृत्तिविषयकविवादे शाकटायनोक्त्यैव निर्णयः सम्यक् प्रतीयते । भाष्यादिष्वन्येषु वा प्रामाणिकग्रन्थेषु नहि तथा स्पष्टतया तत्स्वरूपं प्रदर्शितम् ।

---

१. इदमेवैकेषां मतम्—"पञ्च कला विलम्बितायाम्" (प्र. २, दशकः ४, सू. ३) इति सूत्रे ऋक्तन्त्रव्याकरणे शाकटायन आह । यतो हि मध्यमायां यदि चतुष्कला तर्हि त्रिभागाधिका इति मते पञ्चकलातोऽधिका मात्रा भवेत् । 'चतुर्भागाधिका' इत्यस्य 'चतुर्थभागाधिका' इत्यर्थे चतुर्थी कला यदि गृह्यते, तर्हि पञ्चकलात्वं साधु संघटेत ।

मात्रानिर्णयः, द्वयोर्वर्णयोरुच्चारणमध्ये कियान् कालः

तत्र हि द्वयोर्वर्णयोरुच्चारणेऽन्तरं परमाणुमात्रं भवति । द्वयोः स्वरयोरुच्चारणेऽन्तरमर्धमात्रा भवति । विरामेऽन्तरं मात्रा भवति । नित्यविरते द्विमात्रमन्तरं भवति । गाथासु च द्विमात्रमन्तरं भवति । सामसु त्रिमात्रमन्तरं भवति । तथा च ऋक्तन्त्रव्याकरणमतेन व्यञ्जनमणुकालं भवति । द्वाभ्यामणुभ्यां मात्रा जायते । सा च मात्रा त्रिकला भवति । परमाणु च कलार्धम् । अस्यां स्थितौ षड्भिः परमाणुभिर्मात्रा भवति ।

शुक्लयजुःप्रातिशाख्यमते तु द्वाभ्यां परमाणुभ्यामणु, द्वाभ्यामणुभ्यामर्धमात्रा, द्वाभ्यामर्धमात्राभ्यामेका मात्रा । एवं चैतन्मतेऽष्टभिः परमाणुभिरेका मात्रा । ऋक्तन्त्रमते तु षड्भिः परमाणुभिर्मात्रा भवति । सा च मात्रा त्रिकला भवति ।

एकस्यापि वर्णस्य स्थानभेदेन कालभेदः

याज्ञवल्क्यशिक्षायान्तु—

सूर्यरश्मिप्रतीकाशा कणिका यत्र दृश्यते ।
आणवस्य तु सा मात्रा मात्रा तु चतुराणवी ॥
मानसे चाणवं विद्यात् कण्ठे विद्याद् द्विराणवम् ।
त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुः ॥

(या० शि० श्लो० ९–१०) इत्युक्तम् । एतन्मते एकस्यैव वर्णस्य स्थानभेदेन कालभेदो भवति । अस्यां स्थितौ यद्यपि विरोधः परिदृश्यते परस्परम् , तथापि ऋक्तन्त्रव्याकरणे द्रुतायां वृत्तौ षड्भिः परमाणुभिर्मात्रा भवति, सा च मात्रा त्रिकला । तत्र च सुषुम्णाया घटिकाया वा नव पानीयपलानि स्रवन्ति ।

मध्यमायां तु चतुष्कला मात्रा भवति । तत्र च द्वादश पानीयपलानि स्रवन्ति । एवं च तत्र त्रिभिः पानीयपलैरेका कला भवति, अणु

च कलार्धम्। एवं सत्यष्टभिः परमाणुभिर्मात्रा तत्र भविष्यति। अनयैव रीत्या शुक्लयजुःप्रातिशाख्यऋक्तन्त्रव्याकरणयोर्विरोधः परिहरणीयः।

याज्ञवल्क्यशिक्षायां तु चतुर्भिरणुभिर्मात्रा भवति। ऋक्तन्त्रव्याकरणमतेन तु द्वाभ्यामणुभ्यां मात्रा भवति। अनयोर्विरोधपरिहारस्तु "कण्ठे विद्याद् द्विराणवम्" (या० शि० श्लो० १०) इति याज्ञवल्क्योक्त्यैव कार्यः। अर्थात् कण्ठस्थानपर्यन्तभागगतानामेव वर्णानां काल ऋक्तन्त्रव्याकरणे प्रतिपादितोऽस्ति।

एतत्पूर्वोक्तग्रन्थपर्यालोचनया वृत्तीनां स्वरूपं कैयटोक्तमेव युक्तम्। ऋक्तन्त्रव्याकरणं स्पष्टतया कैयटमतं परिपुष्णाति। यद्यपि ऋक्तन्त्रव्याकरणे पञ्चकला विलम्बितायां वृत्तौ मात्रा प्रतिपाद्यते। एकस्यां कलायां तु त्रीणि पलानि पानीयस्य सुषुम्णायाः स्रवन्ति। तथा च विलम्बितायां पञ्चदश पलानि स्रोष्यन्ति। ननु नागेशभट्टरीत्याऽपि त्रयो भागा अधिकाः (स्युः) इति त्रिशब्दस्य पूरणप्रत्ययान्तार्थकत्वाभावेऽपि न काप्यापत्तिरिति चेन्न; भाष्याक्षरव्याख्याने प्रवृत्तस्य नागेशभट्टस्य सिद्धान्ते नवैव भागा द्रुतायां वृत्तौ कल्पनीया नाधिका इत्यत्र मानाभावेन तद्व्याख्यानस्य दोषग्रस्तत्वात्।

वृत्तिभेदेन कालभेदेऽपि न वर्णभेदः

अस्यां स्थितौ वृत्तिभेदेन यदि वर्णभेदस्तर्हि 'तपरस्तत्कालस्य' (पा० १।१।७०) इत्यत्र दोषापत्तिः। अत आह वार्त्तिककारः—"सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते" इति। अत्र भाष्ये दृष्टान्तद्वयं दत्तम्। तत्राध्वदृष्टान्तं खण्डयित्वा भेर्याघातवदिति दृष्टान्तः सिद्धान्ततः। तथा च वृत्तिभेदेऽपि वर्णानामुच्चारणकाले भेदो न भवति। तद् यथा—कश्चन पुरुषो भेरीमाहत्य तं शब्दमुपलभमानो विंशतिं पदानि गच्छति, कश्चन त्रिंशतम्, कश्चन चत्वारिंशतम्, स्फोटस्तावानेव भवति, ध्वनिकृता वृद्धिः। यथा भेर्याघातस्थले स्फोटस्तु तावानेव भवति किन्तु ध्वनिर्भिद्यते। एवमेव यस्य वर्णस्य यावानेवोच्चा-

रणकालः शिक्षादिभिः स्थिरीक्रियते तावानेव शिक्षितानां कृतेऽपेक्ष्यते। पामरैस्तु शिक्षाध्ययनाभावाद् वर्णा अन्यथाऽन्यथोच्चार्यन्त इति तत्तद्वर्ण-स्वरूपमपि विकार्यते तैः। वृत्तिविषयेऽपीदृशी एव गतिः। अर्थात् शिक्षाज्ञानशून्या बहवः पुरुषा वृत्तिस्वरूपमजानन्तो वृत्तिष्वपेक्षितात् कालादधिकं कालं लगयन्ति। तावता ते प्रमाणपदाद् दूरापेताः।

बहवस्तैर्थिकाः शिवदृष्टिप्रभृतिष्वन्येषु च सन्दर्भविशेषेषु वैया-करणमतमन्यथोपस्थाप्य प्रत्याचक्षते। प्रायो हि मतान्तरखण्डने प्रवृत्ता बहवः पुरुषा निरवद्यमपि मतं निराचिकीर्ष्यमाणं तत्स्वरूप-मन्यथयन्तो निराकुर्वन्ति। इत्यलमप्रासङ्गिकेन। प्रकृतमनुसरामः—वृत्तिविषये वर्तते मतद्वैविध्यम्। तथा हि भगवान् पतञ्जलिः—द्रुतायां ये वर्णास्त्रिभागाधिकास्ते मध्यमायाम्। मध्यमायां ये वर्णास्त्रिभागा-धिकास्ते विलम्बितायामित्याह।

विलम्बितायां शाकटायनस्य मतभेदः

ऋक्तन्त्रव्याकरणे शाकटायनस्तु द्रुतायां त्रिकला मात्रा, मध्यमायां चतुष्कला, विलम्बितायां पञ्चकलेत्यवोचत्। तथा चैतन्मतयोर्द्रुतामध्य-मयोर्नास्ति कश्चन विरोधः। किन्तु विलम्बितायामेव शाकटायनोक्ति-र्भिद्यते। इदमेव शाकटायनमतम् ऋक्प्रातिशाख्ये 'मात्राविशेषः प्रति-वृत्त्युपैति' इति सूत्रभाष्ये 'चतुर्भागाधिका भवन्तीत्येके' इत्यनेनो-पन्यास्थत्। एतद्रीत्या यदा मध्यमायां चतुष्कला मात्रा भवति, तदा तच्चतुर्थभागाधिका विलम्बितायामिति पञ्चकला मात्रा विलम्बितायां वृत्तौ सिध्यति।

ध्वनिस्फोटयोर्विचारः

एवं च स एव स्फोटो यस्योच्चारणेनार्थावबोधो भवति। ध्वनि-र्व्यञ्जकत्वेन शब्दस्योपकारकः। अर्थाद् ध्वनिर्व्यञ्जकः, स्फोटो व्यङ्ग्यः। तद् यथा—घटः पुनः पुनर्दृश्यमानोऽपि न भेदभाग् भवति तथा विल-

म्बितायां वृत्तावकार एव पुनः पुनरुपलभ्यत इति वृत्तिभेदेऽपि वर्णस्य भेदो न गृह्यत इति सर्ववृत्तिषु तत्कालत्वम्। ह्रस्वदीर्घप्लुतास्तु स्वत एव भिन्ना भिन्नैर्ध्वनिभिर्व्यज्यन्त इति तेषां कालभेदः। एवं च वृत्तिषूपलब्धीनां कालभेदो विषयस्त्वभिन्न एव। तथा चोक्तं भाष्ये—

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः॥

(पा० सू० १।१।७० वा० ५) इति। ध्वनिः स्फोटश्च शब्दानां सम्बन्धिनौ स्तः। तत्र ध्वनिर्व्यञ्जकः, स्फोटस्तु व्यङ्ग्यः। ध्वनिश्च द्विविधः—प्राकृतो वैकृतश्च। तत्र प्राकृतो ध्वनिः स्फोटव्यञ्जकः, वैकृतस्तु ध्वनिरुपलब्धौ पौनःपुन्ये कारणम्। अत एव तस्यापि तेन रूपेण व्यञ्जकत्वम्, तदुपक्रमेणैव भाष्यप्रवृत्तेः। तत्र भाष्ये ध्वनिशब्देन वैकृतध्वनेरेव ग्रहणम्। अत एव हरिणा—

वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥

इत्युक्तम्। स च वैकृतो ध्वनिः शब्दस्याभिव्यक्तेरूर्ध्वं भवति। तथा चोक्तं हरिणा—

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥

(वा० का० १ श्लो० ७८)। तत्र—"व्यक्तानां ध्वनिः स्फोट-श्चेत्युभयं गृह्यते। अव्यक्तानां तु केवलं ध्वनिरेव गृह्यते" (१–१–७० कै० पृ० ५१८ प० १७) इति कैयटोक्तिर्न युक्ता, भाष्योक्तदृष्टान्तदार्ष्टान्तिकयोर्वैषम्यापातात्, अन्यत्रोभयोरपि व्यक्ताव्यक्तयोः स्फोटत्वस्वीकारात्। भेर्याघातस्थलेऽपि स्फोट एव भेरीताडनाभिव्यक्तः श्रोत्रग्राह्यः।

स्फोटविचारस्तु दर्शने प्रतिमायां भविष्यति। केवलं तद्विषये यत्

१. इयं कारिका संग्रहकारस्येति टीकायां भर्तृहरिः (प्रथमकाण्डे, श्लो० ७७)।

किञ्चिदुच्यते—स्फोटस्तावत् पश्यन्तीपदवाच्यः। स च स्फोटो नास्माकं प्रत्यक्षः, किन्तु सविकल्पकसमाधौ योगिभिः प्रत्यक्षीक्रियते। तदानीमेव यावत् कालात्मकेन वायुना सोऽभिव्यज्यते, स एव वास्तविक उच्चारणकालः। अस्यां स्थितौ यदा ह्रस्वाकारोच्चारणे सुषुम्णायास्त्रीणि पानीयपलानि स्रवन्ति, षट् पलानि दीर्घे, नव पलानि प्लुते।

शब्दानां चिराचिरोपलब्धिकरात्पत्वमहत्त्ववान् वैकृतध्वनिरेवाल्पत्वादिना लक्ष्यते। नागेशभट्टसम्मतश्चायमर्थः। तेषां शब्दानामनुशासनम्। वास्तविकी शिष्टिस्तु कालत्रयदर्शिभिर् ऋषिभिरेवावबुध्यते। अस्माकमिदं तु शासनं पश्चात्तनमित्येतस्यानुशासनत्वम्।

द्वितीयं दलम्

शब्दस्य ज्ञानरूपत्वम्

स च शब्दः किंस्वरूप इत्याकाङ्क्षायामाह—'ज्ञानं तत्'। एवं च ज्ञानस्यैव परिणामो विवर्तो वा शब्दः। तथा चोक्तं वाक्यपदीये—

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।
कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः॥

(वा. का. १–का. १०८) इति। अत्र वायोरणूनां च शब्दत्वापत्तिमनुपन्यस्य वैयाकरणाभिमतां ज्ञानस्य शब्दत्वापत्तिमुपपादयामि। अत्र च वाक्यपदीयकारिकायाः पाठभेदेन योऽर्थः सम्पद्यते तमर्थं स्वारसिकमुपस्थापयामि। तदनन्तरं भर्तृहरिटीकानुसारं विस्तरेण सोऽर्थः प्रकाशयिष्यते।

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम्।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥
स मनोभावमासाद्य तेजसा पाकमागतः।
वायुमाविशति प्राणमथासौ समुदीर्यते॥

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते॥

(वा.का.१ का. ११३–११५) इति हरिः। अत्रायं निर्गलितोऽर्थः—

इदमान्तरं यज्ज्ञानं सूक्ष्मवाग्रूपेण, (परारूपेणेति यावत्) स्थितम्, तदेव स्वस्य रूपस्य व्यक्तये प्रकाशाय शब्दरूपेण विवर्तते। स एव शब्दो मनोभावं प्राप्य तेजसा शरीरव्यापकेणाग्निना परिपक्वः प्राणवायुमाविशति। अथासौ प्राणवायुः सम्यग् उदीर्यते प्रेर्यते। अन्तःकरणतत्त्वस्य आश्रयीभूतो वायुरन्तःकरणधर्मेण समाविष्टः शरीरान्तरस्थेन ऊष्मणा सहायेन विवर्तते। आत्मग्रन्थींश्च पृथग्विधैः रूपैर्विभज्य प्राणो वर्णांश्चाभिव्यज्य वायावेव लीनो भवति। तथा च वक्त्रा स्वीयज्ञानस्य प्रकाशनाय ज्योतीरूपं यज्ज्ञानं तस्याभिव्यक्त्यर्थं पश्यन्त्यवस्थायां किञ्चिदुच्छ्रूनं शब्दार्थोभयात्मकं मनोभावमासाद्य वैद्युतेन तेजसा परिपक्वं प्राणवायुमाश्रयति, तदा मध्यमावस्थायां स वायुरुपरि गमनाय प्रेर्य्यत इति तदेव ज्ञानं वैखरीरूपं धत्ते। तथा च कत्वखत्वगत्वादिना तस्याभिव्यक्तिर्भवति। यंत्तु कश्चित् 'अथायमान्तरो

१. 'आख्यातोपयोगे' (पा. १–४–२९) इति सूत्रे उद्द्योते नागेशभट्टास्तु—

अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥

इति कारिकामुद्धृत्य "वृत्तिविशिष्टमन्तःकरणम्" इत्यूचुः। तन्मतेनान्तःकरणस्यैव मनोरूपतापत्तिरुक्ता भवति। अतो नास्ति कश्चिद् विरोधः। अस्मिन्नर्थे आद्यं ज्ञानं त्यक्त्वा वृत्त्यात्मकस्यैव ज्ञानस्य शब्दत्वापत्तिर्व्यवस्थापिता। अत्र सर्वत्र दर्शनेषु बहून् विषयानन्तर्भाव्य श्रुतयः स्मृतयश्च सृष्ट्यादिकानर्थान् प्रदर्शयन्ति। यथा—"आकाशादेव सर्वाणि भूतानि जायन्ते, आकाश एवाभिनिविशन्ति", "तस्मादेतस्माद् ब्रह्मणो नामरूपात्मकं जगज्जायते" इत्यादि। एवमेव परापश्यन्त्यादिविषयेऽपि सैव रीतिरवलम्बनीया। एवं मध्ये नादबिन्द्वादीनां सृष्टिस्तन्त्रेऽनयैव रीत्या नेया।

ज्ञाता' इत्येव पाठं मत्वेमं पाठमदूषयत्, तच्च तस्याज्ञानविलसितम्, उभयोरपि पाठयोरेकस्मिन्नेवार्थे पर्यवसानात्।

स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः॥

(वा० का० १ का० १ पृ० ६ टीका पृ० ६ प० २७) अत्र विवर्तो द्विविधः—मूर्त्तिविवर्तः, क्रियाविवर्तश्च। देशभेदावग्रहरूपेणावस्थानं मूर्त्तिविवर्तः, उत्पादविनाशादिक्रियोपहितरूपावस्थानं क्रियाविवर्तः।

स एषोऽपरोक्षो जीवयतीति जीवः परमेश्वरश्चित्स्वरूपः (अपरोक्षत्वे हेतुः) विवरेषु आधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य स घोषेण पराख्येन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं च मणिपूरचक्रे विशुद्धिचक्रे चोपेत्य वक्त्रे मात्रा ह्रस्वादिः, स्वर उदात्तादिः, वर्णः ककारादिरित्येवं वैखर्याख्योऽतिस्थूलो नानावेदशाखात्मको भवतीत्येतदर्थकेन 'स एष जीवो विवरप्रसूतिः' इत्यादिना श्रीभागवतेनायमेवार्थः स्पष्टीक्रियते।

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥
(१।१६४।४५)

---

१. 'चत्वारि वाक्परिमिता पदानि' इत्यस्य यद् व्याख्यानं भाष्यकारेणोक्तं तन्नहि स्वान्तं संतोषयति। यदपि निरुक्ते चत्वारीत्यस्य व्याख्याप्रसङ्गे 'नामाख्यातोपसर्गनिपाताश्चेति वैयाकरणाः' इत्युक्तम्, तदपि न सम्यक्। तथा हि—भगवान् पतञ्जलिः पाणिनीयं व्याकरणं व्याख्यातुं प्रवृत्तश्चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेत्येवंरीत्या कथं व्याख्यत्, यतो हि भगवत्पाणिनिमते पदे सुबन्ततिङन्तभेदेन द्विविधे स्तः। एतादृशं भगवतः पतञ्जलेर्व्याख्यानं न हि युक्तियुक्तं प्रतीयते। एतादृशस्य परापरदर्शिनो व्याख्यानें किञ्चिद्रहस्यं त्ववश्यमेव भवेत्। अपि च चत्वारि पदानीत्युक्तौ

इति ऋग्वर्णेनाप्ययमेवार्थः समुपोद्बल्यते। तथा हि—चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च, तानि च परा-पश्यन्ती-मध्यमा-वैखरीभेदेन प्रत्येकं चतुर्विधानि सन्ति। इमानि ये मनीषिणो वशीकृतमनस्काः परेषां मनसि स्थितानामपि विषयाणां वेत्तारस्ते विदुः-र्जानन्ति। मध्यमान्तानि त्रीणि गुहायाम्=अज्ञाने निहितानि (अन्येषां कृते न तु मनीषिणां कृते) वाचश्चतुर्थं वैखरीरूपं मनुष्या मननशीलाः साधारणा जना वदन्ति न तु जानन्ति वाचस्तत्त्वम्। अत एव विदुरिति क्रियापदमुपात्तम्।

वाक्यपदीयेऽपि तृतीयकाण्डे प्रथमश्लोके—

द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा।

इत्यादिना पक्षत्रयं प्रतिपादितम्। तत्रापि भगवतः पाणिनेर्द्विधेत्येव पक्षोऽभिमतः। अत्रायं समाधिः—एतादृशस्य पुरुषधौरेयस्य वाक्यमवश्यमेव विचारणीयम्। तथा हि—भगवान् पतञ्जलिरागमरहस्यं सर्वथा संरक्षति। स ह्यापणिक इव नहि पामरापामरसाधारण्येन विषयानुपक्षिपति। अत एव वाक्यपदीये भर्तृहरिराह—

यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः॥

(वा. का. २ श्लो. ४८८) इत्यनया कारिकया प्रतिष्ठामुपगतैः पूर्वैः-रागमैर्बहुविधैर्विना स्वयमेव तत्तदित्ययथायथमुत्प्रेक्षमाणानां विकल्पयतां प्रतिपत्तृणां शास्त्रोपज्ञमेधाविरहिणां पण्डितम्मन्यमानानामभिमानग्रहा-ग्रातानां तेषां भगवती विद्या विशुद्धप्रज्ञा प्रतिभालक्षणा न प्रसीदत्य-त्यर्थम्, किं तर्हि वृद्धोपसेवाशालिनामागमजुषां विगलिताभिमानाना-मेवैषां भगवती प्रज्ञा प्रसादमुपयातीत्यर्थिकया—

नान्या गतिर्विद्यते पतञ्जलेः, ऋते नामाख्यातोपसर्गनिपाताश्चेत्युक्तिम्। यतो हि द्विधापदवादिनः पाणिनेश्चत्वारि पदानीति वाक्यं संघटेतैव नहि।

तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति ॥

(वा० का० २ श्लो० ४९३) इत्यनया च स्पष्टीकृतम्। यथा बृहद्देवतायाम्—"न प्रत्यक्षमनृषेरस्ति मन्त्रः" (८।१२९) इत्यनेन मन्त्राणामर्थो नह्यनृषिणा द्रष्टुं शक्यत इत्युक्तम्, तथैव नहि भाष्यगूढार्थोऽप्राप्तयोगगन्धेन पुरुषेण बोद्धुं शक्यते।

अत्र हि भगवान् पतञ्जलिर्नामाख्यातोपसर्गनिपाताश्चेत्यत्र चकारमप्युपादत्ते। स च चकारः पाणिन्यभिमतं द्विविधं पदं समुच्चिनोति। न च तत्र पदचतुष्टयं नोपपद्यत इति वाच्यम्, वाक्परिमितानीति विशेषणेन चतुष्टयस्य दुर्वारत्वात्। द्विविधमपि पदं परापश्यन्तीमध्यमावैखर्यावस्थासु चातुर्विध्यं भजत एवेति सर्वं निरवद्यम्।

यद्यपि निरुक्ते (१३।९) महाभाष्ये च चत्वारीत्यस्य नामाख्यातोपसर्गनिपाता इत्येवार्थो वैयाकरणाभिमतो दर्शितोऽस्ति, तथापि तन्मन्त्रे वाक्परिमितानीति पदस्य वाचा परिमितानि परिच्छिन्नानीत्यर्थकस्योपादानेनेदं सूच्यते यद् नामाख्यातोपसर्गनिपातात्मकस्य चतुर्विधस्य पदव्रातस्य चतुर्विधाभिर्वाग्भिर्भेदो भवति। तथा च नामाख्यातोपसर्गनिपातरूपाणि वाक्परिमितानीति विशेषणरहितानि सर्वे मनुष्या वदन्ति न तु जानन्ति। परं परां पश्यन्तीं मध्यमामवस्थां प्राप्तमेकमपि पदं नहि ज्ञातुं पारयेयुः किमुत वक्तुम्। मनीषिणस्तु विदन्ति जानन्ति, परं स्थूलकण्ठादिव्यापारस्य तत्राभावान्नहि तेऽपि वदन्ति। वैखरीरूपमासाद्य तु वदन्त्येव।

आसां सर्वासां वाचां वास्तविकं स्थानं तु मस्तिष्कमेवास्ति। तत एवाविर्भूय वाग् अधस्तनेषु स्थानेषु वामभागतो दक्षिणावर्त्तं कुर्वती समायाति। अर्थात् सहस्रारादुद्भवन्ती वाक् पिङ्गलया मूलाधारमागत्य तत इडया मणिपूरमनाहतं विशुद्धं चागत्य यथास्वं तन्त्रामानि भजते। पुनश्च सहस्रारे इडयैव विलाप्यते।

यद्यपि महाभाष्ये वार्त्तिके वा परादीनां तिसृणां वाचां क्वापि चर्चा नास्ति, तथापि तत्रत्यागमांशो रहस्यत्वादतिगूढरूपेणाच्छादितोऽस्ति । चत्वारीति प्रतीकमेव तादृशगूढार्थगर्भं मूलमस्ति तदागमांशस्य । शिष्टैः समाधौ पश्यन्त्याः साक्षात्कारस्य 'पृषोदरादीनि यथोपदिष्टम्' (६।३।९) इति सूत्रे स्पष्टमुक्तत्वात् ।

तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ।

(वा० का० १ श्लोक २२)

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥

(वाक्य०का० १ का० ३८)

इति वाक्यपदीयाच्च पश्यन्तीव्याकरणयोः समानार्थकत्वस्य सत्त्वेन

---

१. तत्र हि सूत्रे भाष्ये वैयाकरणलक्षणप्रसङ्गे (सू० ६।३।१०९)—के पुनः शिष्टाः ? वैयाकरणाः । कुत एतत् ? शास्त्रपूर्विका शिष्टिर्वैयाकरणाश्च शास्त्रज्ञाः । यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रम्, तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । एवं तर्हि निवासत आचारतश्च । स चाचार आर्यावर्त एव । कः पुनरार्यावर्तः ? प्रागादर्शात् प्रत्यक् कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । एतस्मिन्नार्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद् विद्यायाः पारगास्तत्र भवन्तः शिष्टाः । यदि तर्हि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या क्रियते ? शिष्टज्ञानार्थाऽष्टाध्यायी । कथं पुनरष्टाध्याय्या शिष्टाः शक्या विज्ञातुम् ? अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं येऽत्र विहिताः शब्दास्तान् प्रयुञ्जानम् । स पश्यति । नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं न चाष्टाध्यायीमधीते ये चात्र विहिताः शब्दास्तांश्च प्रयुङ्क्ते । अयं नूनमन्यानपि जानाति । एवमेषा शिष्टज्ञानार्थाऽष्टाध्यायी ।

यत्स्थानमागत्य परां पश्यन्ति, तस्या एव पश्यन्तीत्वस्वीकारः सडिण्डिमवादं घोषणीयः।

अपि च—

परावरे ब्रह्मणि यं सदाहुर्वेदात्मानं वेदनिधिं मुनीन्द्राः।
तं पद्मगर्भं परमं त्वादिदेवं प्रणम्यर्चां लक्षणमाह शौनकः॥

(ऋक्प्रा० प० १ सू० १) इति सूत्रोपरि भाष्ये—

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥

(मैत्र्युप० ६।२२) इत्येतद्वचनप्रामाण्यात् शब्दब्रह्मानन्तरं परब्रह्मणः साक्षात्कारो भवतीत्यायाति। तथा च शब्दब्रह्मण एव व्याकरणापरपर्यायत्वं मन्तव्यम्। एतावताऽपि परा वाणी ग्रहीतुमिष्टेति सिद्ध्यति।

ज्योतिरजरं ब्रह्म तद्योगात् समुपाश्नुते।
(बृ० दे० ७।१०९),

स ब्रह्मामृतमत्यन्तं योनिं सदसतोर्ध्रुवम्।
महच्चाणु च विश्वेशं विशति ज्योतिरुत्तमम्॥

(बृ० दे० ८।१४०) इत्येतदुत्तमज्योतिर्विशतीत्युक्त्या 'उद्वयम्' इत्यादिमन्त्रार्थः स्मार्यते। सर्वत्र हि शास्त्रेषु वेदेषु च तमो ज्योतिरित्यादयः शब्दा बहुधा प्रयुज्यन्ते। यथा—

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। (मनु० १।५)
"तमसो मा ज्योतिर्गमय" (बृ० उ० १।३।२८)

इत्यादिवचनचयतत्त्वं प्रस्फोरयितुं प्रयते। तमसो ज्योतिः कया रीत्या प्राप्यत इति तन्मार्गं प्रेप्सवो बहवः साधकशीर्षण्या अधिकारभेदसम्भेदमनोरथपथमुद्बिभासिषवः स्वीयशक्तिविजृम्भिततत्त्वचयं पुरः प्रसारयितुं प्रायतिषत। अवालम्बिषत चानेकविधप्रमाणप्रमेयसोपानपरम्पराम्। परमहमत्र स्वप्नोपलब्धसंविदमिव यत्किञ्चन वच्मि, तदीयं सारमाकृष्य सन्तुष्टस्वान्ताः सम्पद्यन्तां संयतमनस्काः साधवः। तमसो-

ऽत्यन्तं संसृष्टमपि ज्योतिर्ज्योतिरुत्तमं वा नाल्पेन प्रयासेन प्राप्तुं युज्यते। तदर्थं प्रणीतेषु बहुषु शास्त्रव्रातेषु एकमेव मन्त्रमवलम्ब्योपस्थाप्यते सारः। उद्वयमित्यादिमन्त्रो बहुधा मया प्रसङ्गवशेन गृह्यते। अत्रापि तन्मन्त्रेणैव मार्गः प्रकाशितो भविष्यति। यदा हि साधकः शुचौ देशे स्थिरमासनं प्रतिष्ठाप्य नासाग्रे, भ्रूमध्ये, सहस्रारे वा निहिताभ्यन्तर-दृष्टिरितस्ततो बम्भ्रम्यमाणं मनस्तत्स्वरूपे परमाणौ सुधिरे संनिधातुं प्रयस्यति, अशेषलोकशरण्यम् अनन्तकोटिब्रह्माण्डनायकं दीनवत्सलं सौशील्यवात्सल्यौदार्याद्यसंख्येयगुणगणाकरं श्रीकरं नारायणम्—

अनुकूलस्य संकल्पः प्रतिकूलस्य वर्जनम्।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।

इति पद्धत्या षड्विधाभिः प्रपत्तिभिः शरणमुपयाति च, तदा—

योगेन योगो ज्ञातव्यो योगो योगात् प्रवर्तते।
यो नियुक्तो हि योगेन स योगे रमते चिरम्॥

(वायु० अ० ५ श्लो० ३४, ३५) इत्यत्र च विश्वस्यास्य ज्ञानं संग्रहीतुमारभते। तस्मिन्नेव तमसि स्फुटिते स्वश्चकासितं जायते। तत्रानाहतं शब्दं शृण्वँस्तेजश्च पश्यँस्तत्रैव चिरं रममाण उत्तरं देव-मासाद्य तत्रापि चिरतरं रन्त्वा दिव्यं सूर्यम् अन्तरीक्षिकया चिरतमं निरीक्षमाणस्तिष्ठति तदा तदुत्तमं ज्योतिः स्वयं प्रकाशते। तदैव तमसो ज्योतिर्गमनं सम्पद्यते। एतच्च ज्योतिर्नहि भौतिकं तेजः, किन्तु विशुद्धं ज्ञानं चित्पदवाच्यम्। तमोज्योतिषोरज्ञानज्ञाने एवार्थो वर्णनीयः। अयमेव शब्दपूर्वको योगो नादानुसन्धानपदेन बहुषु स्थलेषु समुट्टङ्कितोऽस्ति। एतद्रहस्यलेशमनासेदिवांसो भूयांसो विद्वांसो महीयोमन्यमानाः साभि-माना न्यायपथादपेतास्तार्किकास्तर्कप्रतिष्ठानं जानन्तोऽप्यजानाना नित्यं शब्दात्मकं द्रव्यं गुणत्वेनाभिमन्य स्वाभिमतसिद्धान्तवैपरीत्येन नित्यगतं नित्यमिति स्वीयोक्तिमपि विस्मरन्तो गगनगुणं शब्दमनित्यं सङ्गिरन्ते।

नाहमत्र तेषां भ्रमे मनो निधातुं समीहे, बिभेमि च तत्र दृष्टिमपि प्रक्षेप्तुम्। कदाचिन्नु तत्संसर्गो मय्यपि लब्धास्पदः स्यात्। ते हि बहवो विद्वांसो वैयाकरणाभिमतं शब्दब्रह्म निराचिकीर्षवस्तदभ्युपगतपराया वाचः प्रच्याव्य आपातरमणीयमात्मनो मतं स्थापयन्ति। ते हि शिवदृष्टथादिषु तान्त्रिकग्रन्थेषु न्यायमञ्जरीप्रभृतिषु चान्येषु सन्दर्भविशेषेषु वैयाकरणमतमन्यथोपन्यस्य प्रत्याचक्षते। प्रायो हि मतान्तरखण्डने प्रवृत्ता बहवः पुरुषा निरवद्यमपि मतं निराचिकीर्ष्यमाणमन्यथयन्तो निराकुर्वन्ति।

वाक्यपदीये (वा० का० १ श्लो० १०८, ११३) ज्ञानस्य शब्दत्वापत्तिर्वक्ष्यमाणरूपेण वर्णिताऽस्ति। तथा हि—आन्तरोऽयं ज्ञाता सूक्ष्मायां ज्ञानात्मिकायां वाचि स्थितः शब्दरूपस्य ज्ञानस्याभेदावधारणेन शब्दरूपव्यक्त्यर्थं स्थूलेन्द्रियगम्येण रूपेण विवर्तते। सोऽयं ज्ञाता प्रकाशरूपो विषयपरिच्छेदकस्थूलमनोऽवस्थां गच्छति। तच्च मनः शरीरान्तःस्थितेनोष्मणा परिपक्वं प्राणाऽख्यं वायुमाविशति, अर्थात् स्वरूपं तत्र प्रत्ययस्य आत्मरूपतामापादयति। अन्तःकरणस्याश्रयीभूतो वायुर्मनोधर्मेण समाविष्टं यथेन्धनं तेजोरूपेण समाविष्टं तेजोरूपेण विवर्तते, तथा वायुरपि शब्दरूपेण विवर्तते।

विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥ (वा० १।११६)

अत्र 'स्वात्मनो ग्रन्थीन्' इत्यस्यार्थः संगीतरत्नाकरस्थश्लोकानुसारं कुञ्जिकाटीकायाम् (१९० पृष्ठे)—एकाङ्गुलं देहमध्यमग्निस्थानं ततो नवाङ्गुले चतुरङ्गुलो देहस्य कन्दो ब्रह्मग्रन्थिरित्युच्यते। तान् ग्रन्थीन् विभजन् शब्दरूपेण विवर्तते।

(१) तत्र वाक्यपदीये प्रयत्नस्य द्वैविध्यमुपपादितम्। तथा हि—प्रयत्नो द्विविधः—बाह्यः, आभ्यन्तरश्च। तत्र कायवाक्प्रस्पन्दो बाह्यप्रयत्नशब्दवाच्यः। आभ्यन्तरो नाम अन्तर्वर्ती, स प्राणं वायुशरीरम् ऊर्ध्वमुदीरयति।

स बाह्यो वायुरान्तरेण ऊष्मणाऽनुगृह्यते । तदनुग्रहं विना सत्यप्योष्ठादिसंयोगे न वर्णाभिव्यक्तिर्भवितुमर्हति । तेनैव सारवत्तां प्रापितेन प्राणेन शरीरान्तःस्थिताभिः सूक्ष्मशब्दावयवपूर्णाभिर्नाडीभिः प्रेष्यमाणाः शब्दावयवाः प्रकाशस्वभावास्तालवादिषु स्थानेष्वभिहन्यन्ते, यथा—धूमावयवा वायुना प्रेर्य संहतिमुपनीयन्ते, तथैव स्थानेषु सूक्ष्मावयवा घनीक्रियन्ते । स स्थानेषु संहन्यमानः शब्दघनः शब्दस्याविभक्तं विम्बम् उपगृह्णाति । अत्यन्तसारूप्यान्नान्तःस्थितबहिःस्थितयोः शब्दरूपयोर्भेदः, यादृशमन्तस्तादृशमेव बहिरिति भावः ।

(२) तथा आपिशलशिक्षानुसारं नाभिप्रदेशात् प्रेरितो वायुः कोष्ठस्थानं यदा आयाति तदानुप्रदानरूपं धत्ते । स एव कण्ठगतः श्वासतां नादतां चापद्यते । अनुप्रदानं ध्वनिविशेषस्य संज्ञा । अर्थाद् वायुः कोष्ठस्थानस्थितोऽनुप्रदानरूपं धत्ते । स एव कण्ठे श्वासतां नादतां वा धारयति । विवृत्ते कण्ठे श्वासताम् , संवृते नादतां चेत्यर्थः । वायुस्तथा परिणमत इति भावः । श्वासनादानुप्रदानभेदेन द्विविधा वर्णाः । यथा बह्वृच्प्रातिशाख्ये—"वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा । आपद्यते श्वासतां नादतां वा वल्क्रीहायाम् अन्तरोभौ ॥" (ऋक्प्रा० १३ सू० १) । तथा च कोष्ठस्थानमागत्यानुप्रदानमापद्य वायुः कण्ठस्थानं प्राप्य श्वासतां नादताम् उभयं वापद्यत इत्यर्थः ।

उव्वटेन कोष्ठ्यमनुप्रदानमित्यस्य व्याख्या न हि विविच्य कृता । यथा हि—कोष्ठ्यकण्ठ्ययोर्विभागेन पूर्वं व्याख्या कृता न तथा परत्र ।

(३) अथापर आह—मनोऽभिहतः कायाग्निः प्राणमुदीरयति । स नाभेरुद्यन्मूर्ध्न्यभिहतोऽन्येन मरुताऽभिहन्यमानः क इति ख इति च ध्वनिः संपद्यते ।

(४) यथा सूक्ष्मो वायुनिचयः सर्वत्र विद्यते, परं यदा व्यञ्जनाभिघातो भवति, तदा आश्रयस्थानात् प्रविभज्यमानकम्पनादिक्रियाभिराविश्यते ।

एवमेव सर्वमूर्त्तानामन्तर्बहिश्च ध्वनिरवस्थितोऽस्ति। स च एकेषां मतेन आकाश इति प्रतिपद्यते। स ध्वनिः पुरुषप्रयत्नेन आश्रयस्थानात् क्रियाभिराविश्यते। येन स इन्द्रियग्राह्यस्य स्थूलद्रव्यस्य कारणतां प्रतिपद्यते। यया क्रिययाविश्यते सा प्रचितमेव रूपमस्य ध्वनेः। अर्थात् सूक्ष्मावस्थात्यागेन करणाभिघातेन प्रचेयरूपताऽस्य क्रियते। तेनाभिव्यक्तं प्रचिताऽख्यविक्रियारूपमस्येति भावः। स ध्वनिः स्वनिमित्तैर्वृद्धिं प्राप्तः प्रचयरूपक्रियाविशिष्टः श्रोत्रदेशं प्राप्त उपलभ्यते।

तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते॥ (वा० १।११८)

(५) तस्य प्राणे चेति। तस्य=वाचकस्य शब्दस्य या प्राणे शक्तिः या च बुद्धौ शक्तिः सैव कण्ठादिस्थानं प्राप्य विवर्तमाना विविधानि रूपाणि धारयति। य एते पक्षाः शब्दविषये प्रतिपादितास्तन्मध्ये इदमपरं दर्शनम्। प्रथमतोऽस्य शब्दस्य विशिष्टशब्दाकारारोहः, अर्थात् तदनुरूपस्थानकरणाभिघातः। स बुद्धिस्थ आकारो योग्यः शब्दोत्पत्तावितीयमेव तस्या बुद्धेः शक्तिः। सा च बुद्धिः प्राणस्य प्रेरिकेति स्वमाकारं तत्र वायौ निवेशयति।

तथा च बुद्धेः प्रतिबिम्बं यत् प्राणे पतितं तादृशप्रतिबिम्बविशिष्टः प्राणः स्वमाकारमुपगृह्णाति। तत्रापि स आकारो व्यवहारयोग्यः। सैव प्राणशक्तिः। तथा च बुद्धिशक्त्या प्राणशक्तेरनुग्रहः। एवञ्च परस्परं प्राप्तानुग्रहाभ्यां प्राणबुद्धिशक्तिभ्यां प्रतिलब्धाभिव्यक्तिः शब्दोऽर्थं प्रत्याययति। अर्थाद् बुद्धिशक्तिर्विशिष्टशब्दाकारार्पणं करोति प्राणे। स च प्राणो विशिष्टस्थानाभिघातेन विशिष्टं शब्दम् (अर्थबोधकम्) जनयति। अप्राप्तबुद्ध्युपरागः प्राणो यदा कण्ठादिस्थानमभिहन्ति तदा तदभिघाताद् अव्यक्ताक्षरध्वनिमात्रमुत्पद्यते। प्राणशक्त्यापि बुद्धिशक्तेरनुग्रहः। यतः प्राप्तोपरागप्राणवृत्तिद्वारेण बुद्धिशक्तिः शब्दत्वेन विवर्तते। न हि बुद्धिशक्तिः प्राणशक्तिमन्तरेण शक्नोति केवला शब्दत्वेन विवर्तितुम्। स

हि प्राणो यद्वर्णविषयेण प्रयत्नेन प्रेर्य्यते तस्यैव वर्णस्य स्थानमभिहन्ति। वेगवता प्राणेन स्थानस्य संयोगः प्रतिघातः। स एव तस्य प्राणस्य विवर्तः। तस्यामेवावस्थायां प्राणस्य शब्दत्वापत्तिः। तथा च गर्भीकृत-बुद्धितत्त्वप्रतिबिम्बः प्राण ऊर्ध्वमभिप्रवृत्तो ज्वालावद् वर्णस्थानेषु तत्त-दर्थबुभुत्सया जनितेन प्रयत्नेन प्रेरितो नित्यशब्दरूपमुपगृह्णन् विवर्तते। स च बुद्धिशक्त्या संसृज्य विवर्तञ्च प्राप्य पृथिवीकललन्यग्रोधधानादि-वद् भेदमुपगृह्णाति। तस्य भेदस्यानुरागमात्रं परस्मिन् प्रतिभारूपे शब्दात्मनि संनिवेशयति। एते पञ्च पक्षाः शिक्षाशास्त्रे प्रतिपादिताः सन्ति। एतच्च वाक्यपदीयटीकायां मूले च हरिणा स्वयमेवोट्टङ्कितमिति।

तृतीयं दलम्

शब्दो द्विविधः, नित्यत्वकार्यत्वाभ्याम्

तथा च नित्यस्य वाक्तत्त्वस्य बुद्धिरूपेण विवर्तः, बुद्धितत्त्वस्य च प्राणतत्त्वेन, तस्यापि कार्यशब्दरूपेण विवर्तः।

निरुक्तेऽपि शब्दस्य व्यापकत्वं प्रतिपादितम्। तथा हि—'व्याप्नि-मत्त्वात्तु शब्दस्य' (नि० १।२।४) इति निरुक्तव्याख्यावसरे—शरीरे ह्यभि-धानाभिधेयरूपा बुद्धिर्हृदयान्तर्गताकाशे प्रतिष्ठिता। तयोरभिधानाभिधेय-रूपयोर्बुद्धयोर्मध्येऽभिधानरूपया शास्त्राभिमतप्रयोजनविजिज्ञापयिषया पुरुषेण तदभिव्यक्तिसमर्थेन स्वगुणभूतेन प्रयत्नेनोदीर्यमाणः शब्द उरः-कण्ठादिवर्णस्थानेषु निष्पद्यमानतया पुरुषार्थाभिधानसमर्थवर्णादिभाव-मापद्यमानः पुरुषप्रयत्नेन बहिर्विनिक्षिप्तो विनाशिव्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य प्रत्याय्यस्य बुद्धिं सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्निमाच्छब्दः।

ततः किं यदि व्याप्निमाच्छब्दः? उच्यते—यदि नित्यो यद्यनित्यः पदचतुष्ट्वादि सर्वमुपपद्यत एव। किं कारणम्। न ह्यसंव्याप्य पुरुषस्य

बुद्ध्यवस्थमर्थप्रत्ययमादधीत । न चानवस्थितो व्याप्नुयात् । ततश्च किम् । स शब्दः स्वमर्थमभिदधत् स्वक्रियाप्रदेशोपजनितेनाभिधानेनाख्यातमित्येवमादिना स्वमात्मानमभिसंवध्य तिरोभवितुमुपक्रमते विनाशं चोपैति । तस्य स्वदेशोपजनितैराख्यातादिभिः स्वप्रदेशविषयानुस्मृतिपूर्वकं परिसंख्यानमुपपद्यत एव । तस्मात् सम्यगेवोक्तम् ।

यत् पुनरेतदुक्तम्—न हि विनष्टाविनष्टयोः परिसंख्यानमस्तीति । अत्र ब्रूमः—पुरुषप्रयत्नेनोपजनिताद् वक्त्रोद्घातात् परस्यार्थप्रत्ययमाधाय शब्दव्यक्तय एव ध्वंसन्ते न तु शब्दाकृतयः । तास्तु तयाभिधानशक्त्या बुद्धिद्वारेणावस्थिताः स्वान् अर्थान् प्रकाशयन्त्यः स्थिता एव भवन्ति । तासु साक्षात् पदपरिसंख्यानं वर्तमानमितरासु विनाशिनीषु व्यक्तिषु लक्षणयोपचर्यते । तस्माद् व्याप्तिमत्त्वाच्छब्दस्य पदचतुष्ट्वादि सर्वमुपपद्यत एव । व्याप्तिमत्त्वादित्यनेनैवेतरोपदेशः प्रत्युक्तः । एतद्दुर्गाचार्य्येणाभ्यधायि ।

अपरत्राणुर्वायुर्वा

अणूनां शब्दत्वापत्तिमार्हताः प्रतिपद्यन्ते । तेषां मते पुद्गलाः सर्वशक्तिसम्पन्ना अभिमताः । यदा हि ते परस्परं संसृज्यन्ते स्वीयशक्त्या तदा आतपरूपेण शब्दरूपेण च मेघमाला इव प्रचयं प्राप्नुवन्ति । यदा हि ते भिद्यन्ते तदा छायारूपेण तमोरूपेण च परिणमन्ते । अत्रेदं विचित्रं साम्यमस्मद्दर्शनेन परिदृश्यते, यतो हि—'ज्योतिर्वज्जज्ञानानि भवन्ति' (महा० १।४।२९) इति भाष्यकारीयसिद्धान्तेऽपि ज्ञानमेव शब्दरूपं धत्ते । इयं च प्रक्रिया अधस्तनग्रन्थे मया स्पष्टं प्रदर्शिता, तादृशी एव प्रक्रिया जैनानामपि दर्शने समायाति । यद्यपि तेषां मते पुद्गला जडा एव सन्ति तथाऽपि तेषु संसारसृष्टिस्थितिलयसामर्थ्यमुच्छलदस्ति । यद्यपि ते परमाणवः शब्दत्वापत्तिशक्तियुक्तास्तथापि प्रयत्नेनैव संह्रियमाणाः शब्दतां प्रतिपद्यन्ते । शब्दरूपेण परिणमनात्तेषां परमाणूनां शब्दाख्या ।

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः।
छायातपतमःशब्दभावेन परिणामिनः॥
स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।
अभ्राणीव प्रचीयन्ते शब्दाऽख्याः परमाणवः॥

(वा. का. १ श्लो० १११–११२)

अत्र जैनदर्शनं द्रष्टव्यम्।

अभ्राणीत्यत्र आम्राणीति पाठं मत्वा मञ्जूषायां नागेशभट्टास्तट्टीकाकृतश्च आम्रफलानीवेति दृष्टान्तमुपस्थापयामासुः। परं नायं पाठः समीचीनः, यथा धूमावयवा वायुना प्रेर्य संहतिमुपनीयन्ते तद्वदत्रापीत्यभ्रदृष्टान्त एव समीचीनः।

नित्यत्वे विवर्तः परिणामो वा

अत्र हि कारिकायां छायातपौ तमःशब्दाविति विरुद्धौ पदार्थौ द्वन्द्वभावेन निर्दिष्टौ स्तः। परमत्र बुद्धया विचारे छायैवात्यन्तं प्रचिता तमोरूपं धत्ते। आतपो नाम तेजः, तच्चास्माकं मतेऽपि वायोरुत्पद्यते। शब्दोऽपि 'वायोरणूनाम्' (वाक्य० १।१०८) इति कारिकामताद् वायोरुत्पद्यते। एवं सति 'तमसो मा ज्योतिर्गमय' इत्यौपनिषदी एव पद्धतिः सूक्ष्मेक्षिकया विचारे परिदृश्यते। अणूनां शक्तिस्तु साम्प्रतं विज्ञानवेत्तृभिर्लयरूपकार्यकरणाय प्रत्यक्षं प्रदर्शितैव जापानजये।

यद्यपि मञ्जूषायां नागेशभट्टेन अणूनामित्यस्य शब्दतन्मात्रपरमाणूनामित्यर्थः कृतस्तेनेदमार्हतानां मतमिति प्रतिभाति। तथापि बहुषु स्थलेषु वाक्यपदीयटीकायाम्—"अविक्रियाधर्मकं हि शब्दतत्त्वं ध्वनिं विक्रियाधर्माणम् अनुविक्रियते। तच्च सूक्ष्मे व्यापिनि ध्वनौ करणव्यापारेण प्रचीयमाने स्थूलेन अभ्रसंघातवदुपलभ्यमानेन नादात्मना प्राप्तविवर्तेन तद्विवर्तानुकारेण अत्यन्तमविवर्तमानं विवर्तमानमिव गृह्यते" इत्यादिसन्दर्भेषु शब्दतत्त्वस्य, "ध्वनौ विकृते सत्यभ्रसमूह

इव प्रचीयमाने नादात्मना विवृत्तेऽविवर्तमानत्वं विवर्तमानत्वमिव गृह्यते" इत्याद्युक्तिभिरणूनामित्ययं पक्षोऽपि वैयाकरणविशेषाणामेव न त्वार्हतानाम् । अस्य बीजं तु मयैव "छायातपतमःशब्दभावेन" (वा० का० १ श्लो० १११) इत्यस्य व्याख्यायामुपक्षिप्तम् । तथा च "अणुर्वायुर्वा" इति सूत्रे उभयमपि मतमस्मच्छाखीयमेवेति निर्विवादम्। अत्र शाखापदेन शिक्षा प्रातिशाख्यं निरुक्तञ्च गृह्यते ।

वायोरणूनाम् (वा० १।१०८) इति श्लोके वायुः शब्द इति मते वक्ता यदार्थं बोधयितुमिच्छति तदा एतादृशं प्रयत्नं करोति येन लब्धक्रियो वायुः स्थानमभिहन्ति, तदभिघातानन्तरं शब्दरूपेण परिणमते। यदा हि वायौ वेगः समुत्पद्यते स च प्रचितो घनीभूतो वेगः क्वचित् स्थलेषु संघट्टते तदा महान्तो वृक्षाः किमुत पर्वतादयोऽपि सारवत्यो मूर्तयश्चूर्णीभूता भवन्ति । यदा वंशीवेण्वादौ संघट्टितो वायुर्भवति तदा स एव सुषिरं प्राप्य शब्दीभवति, अन्यथा स्वाश्रयमेव भिन्द्यात्। एतन्मतं प्रातिशाख्यानामिति बहवः, शिक्षाकाराणामिति श्लोकवार्त्तिकटीकायां पार्थसारथिमिश्राः । तथा हि—श्लोकवार्त्तिके शब्दनित्यताधिकरणे (३१८ कारिकातः ३१९–३२० कारिकापर्यन्तम्)—

वक्तव्यश्चैष कः शब्दो नाशित्वेन प्रसाध्यते ।
त्रिगुणः पौद्गलो वायमाकाशस्याथवा गुणः ॥
वर्णादन्योऽथ नादात्मा वायुरूपोऽर्थवाचकः ।
पदवाक्यात्मकः स्फोटः सारूप्यान्यनिवर्तने ॥
एतेषामस्वनित्यत्वं नास्माकं तेषु नित्यता ।

सत्त्वरजस्तमःस्वभावः सांख्यानाम्, आर्हतानां पुद्गलारब्धः, काणादानामाकाशगुणो नादात्मा शङ्खादिविषयः, शिक्षाकारस्य वायुरूपोऽर्थवाचकः, अर्थवाचकरूपेण शब्दात्मना परिणतो वायुरिति यावत्। स्फोटश्च

द्विविधो वैयाकरणाभिमतः, सारूप्यान्यनिवर्तने च सांख्यसौगताभिमते। इत्यर्थिकाभिः कारिकाभिर्मतान्तराणि शब्दविषये उपात्तानि। तत्र हि 'वायुः शब्दः' इति शिक्षाकाराणां मतमिति स्पष्टीकृतम्। अपि च शुक्लयजुःप्रातिशाख्येऽपि वायवीयत्वमेव शब्दानामुपपादितम्।

तथा हि—शब्दस्य कारणभूतो वायुराकाशादुत्पद्यते, तथा च वाय्वात्मकः शब्दः। ननु वाय्वात्मकः शब्दश्चेत्तर्हि वायोः सर्वगतत्वात् सर्वदा सर्वत्र तदुपलब्धिः स्यादिति चेन्न, सम्यक्करणैरुपहितस्य हृदि वेणुशङ्खादिभिः शब्दीभावस्य स्वीकारात्। स एव शब्दीभवन् वायुः पुरुषप्रयत्नेन कण्ठादिस्थानानि प्राप्य वर्णो भवति। "वायोरियं विभूतिर्या त्रयी विद्या" इति च "तेषां समूहात् स उदयंस्त्रैकाल्यम्" (शु० य० प्रा० अ० १ सू० १५) इति सूत्रे भाष्ये उक्तम्। तथा च वायोरियं विभूतिरित्युक्त्या यजुरेव प्राथमकल्पिकं ऋगपेक्षयेति सिध्यति। एतच्च मया निगमागमविवेके विस्तरेण प्रपञ्चितम्, वाल्मीकीयादिकाण्डरहस्ये च। तत एव द्रष्टव्यम्।

तैत्तिरीयप्रातिशाख्ये तु "शब्दः प्रकृतिः सर्ववर्णानाम्" (अ० २२ सू० १) इति सूत्रे—"अनेन वर्णात्मकानां शब्दानामुपादानकारणमुच्यते। अनादिनिधनो विभुरेकः शब्दो ब्रह्मव्यपदेशभाक् सर्वेषां वर्णानां प्रकृतिरुपादानकारणं भवति, स्तिमितवायुरिव तालवृन्तपवनानाम्। तेन

१. व्यक्तिस्फोटो जातिस्फोटश्चेति स्फोटो द्विविध इति (मञ्जूषा० पृ० १८१ टीका कुञ्जिका)। अयं भावः—स्फोटो द्विविधः, आभ्यन्तरो बाह्यश्च। तत्राभ्यन्तरो बुद्ध्यानुसंवृत्तिरूपः। बाह्यस्तु जातिव्यक्तिभेदाद् द्विविधः। सङ्घातवर्तिनी जातिरेव वाचिकेत्याद्यः। एकोऽनवयवः स्फोट इति व्यक्तिस्फोटः।

२. तथा च शुक्लयजुःप्रातिशाख्यसूत्राणि—
"वायुः खात् (अ. १ सू. ६), शब्दस्तत् (७), सङ्करोपहितः (८), स सङ्घातादीन् वाक्" (ए) इत्यादीनि। एतदुपरिष्टात् प्रदर्शयिष्यते।

वायुशरीरसमीरणादीनि पूर्वोक्तानि सर्वाणि कारणानि निमित्तान्येव सन्ति" इत्यादि भाष्यपर्यालोचनया वर्णानामुत्पत्तावभिव्यक्तौ वा शब्द उपादानकारणम्, वाय्वादीनि तु निमित्तकारणानीत्यायाति।

अत एव "अथ शब्दोत्पत्तिः" (अ० २ सू० १) इति सूत्रे भाष्ये द्विविधः शब्दो नित्यः कार्यश्च। तत्र नित्यः सर्वदेशव्यापक एकश्शब्दो ब्रह्मेत्यभिधीयते। तस्मात् कार्यशब्द उत्पद्यते। स व्यक्तः काचित्कोऽनन्तभेदश्च। तत्र वर्णात्मकस्योत्पत्तिरिह व्याख्येयतयाऽधिक्रियत इति भाष्ये नित्यात् शब्दादनित्यस्य वर्णात्मकस्य शब्दस्योत्पत्तिरित्यायाति। तत्रैव "वायुशरीरसमीरणात् कण्ठोरसोः सन्निधाने" (तै० अ० २ सू० २) इत्यादिभिः सूत्रैर्वायोः करणत्वमेव प्रतिपादितम्। एतावता चैतन्मते नहि वायवीयत्वं शब्दानाम्।

ऋक्प्रातिशाख्ये तु 'प्राणो वायुः' (ऋक्प्रा० १३ सू० १) कोष्ठ्यमनुप्रदानमापद्यते। अर्थाद् वक्तुश्चेष्टायां प्राणो वायुः कण्ठस्य खे विवृते संवृते वा कोष्ठ्यमनुप्रदानं श्वासत्वं नादत्वं ता आपद्यते। कण्ठस्य खे विवृते श्वासतां संवृते नादतामित्यर्थः, समे तु श्वासनादोभयात्मताम्। यद्वा प्राणो वायुः कोष्ठ्यं प्रदानमनु कण्ठस्य खे विवृते श्वासतां संवृते नादतां

---

१. ऋक्प्रातिशाख्ये—वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा। आपद्यते श्वासतां नादतां वा वत्क्रीहायाम्। (ऋक्प्रा० १३।१) उभयं वाऽन्तरोभौ। (सू० २) ता वर्णानां प्रकृतयो भवन्ति (सू० ३) प्रयोक्तुरीहागुणसंनिपाते वर्णीभवन् गुणत्वं विशेषयोगात्। एकः श्रुतीः कर्मणाप्नोति बह्वीः। (ऋक्प्रा० १३।१३) एके वर्णान् शाश्वतिकान्न कार्यान् (प० १३ सू० १४) आहुर्घोषं घोषवतामकारमेकेऽनुस्वारमनुनासिकानाम्। (१५) सोष्मतां च सोष्मणामूष्मणाहुः सस्थानेन। (१६) घोषिणां घोषिणैव। (१७) अन्त्योत्पन्नावपरे ऊष्मघोषौ। (१८) शीघ्रतरं सोष्मसु प्राणमेके। (१९) रक्तो वचनो मुखनासिकाभ्याम्। (२०) एतद्वर्णात्मगुणशास्त्रमाहुः। (२१)

समे श्वासनादोभयात्मतामित्यर्थकैः—"प्राणो वायुः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा। आपद्यते श्वासतां नादतां वा", "उभयं वान्तरोभौ" (ऋक्प्रा० १३ सू० २।३), "ता वर्णानां प्रकृतयो भवन्ति" इत्येतैः सूत्रैर्वर्णस्वरूपं वायवीयत्वेन व्यक्तीकृतम्।

पुनश्च तत्रैव—"एके वर्णान् शाश्वतिकान् न कार्यान्" (ऋक्प्रा० १३, १४) इति सूत्रेण नित्यत्वं वर्णानां व्यक्तीकृतम्। तावता एतत्प्रातिशाख्यमतेन नित्यत्वानित्यत्वाभ्यां द्वैविध्यं शब्दानामित्यायाति। अत्रत्यो विशेष उपरिष्टात् प्रदर्शयिष्यते।

अत्रायं निर्गलितोऽर्थः—वायोः, अणूनाम्, ज्ञानस्य च शब्दत्वापत्तिविषये 'वायुः शब्दः' इति शिक्षाविदः, शुक्लयजुःप्रातिशाख्यानुयायिनश्च ब्रुवन्ति। ऋक्प्रातिशाख्यमते तु वायवीयत्वं तद्वैपरीत्यञ्चेति द्विधा व्यवस्थापितम्। तैत्तिरीयप्रातिशाख्यमतेऽपि नित्यत्वं ब्रह्मस्वरूपत्वं चावद्योतितम्। अणोः शब्दतन्मात्रत उत्पत्तिरित्यपरे। 'ज्ञानं शब्दः' इति वैयाकरणाः।

चतुर्थं दलम्

उद्यती क्रियाशक्तिर्नादः

अथ वैष्णवमतम्—उद्यन्ती[1] क्रियाशक्तिर्नादरूपतां धत्ते। श्रियः पतिर्निखिलहेयप्रत्यनीककल्याणैकतानः, स्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपः, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणमहोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपः, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यापरिमितदिव्यभूषणः, स्वानुरूपासंख्येयाचिन्त्यशक्ति-

---

१. आर्षः प्रयोगः, उद्यतीति युक्तम्।

नित्यनिरवद्यनिरतिशयकल्याणदिव्यायुधः, स्वाभिमतानुरूपनित्यनिरवद्यस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणश्रीवल्लभः, स्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणापरिमितसूरिभिरनवरताभिष्टुतचरणयुगलः, वाङ्मनसापरिच्छेद्यस्वभावः, स्वोचितविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्तपरिमाणनित्यनिरवद्याक्षरपरमव्योमनिलयः, विविधविचित्रानन्तभोग्यभोक्तृवर्गपरिपूर्णनिखिलजगदुदयविभवलयलीलः, परं ब्रह्म पुरुषोत्तमो नारायणो ब्रह्मादिस्थावरान्तं जगत् सृष्ट्वा स्वेन रूपेणावस्थितो ब्रह्मादिदेवमनुष्याणां ध्यानाराधनाद्यगोचरोऽपारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः स्वमेव रूपं तत्तत्सजातीयसंस्थानं स्वस्वभावमजहदेव कुर्वंस्तेषु तेषु लोकेष्ववतीर्यावतीर्य तैस्तैराराधितस्तत्तदिष्टानुरूपं धर्मार्थकाममोक्षाख्यं फलं प्रयच्छन्, भूभारावतारणापदेशेनास्मदादीनामपि समाश्रयणीयत्वायावतीर्योर्व्यां सकलमनुजनयनविषयतां गतः, परावरनिखिलजनमनोनयनहारिदिव्यचेष्टितानि कुर्वन् पूतनाशकटयमलार्जुनारिष्टप्रलम्बधेनुककालियकेशिकुवलयापीडचाणूरमुष्टिकतोसलकंसादीन्निहत्य अनवधिकदयासौहार्द्रानुरागगर्भावलोकनालापामृतैर्विश्वमाप्याययन्, निरतिशयसौन्दर्यसौशील्यादिगुणगणाविष्कारेणाक्रूरमालाकारादीन् परमभागवतान् कृत्वा पाण्डुतनययुद्धप्रोत्साहनव्याजेन परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगमवतारयामास । स एव भगवान् नारायणः स्वीयया स्वातन्त्र्यशक्त्या लक्ष्म्यपरनाम्न्या क्लिष्टतनुर्मम कल्याणं विधत्ताम्। इमाञ्च व्याकरणदर्शनपीठिकां स्वावासयोग्यां विदधातु ।

नादाद् बिन्दुः

तथा चात्र पूर्वसूत्रानुसारं तदाश्रितानां वैष्णावानां मतं शब्दविषये प्रदर्श्यते । तत्र शुद्धसंविन्मयी विष्णोः क्रियाशक्तिः परापदेनोच्यते । तत्र

यः प्रथम उन्मेषो भगवतः स एव भाव्यभावकभेदेन द्वैविध्यं भजते। तस्य भगवतो यः संकल्पः सैव क्रियाशक्तिः, तस्या एव पर्यायाः—सामर्थ्यं योगो महायोग इत्यादयः सन्ति। तत्र भाव्यो य उन्मेषः स भूतिरिति कथ्यते। एकस्य भगवतो नारायणस्य क्रियाशक्तेर्मन्त्रमयी स्थितिरुच्यते। सैव क्रियाशक्तिरुद्यती सती नादरूपतां धत्ते। स एव नादो दीर्घघण्टानदोपमः समाधौ योगिभिरनुभूयते। स नाद उन्मेषं प्राप्तो बिन्दुर्भवति।

स च द्विधा

स च बिन्दुर्नामनामिभेदेन द्विधा भिद्यते। तत्र नामरूपेणोदयं प्राप्य शब्दब्रह्मपदेनाभिधीयते, नाम्युदयो भूतिः, नामिरूपेणोदिता भूतिरुच्यते।

पुनरपि द्विधा

प्रकृते सा बिन्दुमयी शक्तिर्वर्णरहिताऽप्यनुत्तररूपेण स्थिता स्वरव्यञ्जनभेदेन द्विधा व्यवस्थिता भवति। तथा हि—सा बिन्दुमयी शक्तिर्लक्ष्म्याः शब्दसर्गमयी तनुर्विसृष्टाख्या परा एकाऽप्यनेकविचित्रार्था नानावर्णविकारयुक्ता सोमस्वरूपा स्वरव्यञ्जनरूपेण विवर्तते। तस्या 'अ' इत्युन्मेषोऽनुत्तरपदेनोच्यते। अयमेवैकः सर्वा वाग् अकारस्तत्तदाकारभेदभाक् समुज्जृम्भते। स एव इच्छन् इ, उन्मिषन् उरिति स्मृतः। एत एव त्रयो वर्णाः सर्वेषां स्वराणां मूलभूताः। अनुत्तर आनन्दः सन् आभावं प्रतिपद्यते। इच्छन्निरीशानः सन् ईभावं प्रपन्नो भवति। उन्मिषन्नु ऊरूपं ऊभावं प्रतिपद्यते। अकारेकारयोः संयोगादेकारो नाम जायते, अकारात्पर एकार ऐकारमापद्यते। अकारात् पर उकारः संधानेन ओकारो भवति। अकारात् पर ओकार औभावमाप्नोति। एते चत्वारः सन्ध्यात्मानः कूटा उच्यन्ते। स एव पूर्वोक्तरीत्या निष्पन्न एधमान ए इति स्मृतिः। एवम् ऐश्वर्यवान् ऐकारः, सर्वत्र ओतप्रोत

ओकारः, और्जित्यादौकारः। अकारस्य रेफस्य च यस्तृतीयो भागस्तयोर्ऋद्ध्या ऋस्मृतः। एवम् अलयोस्तृतीयभागयोर्ऋद्ध्या लकारो नाम जायते। अनया रीत्या कुण्डलिनी शक्तिर्नानाकारं धारयति। सा च चतुर्दशस्वररूपेण विवर्तमाना तिष्ठति।

सा क्रियाशक्तिः शब्दात्मना विवर्तमाना सृष्टिं याति। पुनरपि संहर्तुं विसृष्टिं याति। सैव क्रियाशक्तिर्मूलाधारात् समुद्यती शान्ता निरञ्जना च भवति, यदाञ्जितुमिच्छति तदाञ्जनैस्तैस्तैः संस्कारैर्द्रष्टृदृश्यभावं प्राप्य शब्दार्थरूपेण विवर्तमाना नाभावुदयं प्राप्य योगिभिर्द्रष्टुं शक्यते। यां धिया प्राप्य योगिनोऽधिकारक्षयं यान्ति। सा एव पश्यन्ती शक्तिः क्रियामयी भावं संस्कारैः संस्कृत्य सङ्गता अर्था यस्यां सा भृङ्गीव निनदन्ती हृत्कमले विस्तृतिं प्राप्नोति। सैव कण्ठदेशेऽकारोत्तरा 'ह' इति रूपं धत्ते।

अथ स्वराः

स्वराणां भेदाः साम्प्रतमुच्यन्ते। तत्र यद् अकारादित्रयं स्वरकूटस्थमुक्तं तदष्टादशधा प्रत्येकं ह्रस्वाद्युदात्ताद्यनुनासिकादिभेदेन विभज्यते। स्वरव्यञ्जनकूटौ यौ ऋकारलृकारौ तयोर्ऋकारोऽष्टादशभेदः। लृकारस्तु द्वादशभेदः। अ, इ, उ, ऋ, ऌ, ए, ओ, एते सप्त स्वराः सूर्यकिरणाः,

१. अर्थाद् अकारस्य भागत्रयं विधाय तञ्च भागं वर्धयित्वा रेफस्य च भागत्रयं विधाय तमपि वर्धयित्वैकमात्रां सम्पाद्य ऋकारः स्वरः सम्पादनीयः। तथा हि—मध्यमायां वृत्तौ द्वादशपलात्मिकायां योऽकारस्य तृतीयो भागश्चतुष्पलात्मकस्तं वर्धयित्वाष्टपलात्मकं सम्पाद्य रेफस्य च यस्तृतीयो भागः पलद्वयात्मकस्तमपि चतुष्पलात्मकं कृत्वा संयोज्य मध्यमावृत्तिस्थं द्वादशपलात्मकमेकमात्रमृकारं विश्रावयेत्।

२. तथा च सकारादिमयी ककारान्ता व्यञ्जनशालिनी सृष्टिं याति। अकारमयी बिन्दौ लीना संहृतिं गच्छति। अर्थात् विसर्गः सृष्टिपदेनोच्यते, बिन्दुश्च लयपदेनोच्यते।

आ, ई, ऊ, ऋ, ऌ, ऐ, औ, एते सप्त सोमकिरणाः। पिङ्गलया स्वरैश्चरन् सूर्यो दिवसं सृजति।

स्वरैः सप्तभिरिडया चरँश्चन्द्रो रात्रिं सृजति। स्वराणां या कूटस्था विष्णोः परा शक्तिः सा सुषुम्णया सञ्चरते शब्दब्रह्म वितन्वती सती।

अथ व्यञ्जनानि

अथ व्यञ्जनसृष्टिः—अनुत्तरोऽकार उत्तरो यस्याः सा 'ह' इति सृष्टिरादिव्यूहस्य वासुदेवस्य तनूः। असौ बिन्दुयुक्तो हकार आदिमं आधारं रुन्धन् योगारम्भे योगिनां साग्निं नादं दीपयते, सृष्टियुक्तोऽसौ अच्युतः 'हं' इति ऊर्ध्वसृष्टिं करोति। अर्थाद् बिन्दुयुक्तो 'हं' इत्येवंरूपः सन् ऊर्ध्वसृष्टिं नाम स्वरसृष्टिं करोति। अयं च 'ह' इत्येवंरूपः सृष्टियुक्तो विसर्गयुक्तो ह इति यावद् बहिःसृष्टिं व्यञ्जनसृष्टिं करोतीत्यर्थः। तथा च 'ह' इत्यस्माद् वक्ष्यमाणया रीत्या चत्वार ऊष्माणः समुत्पद्यन्ते। हात् सः, ततः षः, ततः शः। एतच्चतुष्टयं चतुर्ब्रह्मशब्दाभिधेयम्। क्षेण कूटेन संयोगात् पञ्चब्रह्मशब्दवाच्यम्। अन्ये तमेव कषकूटं वदन्ति। अनया रीत्या ऊष्मणां वर्णानामुत्पत्तिस्तत्रोक्ता।

---

१. अहिर्बुध्न्यसंहितायां षोडशाध्याये—

अनुत्तरोत्तरा सृष्टिर्या सा हेति पुरोदिता।
आदिव्यूहस्य देवस्य वासुदेवस्य सा तनूः ॥८०॥
अच्युतो बिन्दुयुक्तोऽसौ रुन्धन्नाधारमादिमम्।
साग्निं दीपयते नादं योगारम्भे तु योगिनाम् ॥८१॥
अच्युतः सृष्टियुक्तोऽसावूर्ध्वसृष्टिं करोति च।
अच्युतः सृष्टियुक्तस्तु बहिः सृष्टिं करोत्ययम् ॥८२॥
अन्तःस्था इति च प्रोक्ता अन्तःस्थपुरुषेशयाः।
अवस्था इति च प्रोक्ता ईशावतरणक्रमे ॥८७॥

अथान्तःस्थानामुत्पत्तिरुच्यते, शाद् वः समुत्पद्यते तस्माद् ल उदेति। लकाराद् र आविर्भवति। राद् यो जायते। विश्वस्य धारणात् सा धारणापदव्यवहार्या। अन्तःस्थपुरुषेशयत्वाद् अन्तःस्थापदवाच्यास्त एव चत्वारो वर्णाः। ईशावतरणक्रमे सा एव अवस्थाऽप्युच्यते।

अथ मकरोत्पत्तिः—मकरादीशशक्तिस्थान्मकारः समुपजायते। अकारोत्तरो बिन्दुर्म इति प्रतिशब्द्यते। सा एव सर्वेषां चेतनानां समष्टिर्निगद्यते। अयमेव मकार उत्तमपुरुषपदव्यपदिष्टश्च भवति। तस्मादेव मकराद् भोक्तुर्भोग्या प्रकृतिर्भकार उत्पद्यते। स च प्रकृतिवाचकः। तस्मादेव मकारात् प्रकृतेर्वकारो बुद्धितत्त्वमुत्पद्यते। तस्माद् बुद्धितत्त्वाद् बकारात् फकारोऽहङ्कृतितत्त्वमुत्पन्नम्। तस्मादहङ्कारात् फकाराद् पकारो नाम मनस्तत्त्वं सञ्जायते। तस्मादेव मनस्तत्त्वात् पकाराद् नकारो नाम श्रोत्रेन्द्रियं जायते। ततश्च धकारो नाम त्वगिन्द्रियं सम्पद्यते। तस्माद् धकारात् त्वगिन्द्रियाद् दकारो नाम चक्षुरिन्द्रियमभिव्यज्यते। दकाराच्चक्षुरिन्द्रियात् थकारो नाम रसनेन्द्रियं भवति। रसनेन्द्रियात् थकारात् तकारो नाम घ्राणेन्द्रियं लब्धसत्ताकं भवति। तथा च तवर्गस्य ज्ञानेन्द्रियवाचकत्वं समायाति।

अथ कर्मेन्द्रियोत्पत्तिः। णादित्यन्तं कर्मेन्द्रियं तस्य टवर्गस्य कर्मेन्द्रियवाचकत्वं च। आदि चान्तं तन्मात्रपञ्चकम्। अतस्तस्य तन्मात्रवाचकत्वम्। ङादिः कान्ता वर्णसंहतिः पञ्चमहाभूतवाचिका। लस्यैव दुःस्पृष्टत्वेनोच्चारणे लकारो नाम जायते[1]।

---

१ २ ३ ३ ३ ४ ४ ५ ५ ६ ६ ७ ७
१. अ आ इ ई उ ऊ ए ऐ ओ औ ऋ ॠ ३ ऌ ॡ ३

ह स ष श क्ष व ल र य म भ ब फ प न ध द थ त ण ढ ड ठ ट ञ झ ज छ च ङ घ ग ख क ळ।

"चतुस्त्रिंशदिति प्रोक्ता वर्णास्ते व्यञ्जनात्मकाः" इत्युक्त्या ळकारस्य नहि

एते चतुर्दश स्वराः सर्गबिन्दुयुक्तत्वेन केवलत्वेन च त्रिधा भिद्यन्ते। अत एषां चतुरुत्तराशीतिभेदभिन्नानां द्विपञ्चाशदधिकशतद्वयं भेदाः सम्पद्यन्ते। त एव स्थूलसूक्ष्मपरभेदेन षट्पञ्चाशदधिकसप्तशतीभेदा भवन्ति। एषामेव चतुस्त्रिंशता व्यञ्जनैः सङ्कलनया चतुरधिकसप्तशत्युत्तरपञ्चविंशतिः सहस्राणि भेदा भवन्ति। अनया रीत्या एषां भेदा असंख्येया इति प्रकृते नास्ति कोऽप्युपयोगः। अपि चात्र [1]अहिर्बुध्न्यसंहितायां पञ्चविंशतिं स्पर्शान्, चतस्रोऽन्तःस्थाः, चतुरूष्माणः, क्षकारं बिन्दुम् अनुस्वारं च व्यञ्जनवर्गे इमान् षट्त्रिंशतं वर्णानुक्त्वा चतुर्दशस्वरांश्चोद्दङ्क्य पञ्चाशतो वर्णानां सत्ता प्रतिपादिता।

साम्प्रतमनेकभेदभिन्नान् वर्णाननुपन्यस्य केवलं तत्र तत्र स्वरव्यञ्जनवर्गयोः क्रमभेदमेव प्रदर्शयामि।

तत्र पूर्वमस्यामहिर्बुध्न्यसंहितायां षोडशेऽध्याये स्वराः चतुर्दश व्यञ्जनानि चतुस्त्रिंशदित्युक्तम्। तत्र व्यञ्जनविषये पञ्चविंशतिः स्पर्शाः, चतस्रोऽन्तःस्थाः, चत्वार ऊष्माणः, क्षकार इति चतुस्त्रिंशत्संख्या

व्यञ्जनमध्ये, "चतुर्दश स्वराः" इत्युक्त्या च नापि स्वरमध्ये गणनास्ति। तथा चैतन्मतेऽष्टचत्वारिंशदेव वर्णाः।

स्वरेष्वपि समालोचनया ऋकारलृकारावपि स्वरव्यञ्जनांशसम्भूतावेव वर्णावेतन्मते। एकारैकारौ ओकारौकारौ च सन्धिजावेव वर्णा इति। वास्तविकास्त्रय एव स्वराः। तेषामेव च दीर्घत्वेऽपरेऽपि त्रयो दीर्घा व्यवहारपथे समापतन्ति। तथा च षडेव ते गणनायां स्वीकार्याः।

१. यदादित्रितयं पूर्वं स्वरकूटस्थमीरितम्। अष्टादशविधं तत्तु प्रत्येकं योगिनां मतम्॥ स्वरव्यञ्जनकूटौ यौ ऋऌ इत्युदितौ पुरा। आद्योऽष्टादशधान्त्यस्तु तयोर्द्वादशभेदवान्॥ इति स्वराणां पञ्चानामशीतिश्चतुरुत्तरा। स्वरकूटास्तु चत्वारो ये तेषामीदृशी भिदा॥ (अहि० सं० १६।६८–७०)।

संघटते। परं लस्यैव कारणान्यत्वे लकारो नाम जायते (अहि० १६।९५) इत्युक्त्या अयं लकारोऽपि यदि संख्यातव्यस्तदा तु पञ्चत्रिंशद् वर्णा भवेयुः। ग्रन्थकारस्तु लकारसत्तां मन्यमानोऽपि नहि परिगणयति स्वरेषु व्यञ्जनेषु वा लकारम्।

यद्यपि षोडशाध्याये पूर्वोक्तपद्धत्या अष्टचत्वारिंशदेव वर्णाः प्रतिपादिताः सन्ति। तथापि सर्वेषां मूलभूतौ बिन्दुविसर्गावपि कुत्रचित् सन्निवेशनीयावेव।

एवं सति वक्ष्यमाणसप्तदशाध्यायेन सह संवादः साधु सम्भवेत्। तत्र सप्तदशाध्याये स्वरप्रकरणे अकारम्, आकारम्, इकारम्, ईकारम्, उकारम्, ऊकारम्, ऋकारम्, ॠकारम्, ऌकारम्, ॡकारम्, एकारम्, ऐकारम्, ओकारम्, औकारम्, ओङ्कारम्, अङ्कारम्, अःकारम् इत्यनया रीत्या सप्तदशवर्णाः स्वरवर्गे गृहीताः सन्ति। व्यञ्जनेषु ककारमारभ्य क्षकारपर्यन्तं चतुस्त्रिंशद् वर्णाः स्वरूपतो निर्दिष्टा विद्यन्ते। बिन्दुविसर्गा इतीमौ द्वावपि प्रतिपादितौ स्तः। एवं सति षट्त्रिंशद् व्यञ्जनानि अस्मिन् प्रकरणे समायान्ति।

चक्रमध्यस्था मातृका तु ओङ्कारेणापि युक्ता निर्दिष्टास्तीत्यनेन ओङ्कारोऽपि पञ्चाशद्वर्णव्यतिरिक्तोऽङ्गीक्रियते। एवं पद्मेऽपीयमेव पद्धतिः स्वीक्रियते। उभयत्र शक्तिपदेन बिन्दुविसर्गयोर्ग्रहणं कर्तव्यम्।

अस्यां स्थितौ विरोधपरिहारार्थं पञ्चाशद्वर्णसंहतिरिति प्रसिद्धे रक्षणार्थञ्च बिन्दुविसर्गयोः स्वरमध्ये व्यञ्जनमध्ये वा गणना कार्या यथाकार्यम्। अर्थाद् एतौ स्वरौ व्यञ्जने वा मन्तव्यौ। अत्रत्यं रहस्यं तु पूर्वमेव मया प्रस्फोरितम्।

पञ्चमं दलम्

उद्यती क्रियाशक्तिर्नादः

इतः पूर्वं वैष्णवतन्त्रानुसारं वर्णा निर्दिष्टाः। अधुना शैवशाक्ततन्त्रानुसारं ते निर्दिश्यन्ते। अत्र भवद्भिरेतन्नैव विस्मर्तव्यं यन्निगमादपि पूर्वमागमा आसन्, यतो हि प्रतिकल्पमाद्ये त्रेतायुग एव त्रयी समुद्भवति। (एतदर्थं निगमागमविवेको[1] द्रष्टव्यः)। तस्मिन्नागमे वेदेषु कचन कचन कृतसञ्चारे चिरान्नाशं नीते एते तान्त्रिकाः श्रुतिपरम्परया तानि तानि तन्त्राणि प्राणैषुः। एषां वेदादर्वाचीनत्वं विषयदर्शनेनैव स्थिरीक्रियते।

यदा हि साधका गुरूपदिष्टपद्धत्या योगं योक्तुं प्रारभन्ते, तदा कियत्कालानन्तरं समाधेराभासं प्राप्य प्रायस्ते उन्मत्तप्राया भवन्ति। यतो हि साम्प्रतिका गुरवोऽपि नैवागमप्रक्रियां बुध्यन्ते। आगममार्गेऽभ्यासिनां कृते नहि कालस्यापेक्षा समुन्मिषति। तेषां सम्प्रदायस्य आभासः "योगं च तं योग्यतमाय तस्मै तपःप्रभावाद् वितितार सद्यः" इत्यनेन किरातार्जुनीये परिदृश्यते, "दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्" इत्यनेन गीतायां च। तथा च तस्मिन्नेव समाध्याभासे भगवाञ् शनैः शनैः स्वात्मानं प्रकाशयितुं दयते। तदा चिदानन्देच्छाज्ञानक्रियात्मिकाः पञ्च शक्तयोऽभेदेन भासन्ते। तां च प्रकाशरूपां चिच्छक्तिं स्वातन्त्र्यापरपर्यायामानन्दशक्तिम् आमर्शात्मिकां ज्ञानशक्तिं सर्वोपकारोपयोगिनीं च क्रियाशक्तिमनुभवन् साधकः स्वात्मनि चिरं माद्यति। तदानाहतं शब्दं शृण्वँस्तेजोविशेषं च पश्यन् साधकोऽनुत्तरस्वरूपं द्रष्टुमारभते। तदा परैव चिच्छक्तिरानन्दं समुद्भासयन्ती

---

१. अत्रैव समाप्तौ द्वितीयपरिशिष्टत्वेन स्थाप्यते पूर्वं मुद्रितोऽप्येतन्नामको निबन्धः।

अपरा अपि शक्तीर्बहिरुल्लासयितुं प्रारभते। तत्रादावनुत्तराख्यः[1] प्रकाशो बिन्दुः स्वातन्त्र्यात्मके विमर्शाभिधे विसर्गे परिणमते। तथा च बिन्दो रूपद्वयम्—अकारोऽनुस्वारश्च। एवं विमर्शस्यापि द्वयी वृत्तिः—विसर्गो हकारश्चेति। एतौ चाकारहकारौ अविभक्तभावेन शिवशक्त्यात्मकौ साधकानां मानसे सदावभासेते। स एवानुत्तरोऽकार आनन्दशक्तिमभिव्यञ्जन् आकाररूपं धत्ते। एवं च शिवशक्त्योः संघट्ट एवानन्दः। यदा च तस्य सिसृक्षातः परामर्शः समुदेति, तदा सैवेच्छाशक्तिरिकारः। यदा सैवेच्छाशक्तिर् ईशित्वमवभासयितुं समुन्मिषति, तदा दीर्घ ईकार आविर्भवति। यदा परामर्शो ज्ञानशक्तित्वेन अन्तर्ज्ञातुमिष्टस्य विश्वस्य उन्मेषरूपं धारयति तदा उकारः समुदेति। स एव उकारो यदा ज्ञानापेक्षया ज्ञेयरूपांश उद्रिक्तो भवति, तदा ज्ञेयस्याधिक्याद् ज्ञानरूपतायामूनत्वस्याभासो जायत इति षष्ठस्वररूपे ऊकारे परिणतो भवति।

तथा चैतदेव विमर्शात्मकं परामर्शषट्कं बीजपदेनोच्यते। एषां प्रमेयेण संघर्षे निखिलपरामर्शोदयो भवति। तथा चोक्तम्—"स्वराणां षट्कमेवेह मूलं स्याद् वर्णसन्ततौ" (तन्त्रा० ३।१८४-१८५) इति।

---

१. अथ प्रकाशत्वरूपस्य बिन्दोः प्रकाशेनैव सर्वं प्रकाशते। तत आविर्भूतायाः पश्यन्त्यास्तस्मिन् बिन्दौ प्रतिबिम्बितत्वम्। यथा नैयायिकानां मते शब्दात् शब्दान्तरमुत्पद्यते, न तथा आगममते शब्दजः शब्दः। किन्तु यथा मुखस्य दर्पणादौ प्रतिबिम्बमस्ति, तथास्य मुख्यस्य शब्दस्य नभसि प्रतिबिम्बरूपेण स्थितिः। यथा दर्पणसंमुखीभाव एव मुखस्य तत्र प्रतिबिम्बं गृह्यते, तथैव यत्र श्रोत्राकाशस्य सान्निध्यं तत्रैव श्रोत्राकाशरूपे नभसि तस्य प्रतिबिम्बं दृश्यते। तथा चास्यां संविदि सर्वं विश्वं प्रतिबिम्बीभवति। स्वातन्त्र्यं हि विमर्शः। स चास्य प्रकाशस्य मुख्यः स्वभावः। नहि निर्विमर्शः प्रकाशः सम्भवति। तत्रादावनुत्तराख्य इत्यादि।

अ आ इ ई उ ऊ इति (स्वराः षट्) "शक्तयोऽस्य जगत् सर्वम्" (तन्त्रा० ३।१४३ टीका) इत्युक्तरीत्या सर्वं जगदस्यैवानुत्तरस्य शक्तिरित्यनेन अग्निरूपा रेफात्मिका पृथिवीरूपा लकारश्रुत्यात्मिका च येयं विद्युदिवावभासमाना द्विविधा शक्तिः, तस्या यदपृथग्भावेनावभासनं तेनेयमिकाररूपा अक्षुब्धा, क्षुब्धा च दीर्घेकाररूपा इच्छाशक्तिश्चतुर्विधा भवति। तथा च रेफलकारोभयच्छायाधारित्वाद् ऋ ॠ ऌ ॡ इत्येतद् वर्णचतुष्टयं सञ्जायते। तच्च "ऋ ॠ ऌ ॡ चतुष्कं च नपुंसकगणस्तथा" (तन्त्रा० ३।७८ टीका, पृ० ९०) इत्याद्युक्तरीत्या नपुंसकत्वेन व्यपदिश्यते।

यद्यपीच्छाशक्तेः सकाशादिष्यमाणसंघट्टेन अन्यस्य परामर्शस्य (वर्णस्य) उदयो भवति, तथापि ज्ञानशक्तौ ज्वलनधरादिकस्य सर्वस्य ज्ञेयस्य विभवस्थानत्वेऽपि न वर्णोत्पत्तिस्थानत्वम्। तथा च इच्छाशक्तावुत्पन्नस्य पदार्थस्य ज्ञानशक्तावभिव्यक्तिः। क्रियाशक्तौ तु बहीरूपेण पदार्थस्फुरणमिति सिद्धम्। अतो ज्ञानशक्तौ ज्ञेयस्य नापूर्वतया उत्पत्तिरिति न तत्र ज्ञानशक्तौ ज्ञेयस्य समापत्त्या वर्णान्तरोदयः। यद्यपि सर्वभावाधारत्वात् तस्यामपि सर्वे भावाः सम्भवन्ति, तथापि तेषां संविद्रूपतयावस्थानं न तु विभिन्नरूपतया। यथाकाशादिषु क्षोभः सञ्जायते, तेन क्षोभेण ऐकारादयो वर्णा उत्पद्यन्ते, न तथा ऋकारादिषु कश्चन क्षोभ उदेति, येन वर्णान्तरोत्पत्तिः संभवेदिति न तेषां बीजत्वम्। यथा हि अकारादयः कादिषु ऐक्यमासादयन्ति, न तथा ऋकारादिषु ऐक्यमासाद्य क्षोभाधारत्वं व्यवस्थापयन्तीति न तेषां योनित्वमपि। तदेवोक्तम्—"आत्मन्येव हि विश्रान्त्या तत्प्रोक्तममृतात्मकम्" (तन्त्रा० ३।९२, पृ० १०१) इति। यथा अकारस्य आकारस्य वा इकारेण ईकारेण वा मिश्रणे ए इति रूपं जायते; एवं तयोर् उकारेण ऊकारेण वा योगे ओ

इति रूपं जायते। तथा एषां चतुर्णां न केवलमन्येन संघट्टे वर्णान्तरोदयः, किन्तु परस्परमपि संघर्षे।

अधुना अकारेकारयोः संयोगे ए इति रूपसिद्धिः प्रकटीक्रियते। तथाहि—अयं बिन्दुर्यदा स्फुटितो भवति तदा विसर्गः संपद्यते। तथा च ∴ एवम् इकाररूपे सञ्जाते परस्परं सम्मेलनेन[1] △ एतादृशम् एकार-

---

१. तस्मिन् समये एकारस्य ईदृशी लिपिरासीदिति सिद्धम्। अत्रायं निर्गलितोऽर्थः—आत्मन्येव विश्रान्त्या इच्छाशक्तेर् ऋ ॠ ऌ ॡ इति रूपचतुष्टयात्मकत्वाद् अमृतस्वरूपत्वम्। तथा क्षोभान्तरस्याभावान्नेदं चतुष्टयं कस्यचिद् बीजम्। यो हि स्वात्ममात्रविश्रान्तः स नान्यस्य बीजभावमापद्यते, क्षोभान्तरानुल्लासकतया स्वकार्याकरणात्।

नन्वेषां यदि बीजत्वं नास्ति, तर्हि योनित्वं स्यादिति शङ्कायां तत् परिहारार्थम्—"प्रक्षोभकत्वं बीजत्वं क्षोभाधारश्च योनिता" (तन्त्रा० ३।८२) इति बीजयोन्योर्लक्षणेन एतच्चतुष्टयस्य तल्लक्षणानाक्रान्ततया बीजयोनिवैलक्षण्यमभ्युपगन्तव्यम्। तथा चायमत्र सारांशः—

यो हि वर्णोऽन्यस्य वर्णस्य कारणं भवति, स एव बीजपदेन व्यपदिश्यते। यश्च वर्णो नान्यस्य वर्णस्य कारणम्, किन्तु बीजाधारतां धत्ते, स योनिपदेनोच्यते। यस्मिन् वर्णे नाधारता नापि वर्णान्तरजनकता, तस्य बीजयोनिवैलक्षण्यमवसेयम्। एवं च अ आ इ ई उ ऊ इत्येतेषां बीजत्वं प्रतिपन्नाः ककारादयो योनयः, ऋ ॠ ऌ ॡ इत्येतच्चतुष्टयमुभयविलक्षणमिति। कादयो वर्णाः स्वरं विना स्थातुं नार्हन्ति क्षोभाधारतां च भजन्ते, अतस्ते योनयः। अकारादिषट्कं तु वर्णान्तरकारणम्, अन्यवर्णसाहाय्यं विना च स्थातुं शक्नुवन्तीति तानि बीजानि। विशेषविवरणं तु तन्त्रालोकादौ द्रष्टव्यम्। तथा चोक्तं तन्त्रालोके—

योऽनुत्तरः परः स्पन्दो यश्चानन्दः समुच्छ्वसन्।
ताविच्छोन्मेषसंघट्टाद् गच्छतोऽतिविचित्रताम्॥

रूपं संपद्यते। यदा चानुत्तरानन्दशक्ती वृद्धिं प्ररोहं वा प्राप्ते भवतः, तदा एकारेण योगे ऐकारः सम्पद्यते।

अयमर्थः—अनुत्तरस्य अकारस्य रौद्री ज्येष्ठा वामेति शक्तित्रयात्मकत्वेन आनन्दस्यापि तत्स्फाररूपत्वाद् अकारस्य त्रिकोणरूपत्वाद् एकारेण त्रिकोणेन योगे ऐकारः षट्कोणः सम्पद्यत इति। यद्यपि प्राचीनलिपिष्वपि ऐकारः षट्कोणो नास्ति, तथापि प्राचीनलेखेऽपि षष्ठशताब्द्याम् ∇ अनया रीत्या ऐकारो लिखितोऽभवत्। तत्र द्विरावृत्तिः कर्तव्या इत्येवाभिप्रायस्तस्य एकारोपरिस्थितस्य ' ' इत्येवं सङ्केतस्य। तथा च एकारस्य △ इत्याकारकस्य द्विरावृत्तौ इत्याकारकः षट्कोणः सम्पद्यत इति रहस्यं तन्त्रविदाम्। एवमेव यदा अनुत्तरानन्दशक्ती उन्मेषेण उकारेण सह सन्धिभावं गत्वा ओकारात्मतां प्राप्नुतः, तदा परस्परमनुत्तरानन्दौ ओकारात्मना सम्भूय क्रियाशक्तेर् औकाररूपं प्रकाशयतः।



यथा च क्रियाशक्तेः सन्ध्यक्षरेषु ए ओ ऐ औ इत्येतेषु यथाक्रमम् अस्फुटम्, स्फुटम्, स्फुटतरम्, स्फुटतममिति रूपमस्ति, यथा वा इच्छोन्मेषशक्तिभ्याम् इकारोकाराभ्याम् अनुत्तरानन्दयोः संघट्टे एकार ओकारश्च सम्पद्येते, तथा ईशानतोनताभ्याम् ईकारोकारलक्षणाभ्याम् अनुत्तरानन्दयोः संघट्टे कथं न वर्णान्तरोदयः।

तत्र समाधीयते—अनुत्तरानन्दाख्ये शक्ती यथा इकारोकाराभ्यां संघट्टे रूपान्तरं प्राप्नुतः, न तथा ईकारोकारयोः संघट्टे, स्वाभाविकत्वात्। अयमेवानुत्तरानन्दात्मा संविन्नाथः शक्तिविशिष्टः शिवः

अनुत्तरानन्दचिती इच्छाशक्तौ नियोजिते।
त्रिकोणमिति तं प्राहुर्विसर्गामोदसुन्दरम्॥
(तन्त्रा० ३।९३, पृ० १०२)

स्वात्मनो भेदेन यत् प्रेरयते तेन तत्र स्वतन्त्रत्वादनेकरूपतां धत्ते। यदि महेश्वरो नियतरूपेणावतिष्ठेत तदास्य घटादिवद् महेश्वरत्वं न स्यात्। एतदेवास्य महेश्वरत्वं संविद्रूपत्वं च यन्नानारूपेण परिस्फुरणम्। परिच्छिन्नप्रकाशत्वमेव हि जडस्य लक्षणम्, अपरिच्छिन्नप्रकाशत्वं तु ज्ञानस्य। अनेकाकारतया परिस्फुरणे समुद्रस्य तरङ्गा इव स्वात्मभूता इच्छाद्याः शक्तयः स्वात्मसंघट्टेन (परस्परलोलीभावेन) तत्तद्ग्राह्य-ग्राहकात्मना तत्तत्परामर्शात्मना परिस्फुरन्ति। अशुद्धाधिष्ठात्रीणां घोरतराणामपि शक्तीनामियमेव निमित्तम्। अघोरादीनां हि शक्तीनामिच्छाशक्तेर्ज्ञानशक्तेश्च जन्म। तथा च अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ इत्यत्र स्फुटीभूतेच्छाज्ञानक्रियाशक्तिके अस्मिंश्चतुर्दशे औकारे त्रिशूलत्वव्यवहारः। तदानीम् ईदृश औकारः त्रिशूलाकार आसीत्। तस्यैव परिवर्तितं रूपम् ॐ एतादृशम्। तथा च ऋकारादारभ्य औकारपर्यन्तं यद् वर्णाष्टकं तत् प्रतिवर्णं ब्राह्मी-माहेश्वरी-कौमारी-वैष्णवी-वाराही-इन्द्राणी-चामुण्डा-योगेश्वरीति देव्य-ष्टकस्य वाच्यत्वेन चतुःषष्टिरूपतया परिस्फुरति। तदेवं क्रियाशक्ति-पर्यन्तेन वैचित्र्येण स्फुरन्त्याः संविदः स्वरूपलोपो न जात इति सैव संवित् स्वकीयरूपं न जहाति। अतः अं इति पञ्चदशः स्वरस्तत् सूचयति।

इदं हि तत्त्वम्—योऽसौ बिन्दुः स तत्परामर्शतामुल्लिासयिषुर्नादा-त्मकशब्दरूपतया स्फुरति (स्वाभेदेन विश्वं परामृशतीति शब्दः)। स एव पराबाग्रूपो विमर्शः। स च नादात्मकः (नदति सर्वेषामेव जीवकलात्वेन परिस्फुरतीति नादः = शब्दः) हकारार्धार्धरूपिणी अमा कला सर्वत्र अस्वरत्वेन व्यपदिश्यते, "सा स्त्री भाषाऽक्षराऽस्वरा" इत्यादौ। तथा च स्वयं प्रकाशरूपः चन्द्रसूर्याग्निषु यः प्रकाशो ह्लादतीक्ष्णतादाहकत्वरूपः सतरक्तनानावर्णरूपश्च, स तस्मादेव प्रकाशा-दुदेति। तथा चोक्तं गीतायाम्—

न तद् भासयते सूर्यो न शशाङ्को न पावकः।
यद् गत्वा न निवर्तन्ते तद्धाम परमं मम॥ इति।

(भ० गी० १५।६)

सूर्यस्य प्रकाशमात्रमेव रूपम् इत्यस्य प्रमाणत्वम्। चन्द्रस्याह्लादमयत्वसंपादनेन मेयत्वम्।

तथा च सूर्यसोमयोर्ज्ञानक्रिययोः संघट्टेन मातृमेयात्मनोऽग्नेरुदयः। अग्नौ हि दाहकत्वं दाह्यत्वं चास्ति। यथा हि यदाग्निर्ज्वलति तदा तस्मिन्नग्नौ काष्ठादिकमपि भवति। अन्यच्च दाहकत्वं तत्र वर्तते, येन तत् काष्ठादिकं दह्यते, वैद्युतेऽप्यग्नौ ताम्रादेः काष्ठस्थानीयस्यापेक्षणात्। यावत्पर्यन्तं तादृशं ताम्रं तिष्ठति तावत्पर्यन्तं वैद्युतोऽग्निरपि तत्र वर्तते। अन्यथा बुध्यते (निर्वातीत्यर्थः)। एषां बीजानां प्रथमं यदक्षुब्धं रूपम् एकमात्रात्मकम्, तद् ह्रस्वं प्रकाशमात्रप्राधान्यात् सूर्यपदेन व्यवह्रियते। द्विमात्रमाह्लादकारित्वादीर्घं सोम इत्युच्यते। तथा ताभ्यामेकमात्रद्विमात्राभ्यां ह्रस्वदीर्घाभ्यां परमन्यद् यत् त्रिमात्रं प्लुतं नाम। तथा चैषां ह्रस्वत्वं सूर्यत्वम्, दीर्घत्वं सोमत्वम्, प्लुतत्वम् अग्नित्वमिति धामत्रयमयत्वम्। एवमप्यत्र परस्य प्रकाशस्य न स्वस्वरूपात् प्रच्याव इति बिन्दुरूपत्वमुक्तम्। तथा चोक्तं तत्रैव—

उदितायां क्रियाशक्तौ सोमसूर्याग्निधामनि।
अविभागः प्रकाशो यः स बिन्दुः परमो हि नः॥

यथा ऋकारादिचतुष्टये विसर्गे च प्रतीयमाना रेफलकारहकारा वक्ष्यमाणेभ्यो रेफलकारहकारेभ्यो भिन्नास्तथैवायं बिन्दुरपि मकारादतिरिक्तः। न च वर्णश्रुतिरेव वर्णः। महाभाष्यतोऽप्येतदनुसन्धेयम्। तथा चानुत्तरः अकार एव मकारस्य हकारस्य च लेशमासाद्य अं अः इत्यनुस्वारविसर्गरूपं धत्ते।

अत्रेदं रहस्यम्—

इकार एव रेफांशच्छाययाऽन्यो यथा स्वरः।
तथैव महलेशादः सोऽन्यो द्वेधा स्वरोऽपि सन्॥

इत्युक्तरीत्या इकार एव यथा रेफांशच्छायया ऋकाररूपः स्वरः, तथैवादिवर्णः अकारोऽपि महलेशमासाद्य अं अः इति रूपं द्वेधा धत्ते। एतद्दृष्टान्तेनैव यकारवकाररूपरूषितावेव इकारोकाराविति वैयाकरणाः।

तथा चान्तःकरणप्रभृतीनां षोडशानामपि कलानामाप्यायनकारित्वाद् हकारार्धार्धरूपिणी कौलिकी अमाख्या सप्तदशी कला, सैव स्थूलरूपेणोच्छ्ना बिन्दुद्वयात्मकं विसर्गरूपं धत्ते। तथा च विसर्गस्यैव स्थूलं रूपं हकारः।

अथ व्यञ्जनानि

यथा विसर्गस्य हकारात्मना स्थूलरूपेणावस्थानं तथैवानुत्तरादीनामपि कादिसन्ततित्वेनावस्थितिः। इदानीं यावदनुस्वारविसर्गौ मेलयित्वा षोडश[1] स्वरा उक्ताः, अथ कादीनि व्यञ्जनान्युच्यन्ते। अनुत्तरस्य चिच्छक्तिप्राधान्येऽपि सर्वत्र सर्वमस्तीति न्यायेन पञ्चशक्तिमयत्वमिति तत्प्रभवस्य कवर्गस्यापि पञ्चात्मकत्वं ज्ञेयम्। एवमन्यत्राप्यूह्यम्। अक्षुब्धाया एवेच्छाशक्तेरिकारात् पञ्चशक्त्यात्मकस्य चवर्गस्योत्पत्तिः। ज्वलनधराशक्तिच्छुरिताया अक्षुब्धाया एवेच्छाशक्तेर् ऋकारलृकाररूपायाः टवर्गतवर्गयोरुत्पत्तिः। अर्थाद् वह्न्यंशच्छुरिताया इच्छाशक्तेर् ऋकाररूपं प्राप्नायाष्टवर्गस्योत्पत्तिः धरांशजुष्टाया अक्षुब्धाया एवेच्छाशक्तेर् लृकाररूपमापन्नायास्तवर्गस्योत्पत्तिः। तथा चैतत् पृथ्वी-

---

१. वस्तुतस्तु एषां षोडशानां नित्यत्वं नैव युक्तम्, नित्यत्वेनाभिमतानाम् ऋकारलृकारयोर् एकारादीनां च सन्धिजत्वेन नित्यत्वानुपपत्तेः। एतच्च वैयाकरणमतप्रदर्शनावसरे प्रतिपादयिष्यते।

तत्त्वमारभ्य पुरुषान्तं विश्वं (प्रतिलोमक्रमेण) स्पर्शरूपम्। कञ्चुकषट्कं तु जीवस्यात्यन्तकण्ठसंलग्नत्वेन जीवाभिन्नमेव, अतः स्थूलज्ञेयात्मविश्वरूपतया नोक्तमिति।

एवमक्षुभिताक्षुभिताभेदेन द्विरूपा (इकाररूपा ईकाररूपा च) इच्छा शक्तिर्विसर्जनीयानुत्तराभिमुखी इको यणचीति प्राप्तसन्धिर्यकाररूपं धत्ते। सैवेच्छाशक्तिः पूर्वोक्तरीत्या द्विविधम् ऋकाररूपम् ऌकाररूपं च प्राप्ता अकारोन्मुखी रत्वं लत्वं च गच्छति। एवमुन्मेषशक्तिरपि द्विप्रकारा अनुत्तरेण सह प्राग्वदेव कृतसन्धिर्वकारत्वमवभासयेत्[1]। इच्छोन्मेषान्तर्गतत्वाद् यरलवा अन्तःस्थापदेनोच्यन्ते। सजातीयशक्तीनामिच्छादीनां योगे न वर्णान्तरोद्भवः, किन्तु दीर्घरूपतैव भवति। इ+इ=ई। उ+उ=ऊ इत्यादि। अनुत्तरं यदा आनन्देन युज्यते तदा आकाररूपं धत्ते। यदा अनुत्तरः अनुत्तरेणैव युज्यते तदा द्वयी गतिः। दण्ड+अग्रम् इत्यत्र आकारो भवति। सीम+अन्तः इत्यत्र अकार एव द्वयोः स्थाने भवति। यदा च सैवेच्छा कर्मणा (क्रियया) हीना इकाररूपा एष्टव्येन शीघ्रत्वस्थिरत्वभेदभिन्नेन ज्वलनधरात्मना रूषिता (छुरिता) ऋभावम् ऌभावं च याता, तदा त्रिधाभावमुपगतायाम् इच्छायाम् इष्यमाणमपि त्रिधैवावतिष्ठते। तच्च त्रिविधं शुद्धायाम् इकाररूपायाम् अनुन्मिषितम् (अनुल्लसितम्) (१), एष्टव्येन आच्छु-

---

१. पूर्वमनेन तन्त्रालोककारेण १३४ कारिकाव्याख्यायां रेफलकारहकारा द्विविधाः प्रदर्शिताः। तेषां मध्ये रेफलकारौ इच्छाशक्तिम् इकारं रूषयतः, तत ऋकारऌकारयोरभिव्यक्तिः। एवं मकारहकारलेशमुपाधित्वेनावलम्ब्य चिच्छक्त्यात्मा अकारो बिन्दुविसर्गरूपतयावभासते। आभ्यामेवेच्छोन्मेषशक्तिभ्यां रेफलकाररूषिताभ्यां ताभ्यामरूषिताभ्यां च चतुर्णामन्तःस्थानामाविर्भावः। अत एव १५८ कारिकाव्याख्यायाम् "इच्छाद्यन्तःप्रवेशेन तेऽन्तःस्था इति कीर्तिताः" इत्युक्तम्।

रितायाम् ऋकाररूपायामिच्छायाम् उल्लसद्रूपम् (२), स्थैर्यात्मना एष्टव्येन आरूषितायाम् उल्लसितम् (३) इति त्रिविधम् इष्यमाणं स्वातन्त्र्यलक्षणेन स्वकीयोष्मणा बहीरूपेण समुल्लसितं सत् क्रमेण शषसेति त्रितयात्मना प्रस्फुरति ।

"इच्छैव स्वोष्मणाऽऽक्रान्ता कलात्रयसमाश्रिता"

इत्यनेन एषां शकारषकारसकाराणाम् इच्छायाश्च त्रिविधाया इचुयशानां तालु, ऋटुरषाणां मूर्धा, लृतुलसानां दन्ता इत्यनेन समानस्थानत्वमुक्तम् । हकारसृष्टिस्तु पूर्वमेवोक्ता ।

ननु पूर्वम् ऋकारादीनां चतुर्णां षण्ढबीजत्वमुक्तम्, अत्र तु रलोत्पत्तिकारणत्वमुच्यत इति विरोधः स्यादिति चेन्न, सैव षण्ढगता इच्छाशक्तिर् अन्तःस्थं रेफम् ऋकारम् लृकारं च तथा टवर्गं तवर्गं च बहिरुल्लासयति, न पुनश्छुरिता सा = ऋकारलृकारभावापन्ना शक्तिः, वर्णान्तरप्रसविनीति स्वीकारात् । एतस्य वर्णचतुष्टयस्य शषसहात्मकस्य सोष्मणाऽवभासनाद् ऊष्मेति नाम प्रोक्तम् । हकारस्यानुत्तराज्जन्मेति भङ्ग्या प्रोक्तम् । तथा हि–अनुत्तरस्य शक्तिर्विसर्गः, तस्यैव च स्थूलं रूपं हकार इति । एवमनुत्तरेण समानस्थानत्वं तस्य । "कादिभिश्च स्मृता योनिः" (तन्त्रा० ३।१७९) इत्युक्त्या, "कादिक्षान्तमिदं प्राहुः क्षोभाधारतया पुनः" (तन्त्रा० ३।१८०) इत्युक्त्या च क्षौभाधारयोनिपदयोः समानार्थत्वम् । यथा पूर्वं बीजानां बीजान्तरयोगे क्षोभान्तराविर्भावः, तथा योनेरपि योन्यन्तरयोगे । अत एव ककारेण षकारसंयोगे क्षकारोत्पत्तिः, तेन पञ्चाशतो मातृकाणां संख्या पूर्यते ।

सर्वं हि वर्णजातं समुदयात् पूर्वं स्वरेष्वेव शक्त्यात्मनाऽवस्थितम् । अत एव तद्वर्णजातं बहिरभिव्यक्तं सद् व्यज्यत इति व्यञ्जनपदभाग् भवति । अयमेव व्यञ्जनशब्दो वर्णानां नित्यत्वमभिव्यनक्ति । अभिव्यक्तमेव वर्णजातं स्वरानुप्राणितम्, अन्यथा स्वरं विनास्योच्चारणमेव

न स्यात्। तथा चाकारादय उकारान्ताः स्वराः षट्, अन्येषां स्वराणां कारणरूपेणावस्थितास्ते एव षड् देवता दहनी, पाचनी, धूम्रा, कर्षिणी, वर्षिणी, रसा इति मुख्याः सूर्यरश्मयः, एको रश्मिमस्त्वन्येषां रश्मीनां कारणभूतत्वान्नोक्तः। सैव बिन्दुरूपा तासु दीर्घरूपा चान्द्रमसी कला। चन्द्रो हि सूर्यादनन्य इति सिद्धान्तः। या हि एकाशीतिपदा देवी साऽप्यत्रैवान्तर्भवति। अर्धमात्रारूपत्वात्तासामत्रैवान्तर्भावः। यथा व्यञ्जनानां त्रयस्त्रिंशत्, ह्रस्वानाम् अ इ उ ऋ ऌ एषां दशार्धमात्राः, आ ई ऊ ॠ ए ऐ ओ औ एषामष्टानां दीर्घाणां द्वात्रिंशद् अर्धमात्राः, प्लुतस्य ऌकारस्य षट् इति संकलनया एकाशीतिर्भवन्ति। एतदेकाशीतिपदं वास्तुपुरुषशरीरम्। एवं तन्त्रालोकीया वर्णविषयिणी पद्धतिः संक्षिप्ततया प्रदर्शिता।

परात्रीशिकायां तु २०१ पृष्ठे—षोडशी एव कला विसर्गात्मा। "सा तु सप्तदशी देवी [1]हकारार्धार्धरूपिणी" इति विसर्गस्य हकारार्धत्वात् ततोऽपि विश्लेषस्यार्धत्वमिति पादार्धमात्रत्वमपि हकारस्य। यद्यपि तथा स्पष्टतया पञ्च [2]चत्वारो वा हकारा नोक्तास्तथापि ग्रन्थसमालोचनया

---

१. ननु विसर्गस्य हकारार्धत्वात् ततोऽपि विश्लेषस्यार्धत्वादिति निरवयवस्यैकवर्णस्य कथमेषा विकल्पना? इति चेत्? अस्मत्पक्षे सर्वमेवानवयवम्, चिन्मयैकावभासनानतिरेकात्। तथापि च स्वातन्त्र्यादेवावयवावभासेऽप्यनवयवतैवानपायिनी। तथेहाप्यस्तु को विरोधः। एवमेव वर्णोपपत्तिः, अपरथा दन्त्योष्ठ्यकण्ठ्यतालव्यादिवर्णेषु क्रमप्रसारी पवन आघातकः कथं कण्ठं हत्वा ताल्वाहन्तीति युगपदापूरकत्वेऽपि समानकालता स्यात्। यत्र कण्ठघातोत्थं रूपं तत्तु ताल्वाहतिजं सर्वत्र संभवति। एतद्रहस्यमाधुनिका विदेशीयाः सम्यक् प्रकाशयन्ति।

२. अयं भावः—यदा विसर्गः पादमात्रोऽर्धमात्रश्च, तदा पञ्च। पादमात्रिकत्वे एव

चत्वारस्ते प्रतीयन्ते पञ्च वा। तथा हि पादार्धमात्र एक आद्यः सप्तदशी कला। पादमात्रोऽपरो हकारो द्वितीयः। अर्धमात्रो विसर्गस्तृतीयः। अर्धमात्रो हकारः कण्ठ्यः। अपरस्तथा उरस्यः।

किञ्च, तत्रैव एतावती विसर्गशक्तिः षोडशी कला इति गीयते। विसर्गशक्तिरेव च पारमेश्वरी परमानन्दभूमिबीजम्। एवं ह्यकारादिरूपं घनतापत्त्या योनिरूपतां गृहीत्वा स्वरूपादप्रच्युतं तदेव स्वस्वरूपे योनिरूपे संक्रामद् विसर्गपदमित्युच्यते। तथा च स एव अकारो घनतामापन्नः कवर्गः, कण्ठ्यत्वात्। इकारस्य घनता चवर्गः, तालव्यत्वात्। उकारस्य पवर्ग ओष्ठ्यत्वात्। ऋकारस्य टवर्गः, मूर्धन्यत्वात्। ऌकारस्य तवर्गः, दन्त्यत्वात्। यशौ चवर्गस्यान्तः, रषौ टवर्गस्य, लसौ तवर्गस्य, वकारोऽपि तपवर्गयोः। तत्रत्यान् अन्यानंशान् अविचार्य वर्णविषयमवलम्ब्य किञ्चिदुच्यते। "भिन्नयोनिस्तु मालिनी" इत्यस्या व्याख्यावसरे जयद्रथराजानकैरुक्तम्–भिन्ना = स्वरैर्भेदिता, योनिः = कादिलक्ष्या यस्याः स भिन्नयोनिः। तत्र शक्तिवाचको मालिनीमन्त्रः शक्तिमद्वाचकस्तु मातृकामन्त्रः। तत्र मातृका प्रसिद्धैव। मालिनी यथा–"न, ऋ, ॠ, ऌ, ॡ, थ, च, ध, ई, ण, उ, ऊ, ब, क, ख, ग, घ, ङ, र, अ, व, भ, य, ड, ढ, ठ, झ, ञ, ज, र, ट, प, छ, ल, आ, स, अः, ह, ष, क्ष, म, श, अं, त, ए, ऐ, ओ, औ, द, फ," इति। ईदृशः क्रमो मन्त्रस्वरूपगुप्तये तैरवलम्बित इत्यनुमीयते। एतावन्त एव वर्णाः शैवागमेषु निर्दिष्टाः सन्ति। पुनरपि[1] तन्त्रालोके—

तु चत्वारः। पादार्धमात्रः, पादमात्रः, कण्ठ्यः, उरस्यश्च। यदा पादमात्रविसर्गातिरिक्तोऽर्धमात्रोऽपि विसर्गोऽङ्गीक्रियते, तदा पञ्च ते भवन्ति।

१. सिंहावलोकनन्यायेन तन्त्रालोकस्थ एव विषयोऽन्यया भङ्ग्या प्रोक्तस्तमेव दर्शयामि। अतः पुनरुक्तिदोषो नोद्भावनीयः।

विसर्गशक्तिर्विश्वस्य कारणं च निरूपिता।
ऐतरेयाख्ये वेदान्ते परमेशेन विस्तरात्॥
(तन्त्रा० ३।२२६ पृ० २१५)

इत्युक्तम्। तेन सर्वमेतन्मातृकाचक्रं विसर्गस्यैव विभूतिः। अयमेव हि पिता बिन्दुर्यदा स्वात्मस्थां विसर्गरूपां मातृकाम् (अर्धनारीश्वरः स्वीयार्धरूपामुमामिव, लक्ष्मीनारायणो वा स्वीयार्धरूपां लक्ष्मीमिव) बहिरुल्लासयति, तदा ततो विसर्गात् सर्वं मातृकाचक्रं बहिरुन्मिषतीति तत्त्वम्। अपि च—

विभागाभासने चास्य त्रिधा वपुरुदाहृतम्।
पश्यन्ती मध्यमा स्थूला वैखरीत्यभिशब्दितम्॥
(तन्त्रा० ३।२३६½)

तासामपि त्रिधारूपं स्थूलसूक्ष्मपरत्वतः।

इति तन्त्रालोकानुसारं पश्यन्तीमध्यमावैखरीणां प्रत्येकं स्थूलसूक्ष्मपरत्वभेदात् त्रैविध्यं विद्यते। तत्र स्थूलपश्यन्तीरूपम्—

[1]तत्र या स्वरसन्दर्भसुभगा नादरूपिणी॥२३७॥
सा स्थूला पश्यन्ती वर्णाद्यप्रविभागतः।

---

१. अस्यार्थः—स्वराणां षड्जादीनां यः परस्परं लोलीभावात्मा सन्दर्भः, अत एव षड्जाद्येकतमत्वे नियतोऽनुद्भिन्नवर्णादिविभाग आलापः, तेन सुभगा माधुर्यातिशयाह्लादरूपा। अत एव प्राथमिकनादमात्रस्वभावा या वाक् सा खलु स्थूला पश्यन्ती भवतीति शेषः। नन्वेवमात्मन आलापस्य स्थानवाय्वादिसंघर्षोत्थत्वमपि संभवेदिति वैखर्येव किं न स्यादित्याशङ्क्याह—वर्णाद्यप्रविभागत इति। वर्णाद्यप्रविभागहेतुकमेवास्या माधुर्यं यद्वशादेवात्र सर्वेषामासक्तिः। मधुर एव हि लोको रज्यतीत्यविवादम्। अन्यत्र पुनर्वर्णादिप्रविभागात् पारुष्यं परुषे च न कस्यचिदप्यासक्तिः। तदियानेवानयोः

अविभागैकरूपत्वं माधुर्यं शक्तिरुच्यते ॥२३८॥
स्थानवाय्वादिघर्षोत्था स्फुटतैव च पारुषी ।
तदस्यां नादरूपायां संवित्सविधवृत्तितः ॥२३९॥
साजात्यात्तन्मयी भूतिर्झगित्येवोपलभ्यते ।
येषां न तन्मयी भूतिस्ते देहादिनिमज्जनम् ॥२४०॥
अविदन्तो मग्नसंविन्मानास्त्वद्धृदया इति ।

इत्यादिभिर्दर्शितम् ।

एवं पश्यन्त्याः स्थूलरूपं विचार्य मध्यमाया अप्यभिधत्ते—

[1]यत्तु चर्मावनद्धादि किञ्चित्तत्रैष यो ध्वनिः ॥२४१॥
स स्फुटाऽस्फुटरूपत्वान्मध्यमा स्थूलरूपिणी ।
मध्यायाश्चाविभागांशसद्भाव इति रक्तता ॥२४२॥
[2]अविभागस्वरमयी यत्र स्यात् तत् सुरञ्जकम् ।

स्वानुभवसिद्धो भेद इति भावः । तदेवोक्तम्–"अविभागैकरूपत्वम्" इत्यनेन । तदेवमत्रासक्तिभाजां योगिनां सहसैव संविन्मयीभावो भवतीत्याह—तदस्यामित्यादिना । "संवित् सविधवृत्तितः" इत्यनेन मध्यमादिवद् बहीरूपतया दूरदूरमनुल्लासात् । केषाञ्चिद् गीतादावबहितचेतसामपि न तन्मयीभावो भवेदिति कथमेतदुक्तम् ? इत्याशङ्क्याह—येषामिति । लोके सातिशये गीतादौ विषये तन्मयीभावेन सचमत्काराणां सहृदया इति प्रसिद्धिः । अन्यथा अहृदया इति ।

१. तत्र चर्मावनद्धे मृदङ्गादौ एष यो ध्वनिः कराघाताद्युत्थः षड्जाद्येकतमरूपत्वेन अभिव्यक्तेः पूर्वापेक्षया स्फुटो वर्णादिविभागानुल्लासाच्च अस्फुटः । अत एव मध्यमाशब्दव्यपदेश्यः ।

२. अविभाग एव हि निर्वृतिनिमित्तं दृश्यतां साक्षात् क्रियताम् । नहि दृष्टमदृष्टं भवतीति भावः । किलेति हेतौ । यतस्तालानां चञ्चुपुटादीनां पाठं गानमाश्रित्य अव्यक्तध्वन्यात्मनि तस्मिन्नविभागरूपे वादने सर्वोऽप्ययं

अविभागो हि निर्वृत्त्यै दृश्यतां तालपाठतः ॥२४३॥
किलाव्यक्तध्वनौ तस्मिन् वादने परितुष्यति ।

इत्यादिना मध्यमायाः स्थूलं रूपमुक्तम् ।

[1]या तु स्फुटानां वर्णानामुत्पत्तौ कारणं भवेत् ॥२४४॥
सा स्थूला वैखरी यस्याः कार्यं वाक्यादि भूयसा ।

एतेन च वैखर्याः स्थूलं रूपमुक्तम् ।

[2]अस्मिन् स्थूलत्रये यत्तदनुसन्धानमादिवत् ॥२४५॥
पृथक् पृथक् तत्त्रितयं सूक्ष्ममित्यभिशब्द्यते ।

अनेन तिसृणामपि सूक्ष्मं रूपमुक्तम् ।

[3]षड्जं करोमि मधुरं वादयामि ब्रुवे वचः ॥२४६॥

इत्येवं पृथक् पृथक् तदुदाहरणानि दर्शितानि । एवं पृथक् पृथगनुसन्धानत्रयं स्वानुभवसिद्धमिति—"पृथगेवानुसन्धानत्रयं संवेद्यते किल" इत्यनेन सूचितम् ।

[4]एतस्यापि त्रयस्याद्यं यद्रूपमनुपाधिमत् ॥२४७॥
तत् परं त्रितयं तत्र शिवः परचिदात्मकः ।

लोकः परितुष्यति, निर्वृतिं भजत इत्यर्थः । तेनात्र स्वानुभव एव प्रमाणमिति तात्पर्यम् ।

१. स्फुटानामिति परस्परवैलक्षण्यावस्थानेन श्रोत्राकर्ण्यमानानाम् । अत एव पारुष्यादत्र लोकस्य नासक्तिः ।

२. अस्मिन् समनन्तरोक्ते स्थूले भेदत्रये यदाद्यं जिगासाद्यात्मेच्छारूपमनुसन्धानम्, तदेव पृथक् पृथक् पश्यन्तीमध्यमावैखरीगतं सूक्ष्मं भेदत्रयमुच्यते ।

३. तेन जिगासा विवादयिषा विवक्षात्मकानुसन्धानत्रयरूपमेतत्, सूक्ष्मं भेदत्रयमिति तात्पर्यार्थः ।

४. एतस्य जिगासाद्यात्मनोऽनुसन्धानत्रयस्यापि यदनुपाधिमत्, जिगासाद्युपरञ्जकरहितमाद्यं रूपमिच्छा अपि पूर्वकोटिभूतं संवित्तत्त्वं तदेतत् परं भेदत्रयम् ।

इत्यनेन तासां परं रूपं प्रदर्शितम्। तथा चैतन्मते—

[1]अनुत्तरा चित् परा अकारः। इच्छा इकारः परापरा। उन्मेषशक्तिर्ज्ञानाख्या उकारः अपरेत्युच्यते। इमास्तिस्रः शक्तयो भैरवस्य परं महः। तासां शक्तीनां क्षुब्धं रूपमाश्रित्य पुनस्तिस्र आनन्देशनोनताख्याः सञ्जाताः। तथा च तासामेव संविदां क्रियाशक्तिरूपेणाविर्भावे परस्परसंघट्टनेन द्वादश संविदः अ, आ, इ, ई, उ, ऊ, ए, ऐ, ओ, औ, अं, अः इत्येवं रूपा भवन्ति। यदा च ज्वलनशक्त्या छुरिता अक्षुब्धा इच्छा भवति तदा ऋरूपं धत्ते। यदा च सैव क्षुब्धा ज्वलनशक्त्याविष्टा भवति तदा दीर्घऋरूपं धारयति। एवमेवाक्षुब्धाक्षुब्धाभेदेन धराशक्त्याविष्टा ऌ ॡ इति रूपं बिभर्ति। तथा चेमाः षोडश मातृकाः संपद्यन्ते। अन्यत् सर्वं पूर्ववदेवानुसन्धेयम्।

नन्वनुपाधिमति अत्र संवित्तत्त्वे भेदस्यावकाशमात्रमपि न संभवेत्, तत् कथमत्र त्रिरूपत्वमुक्तम्? इत्याशङ्क्याह—"शिवः परचिदात्मकः" इति। परिचिन्मात्ररूपशिवैकात्म्येनात्र पश्यन्त्यादित्रयमवभासत इत्यर्थः।

१. तथा चोक्तम्—

अनुत्तरा परेच्छा च परापरतया स्थिता।
उन्मेषशक्तिर्ज्ञानाख्या त्वपरेति निगद्यते ॥ २४९ ॥
अतः षण्णां त्रिकं सारं चिदित्युन्मेषणात्मकम्।
तदेव त्रितयं प्राहुर्भैरवस्य परं महः॥
क्षोभरूपात् पुनस्तासामुक्ताः षट् संविदोऽमलाः।
स्वराणां षट्कमेवेह मूलं स्यात् वर्णसन्ततौ॥
षड् देवतास्तु ता एव ये मुख्याः सूर्यरश्मयः। (३।१८४)

षष्ठं दलम्

वर्णा भौताः

मातृकाचक्रानुसारतो (३।२) वर्णविषये किञ्चिदुच्यते—"वर्णाः खवायुशिखितोयधराः क्रमेण स्युः कण्ठतालुकशिरोरदनोष्ठजाताः" इति तदुक्तरीत्या अकारकवर्गहकारविसर्जनीयाः कण्ठजा आकाशबोधकाः।

इकारचवर्गयकारशकारास्तालव्या वायव्याः। लृकारतवर्गलकारसकारा दन्तजाता जलीयाः। उकारपवर्गवकारा ओष्ठजाताः पार्थिवाः। एवं सति तत्र ग्रन्थेषु वकारस्य जलबीजत्वं लकारस्य च पृथिवीबीजत्वं यद् व्यवस्थापितम्, तत् सर्वं युक्तिविरुद्धमेतन्मातृकाचक्रविवेकविरुद्धं चेत्यायाति।

परमत्रैव व्याख्यायां पशुपदे क्रियारूपा पृथिवी एव ज्ञानांशं जलं व्याप्नोतीति दन्त्योष्ठ्ययोः पृथिवीजलबोधकत्वमेवोपपन्नमिति लकारवकारयोर्दन्त्योष्ठ्ययोः पृथिवीजलबीजत्वं प्रसिद्धमित्युक्तम्। तथा च प्रचलितामेव पद्धतिं टीकाकारोऽप्यन्वसार्षीत्। अत्रैव (पृ० ६) गम्यते "स्पृष्टं करणं स्पर्शानाम्, ईषत्स्पृष्टमन्तःस्थानामिति वैयाकरणैर्यदुक्तं तत्साधु। परं विवृतमूष्मणां स्वराणां चेति यदुक्तम्, तत्तु ऊष्मस्वरानुभवविरुद्धत्वादुपेक्षणीयमिति" इत्युक्तम्। तच्च टीकाकर्तुः सिद्धान्तकौमुदीदर्शिनः, "स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्" इति शिक्षामताध्यायिनः, "नाज्झलौ" (पा० १।१।१०) इति सूत्रस्थं "सिद्धमनच्त्वात्" इति वार्त्तिकं तद्भाष्यं चाजानानस्याज्ञानसूचकम्, तत्र भाष्ये स्वराणां विवृतप्रयत्नताया ऊष्मणाम् ईषद्विवृतप्रयत्नतायाश्च प्रतिपादित्वात्। अत्र टीकायाम् (५३ पृ०)—तत्रादौ ह्रस्वदीर्घरूपाः (अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ) इमे स्वराः प्रमेयकक्ष्याः, सन्ध्यक्षरचतुष्टयम् (ए ऐ ओ औ) प्रमाणकक्ष्याः, बिन्दुविसर्गौ अं अः इति प्रमातृकक्ष्याः—अनया रीत्या षोडशस्वरा निर्दिष्टाः सन्ति। इकारोकारयोः सङ्कुचद्रूपौ यकारवकारौ,

ऋलृवर्णयोः संकुचद्रूपौ रलौ, अकारस्य संकोचः कवर्गः, इकारस्य चवर्गः, ऋकारस्य टवर्गः, लृकारस्य संकुचद्रूपस्तवर्गः, उकारस्य संकोचः पवर्गः। अयमप्यपूर्वः क्रमः। "श्लिष्टं पुरःस्फुरितसद्वयकोटिलक्षरूपम्" (मातृका० ४।४) इत्यनेन लक्षौ उक्तौ, ऊष्मणा इत्यनेन शषसहा उक्ताः। तथा च स्वराः षोडश, स्पर्शाः पञ्चविंशतिः, यादयश्चत्वारः, शादयोऽपि चत्वारः, लक्षौ मिलित्वा एकपञ्चाशद् वर्णा भवन्ति। (१६+२५+४+४+२ =५१)

यत्तु मातृकाचक्रविवेकादौ इकारोकारयोः संकुचद्रूपौ यकारवकारावित्याद्युक्तम्, तत्तु युक्तिविरुद्धं स्वोक्तिविरुद्धं च। यतो हि तैरेव अनुत्तरस्य अकारस्य विस्फारितं रूपम् आनन्द आकार इत्युक्तम्। तदुक्तक्रमेण संख्याभिवृद्धौ वर्णान्तराभिव्यक्तौ वा अल्पमात्रवर्णतोऽधिकमात्रवर्णानामुद्भव एव कारणमभिमतम्। किञ्च, स्थूलतो लघुन उत्पत्तिर्नहि युक्तियुक्ता, लयावस्थायामेव स्थूलं सूक्ष्मे विलीयत इति स्वीकारात्, इको यणचीति सूत्रस्य लयसन्धित्वनिर्णयात्, वृद्धिरेचीत्यस्योत्पत्तिसन्धिस्वीकाराच्च। सृष्टिस्थितिसंहारभेदेन सन्धेस्त्रैविध्यस्य व्यवस्थापितत्वात्। सन्धिविचारस्तु प्रकृतेऽनुपयोगान्न प्रदर्श्यते।

अथ वर्णाः, तेषां कालश्च

सूत्रम्—बिन्द्वादीनां समष्टिर्नादः

साम्प्रतमहं शैवशाक्तादितन्त्रानुसारं संक्षेपेण वर्णविषये तेषां मतानि प्रदर्शयितुं प्रयतिष्ये। तत्र च तदभिमतान् पदार्थान् प्रदर्श्योपोद्घातरूपेण पदार्थोपक्षेपमात्रं स्फोटयामि। सन्ति च बहवो ग्रन्थाः साधकमूर्धन्यैस्तत्तत्पण्डितैर्निबद्धाः। तेषु सर्वदर्शनविलोडनलब्धविशिष्टसंस्कारैर्भास्कररायैः प्रणीतवरिवस्यारहस्यतः किञ्चिदुद्धृत्य भवतां पुरः प्रख्यापयामि। सत्यवसरेऽन्येषु तान्त्रिकग्रन्थेषु प्रदर्शितानप्यपेक्षितान्

विषयान् उद्घाटयिष्ये। एते च भास्कररायमहोदयाः परिणामवादिनस्ताञ्त्रिकान् व्यवस्थापयन्ति। तां च व्यवस्थां दर्शनग्रन्थे यथास्थानं स्फोरयिष्ये।

तत्र प्रथमं 'ह्रीं' इति बीजोच्चारणे कत्यक्षराणीति विचारे पञ्चदशाक्षराणीति सिद्धान्तितम्। तथा हि—

हल्लेखायाः स्वरूपं तु व्योमाग्निर्वामलोचना।
बिन्द्वर्धचन्द्ररोधिन्यो नादनादान्तशक्तयः॥
व्यापिका समनोन्मय्य इति द्वादशसंहतिः।
बिन्द्वादीनां नवानां तु समष्टिर्नाद उच्यते॥

(वरि० र० १।१२–१३)

इति पद्यव्याख्यायां व्योम हकारः केवलो न त्वाकारविशिष्टः। अग्नी रेफस्तादृशः। वामलोचना ईकारः, तथा च 'ह्री' इति रूपं संपद्यते।

बिन्द्वादयो नवापि सूक्ष्मसूक्ष्मतरसूक्ष्मतमकालैरुच्चार्या ध्वनिविशेषा वर्णविशेषा वा। न च ककारादिवत् स्पष्टमनुच्चार्यत्वात्तत्स्वीस्वरतुल्यत्वेन श्रूयमाणत्वाच्च कारप्रत्ययाद्यभावाच्च "बीजबिन्दुध्वनीनां च त्रिकूटेषु ग्रहात्मिका" इत्यादौ ध्वनिपदेनैव तन्त्रेषु व्यवहाराच्च न वर्णत्वमर्धचन्द्रादेरिति वाच्यम्, अनुस्वारविसर्गादावुक्तहेतुसत्त्वेऽपि वर्णस्येष्टत्वात्। कथमन्यथा "त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः" (पा० शि० १) इति प्रतिज्ञाय "अनुस्वारो विसर्गश्च" इति गणनं शिक्षायां संगच्छेत? न च तादृशविरोधादेव नात्र वर्णत्वम्, तत्र स्पष्टोच्चार्याणामेव गणनात्। न च ताल्वादिपरिगणितस्थानानभिव्यङ्ग्यत्वान्न वर्णत्वम्, तदनभिव्यङ्ग्यत्वस्य पश्यन्त्यादावव्याप्तेः। "चत्वारि वाक् परिमिता पदानि" (ऋक्० १।१६४।४५) इति श्रुत्या वर्णसमूहात्मकपदत्वस्य स्पष्टमुक्तत्वाच्च। अत एव चतुःशतीशास्त्रे नादस्यार्थवर्णनं संगच्छते।

न च रथघोषवत् पदार्थस्मारकत्वोपपत्तिः, तत्र हि तत्कालकरणीयत्वसम्बन्धेन माहेन्द्रस्तोत्रोपकरणस्य स्मृतिविषयताया वाचनिकत्वेन रथघोषसामान्यस्य लौकिकादिसाधारणस्य स्मारकत्वाभावेन तस्य तत्र शक्तेरयोगात्, प्रकृते तु न तथेति वैषम्यात्, "हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाक्षरैः" इत्यादौ प्रतिहृल्लेखं हकाररेफेकारानुस्वारनादपञ्चकमिति पञ्चदशाक्षराणीत्युक्त्या नादेऽक्षरत्वव्यवहारस्य दर्शनाद् योगिनीहृदये,

भूमिश्चन्द्रः शिवो माया शक्तिः कृष्णाध्वमादनौ।
अर्धश्चन्द्रश्च बिन्दुश्च नवार्णो मेरुरुच्यते॥
महात्रिपुरसुन्दर्य्या मात्रा मेरुसमुद्भवाः।

इति ज्ञानार्णवादावसकृत्तद्व्यवहारस्य दर्शनाच्च। ध्वनिपदेन व्यवहारस्तु तत्तुल्यलक्षणया ध्वनिपर्यायनादपदवाच्यत्वान्नेयार्थरूपलक्षणया वा नेय इति दिक्।

एतदनन्तरं वर्णानां कालविषयेऽपि वक्ष्यमाणोऽर्थस्तैः प्रदर्शितः—मात्रा लघ्वक्षरस्य कालः तद्द्विगुणो गुर्वक्षरस्य। अत एव कामकला कमला त्रिकोणा योनिश्च द्विमात्रा। हृल्लेखायां द्वयोर्व्यञ्जनयोरेका मात्रा कामकलाया द्वे मात्रे इति तिस्रः। अन्येषामकारसहितानां कादिदशवर्णानाम् अर्धमात्रया सहितो मात्राकालः। (क्वचित् 'सहितानाम्' इति पाठ., स चायुक्तः)।

बिन्दोरपि व्यञ्जनत्वादर्धमात्रा,

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुता ज्ञेयो व्यञ्जनं त्वर्धमात्रकम्॥

इति वचनात्। परे परे अर्धचन्द्ररोधिन्यादयः पूर्वपूर्वार्धाः। अर्धचन्द्रस्यार्धकालो रोधिन्याः, रोधिन्यर्धकालो नादस्येत्यादिक्रमेण कालबन्तः। अयं भावः—कालपरमाणुर्लव इत्युच्यते,

नलिनीपत्रसंहत्याः सूक्ष्मसूच्यभिवेधने।
दले दले तु यः कालः स कालो लवसंज्ञितः॥
अतः सूक्ष्मतमः कालो नोपलभ्यो भृगूद्वह।

इति वचनात्। षट्पञ्चाशदुत्तरशतद्वयलवैरेका मात्रा। बिन्दोरष्टाविंशत्युत्तरशतं लवाः। अर्धचन्द्रस्य चतुःषष्टिः। रोधिन्या द्वात्रिंशत्। नादस्य षोडश। नादान्तस्याष्टौ। शक्तेश्चत्वारः। व्यापिकाया द्वौ लवौ। समनाया एको लवः। उन्मनायास्तु नास्त्येव कालः।

यद्यपि योगिनीहृदये चक्रसंकेते "दीपाकारोऽर्धमात्रश्च" इत्यनेन बिन्दोः कालमुक्त्वार्धचन्द्रादेः शक्तिपर्यन्तस्य चतुरंशाष्टांशषोडशांशादिरूपभागद्वैगुण्यं कालस्योक्त्वा शक्त्यादीनां पूर्वपूर्वद्विगुणांशकालवत्त्वं सामान्येनोक्तम्—"चतुःषष्टिस्तदूर्ध्वं तु द्विगुणं द्विगुणं ततः" इति। तेन च वचनेन मात्राया द्वादशोत्तरपञ्चशततमो भाग उन्मनाकालः। मात्रास्वरूपं च द्वादशोत्तरपञ्चशतलवात्मकमेव प्रतीयते। अत एव—'देशकालानवच्छिन्नं तदूर्ध्वं परमं महत्" इत्युत्तरग्रन्थेऽप्युन्मनायाः परत एव कालानवच्छेद उक्त इति व्यक्तं प्रतीयते, तथापि "चतुःषष्टिः" इति श्लोकस्य शक्तेश्चतुःषष्टितमो मात्राभागः, तदूर्ध्वं द्विगुणं व्यापिकाया अष्टाविंशत्युत्तरशततमो भागः। ततो द्विगुणं समनायाः षट्पञ्चाशदुत्तरशतद्वयात्मको भाग इत्यर्थः "ततस्तदूर्ध्वम्" इति पदाभ्यां द्विगुणपदद्वयेन च स्पष्टं प्रतीयते। अत एवोत्तरार्धे "शक्त्यादीनां च मात्रांशो मनोन्मन्यास्तथोन्मनी" इत्यत्र मनोन्मनीति पदस्य समनापर्यायस्य समनापर्यन्तानामित्यर्थकत्वमङ्गीकृत्य शक्त्यादीनां तिसृणामित्यमृतानन्दैर्व्याख्यातम्।

तेषां स्थानानि

अथ वर्णानामुत्पत्तिस्थानान्याहुस्ते। तत्र मन्त्रमध्यगतानामेव वर्णानां स्थानप्रयत्नौ तत्रोक्तौ। तावतैव मदीयेष्टसिद्धिः स्यात्।

ककारत्रयम्, अकारदशकं च कण्ठे द्वितीयमक्षरं (ए) कण्ठतालुनि। ईकारचतुष्टयं तालुनि। लकारत्रयं सकारद्वयं च दन्तेषु। रेफत्रयं मूर्ध्नि। बिन्द्वादिनवकत्रयं नासायाम्। ककाराः स्पृष्टप्रयत्नाः। अकाराः संवृताः। ईकारा एकाराश्च विवृताः। रेफा लकाराश्चेषत्स्पृष्टाः। हकाराः सकारौ च ईषद्विवृताः। बिन्द्वादयः संवृततमाः। इत्याभ्यन्तरो यत्नः।

ककारा विवारश्वासघोषवन्तः। सकारौ महाप्राणवन्तौ विवारादिमन्तौ च। स्वराः सर्वेऽप्युदात्ताः। रेफा लकाराश्च संवारनादघोषाल्पप्राणवन्तः। हकाराः संवारादित्रयवन्तो महाप्राणवन्तश्च। बिन्द्वादयस्त्वात्यन्तिकसंवारादिचतुष्कवन्तः।

अथ मातृका

अत्रेयं शब्दसृष्टिप्रक्रिया—वटबीजान्तर्गतवटवृक्षीयसूक्ष्मरूपतुल्यशब्दसृष्टिसूक्ष्मरूपशालिनी पूर्वोक्तरूपा त्रिपुरसुन्दर्येव तादृशसूक्ष्मरूपवत्त्वप्रवृत्तिनिमित्तकपरापदवाच्या। सैव च माति तरति काशयतीति च व्युत्पत्त्या मातृकेत्युच्यते। तस्यां च निर्विकारायामप्यनादिसिद्धप्राण्यदृष्टवशात् स्वान्तः संहृतविश्वसिसृक्षोत्पद्यते। ततः स्रष्टव्यपदार्थानालोचयति, "तदैक्षत बहु स्यां प्रजायेय" (तै० २।२६) इति श्रुतेः। तादृशमीक्षणमेव प्रवृत्तिनिमित्तीकृत्य तस्यां पश्यन्तीति पदं प्रवर्तते। सैव पश्यन्त्याख्या मातृका करणसरणिमुत्तीर्णत्वादुत्तीर्णेत्युच्यते। तदवयवाश्च वामादयोऽष्टौ शक्तयोऽन्यत्र प्रपञ्चिताः। अतः सैव व्यष्टिसमष्टिभेदेन नवविधा। ततो नव नादा अविकृतशून्यादयो जाताः। तत्समष्टिश्च नादध्वन्यादिपदवाच्या नातिसूक्ष्मा परावत्, नातिस्थूला वैखरीवत्। अतो मध्याख्या मातृका मध्यमावयवरूपमविकृतशून्यस्पर्शनाद् अध्वनि बिन्दुशक्तिबीजाक्षराख्यं नादनवकं मूलाधारादिषटके नादे नादान्ते ब्रह्मरन्ध्रे च स्थितम्। नवभिर्नादैरेकच-

टतपयशकाराख्यवर्गनवकवती वैखर्याख्या मातृका जाता, वै निश्चयेन स्पष्टतरत्वात्, खं कर्णविवरवर्त्ति नभोरूपश्रोत्रेन्द्रियं राति गच्छति तज्ज्ञानजन्यविषयो भवतीति व्युत्पत्तेरित्याद्यन्यत्र विस्तरः।

एवं च ककारादौ कत्वादिवर्णधर्माणां षड्जत्वादिध्वनिधर्माणां चानुभूयमानत्वात् परिणामे परिणामिनोऽनुस्यूततया मृद्घटे दर्शनाच्च वर्णेषु नादोऽनुस्यूतः। तन्तुविशेषजन्यः पटविशेषो वर्णकपदवाच्यः। तत्र कप्रत्ययपरित्यागेन प्रयोगस्त्वक्षरवाचकवर्णपदेन श्लेषाथः। गुण इव वर्णकाख्यपटविशेषोपादानभूततन्तुविशेषवद् मालामण्याधारसूत्रवच्चेत्यर्थः। वर्णमध्यगत इत्यस्य द्वयोर्वर्णयोर्मध्यभागे वर्णशरीरान्तर्भागे च स्थित इत्यर्थः।

अयं भावः—द्वयोर्वर्णयोर्मध्यभागे मणिद्वयमध्यभागस्थशुद्धसूत्रवच्छुद्धनादस्य भानम्, वर्णशरीरान्तर्भागे तु पटाभेदेन संवलिततन्तुवद्घटान्तर्गतमृद्वच्च तत्तद्वर्णाभेदेनैव नादस्य भानम्। न पुनस्तत्र मण्यन्तर्गतसूत्रदृष्टान्तः, तस्य मणितोऽत्यन्तभिन्नत्वादिति।

अत्रेदमवधेयम्—इयं सृष्टिः परब्रह्मपरिणाम इति पूर्वमुक्तम्। सा च सृष्टिर्द्वेधाऽर्थमयी शब्दमयी चेति। सृष्टिद्वयं तु बालक्रीडनकार्थं स्थूलगृहसमानाकारत्वेन सूक्ष्मगृहनिर्माणतुल्यमर्थसृष्टावेवान्तर्गतम्, न पुनरत्यन्तं भिद्यते। सा च द्विविधाऽपि सृष्टिः समकालीनोत्पत्तिका समकालीनाभिवृद्धिशालिनी च, तथा बीजादङ्कुरतच्छाये। तत्र च छायादर्शनेन वृक्षानुमितिरनुभवसिद्धा। सा च छायायां वृक्षसमानाकारत्वं वृक्षाविनाभावं च विनाऽनुपपन्नेति तद्द्वयमपि तत्र कल्प्यम्। प्रत्यक्षसंवादविषयश्च तद्वच्छब्दः सर्वोऽर्थाविनाभूतः, अर्थज्ञानजनकज्ञानविषयत्वात् "वागर्थाविव संपृक्तौ" इत्याद्यभियुक्तोक्तेश्च। तथाऽर्थसमानाकारोऽपि। तथा हि—यावन्तः शब्देऽवयवास्तावन्त एवार्थे तज्ज्ञाने चाभ्युपेयाः। 'चैत्रस्तण्डुलं पचति' इत्यत्र चैत्रपदं सुप्रत्ययः तण्डुलपदम् अम्प्रत्ययः

पचधातुः तिप्रत्ययश्चेति षडवयवात्मकस्य शब्दसमूहस्य चैत्रः, कर्तृत्वम्, तण्डुलः, कर्मत्वम्, तेजःसंयोगः, कृतिश्चेति विशकलिताः षडर्थाः। तेषां च परस्परसमभिव्याहारस्य तु परस्परसंबन्धविशेषोऽर्थः। तत्तत्पदार्थविशिष्टा भावनैव पदार्थ इति मीमांसकाः। तत्तदितरव्यावृत्तिर्वाक्यार्थ इत्यपि केचित्। एवं तज्ज्ञानमपि षट्पदार्थांस्तत्संबन्धादींश्च विषयीकुर्वत् तत्समानाकारं भवति, अन्यथा ज्ञानानां परस्परवैलक्षण्यानुपपत्तेः। अन्तःकरणपरिणामविशेषरूपे ज्ञाने तत्तदाकारत्वेन परिणतत्वकल्पनसम्भवाच्च। अत एव 'चैत्रस्तण्डुलं पचति' इत्याकारकं ज्ञानमित्येव सकलतार्किकाणां निराकारवादिनामपि व्यवहारः।

अनयोः सृष्ट्योर्ज्ञानजनकं तु मन एव। तच्च शब्दं श्रोत्रेन्द्रियद्वारैव गृह्णाति, अर्थं तु कञ्चन साक्षात् कञ्चन चक्षुरादिद्वारेति विशेषः। ते च द्वे अपि सृष्टी स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमभेदात् प्रातिस्विकं चतुर्विधे। श्रोत्रमनसोस्त्वर्थान्तरपातित्वाच्चातुर्विध्यम्। एवं च स्थूलश्रोत्रेण स्थूलशब्दश्रवणात् स्थूलार्थस्य स्थूलमनसा ज्ञानम्, सूक्ष्मश्रोत्रेण सूक्ष्मशब्दश्रवणात् सूक्ष्मार्थस्य सूक्ष्ममनसा ज्ञानमित्यादि द्रष्टव्यम्। श्रोत्रमनसोः सूक्ष्मत्वादिकं तु शास्त्राभ्यासयोगाभ्यासादिपाटवजन्यम्। तदेतद् योगशास्त्रे "निर्विचारवैशारद्येऽध्यात्मप्रसादः" इति सूत्रे, "ऋतम्भरा तत्र प्रज्ञा" इति सूत्रे च स्पष्टम्। अत एव श्रुतिः—

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्याः वदन्ति ॥ इति।

तेषां नामानि वैखरी मध्यमा परेति। श्रुतौ तुरीयपदस्य वैखर्य्यर्थः,

सृष्टिक्रमस्यैव तत्राभिप्रेतत्वात् ।[1] एतच्छब्दचतुष्टयवाच्या अर्थास्तथा तथोन्नेयाः। तथा हि—मस्तकाद्यवयवेन्द्रियप्राणदशकशालित्वं स्थूलजगदादिव्यक्तौ तथा सद्योजातशिशावपि पिपीलिकादावपीत्यविवादम्। इयांस्तु विशेषः—स्थूला अवयवाः स्थूले, अल्पास्त्वल्पे। एवं च वैखरीरूपघटपदवाच्यापेक्षया मध्यमादिरूपघटपदैर्वाच्या घटा युक्तिभिरुन्नेयाः।

ते च पदार्थाः संकोचमञ्चन्तः केचिदस्पष्टनिखिलावयवकाः, केचित्तु संकुचज्जलूकाकमठादिवदस्पष्टकिञ्चिदवयवका अपि; अवयवन्यूनाधिकभावेन परिणामभेदेऽपि द्रव्याभेदस्य मीमांसकादिभिरङ्गीकारादिति यथायथमूहितव्यम्। एतेषां चतुर्णां वाचकानां चतुर्भ्यो वाच्येभ्यो भेदा अपि चत्वारः कल्पिताः स्थूलादिरीत्या चतुर्विधा ज्ञेयाः।

---

१. ननु "श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः" इति भाष्येण मध्यमान्तानां वाचां शब्दत्वं नायाति, तासां भाष्योक्तशब्दलक्षणानाक्रान्तत्वादिति चेन्न; तत्र प्रयोगेणाभिज्वलित इत्यंशस्य लक्षणशरीरबहिर्भूतत्वेन प्रकृष्टेन योगेन समाधिना प्रदीप्तेनेत्यर्थकत्वेन वा तासु वाणीषु लक्षणसंगमने बाधाभावात्। न च सूक्ष्मश्रोत्रस्वीकारेण मध्यमारूपशब्दे लक्षणं संगमयितुं शक्यते। पश्यन्त्यां तु तल्लक्षणसंगतिः सर्वथा दुर्घटा। "आपः पवित्रं परमं पृथिव्याः" इति भूमिकोक्तरीत्या पश्यन्त्यवस्थायां सूक्ष्मश्रोत्राभिव्यक्तेरभावादिति वाच्यम्, तत्र श्रोत्रपदस्य यौगिकत्वेन श्रवणकरणार्थकतया पश्यन्त्या ज्ञानं यद्द्वारा जायते तस्यैव श्रोत्रपदेन व्यपदेशे तद्द्वारैव पश्यन्तीरूपाया वाच उपलब्धौ बाधकाभावात्। अनयैव रीत्या पराया अपि शब्दत्वे न किञ्चिद् बाधकमुपलभामहे।

यद्वा वैखरीरूपामेव वाचमधिकृत्य तद्ग्राह्यं प्रवृत्तमिति स्वीकारे न कापि नो हानिरित्यपि वक्तुं शक्यते।

सृष्टिचतुष्टयस्यापि मूलभूतो बिन्दुर्बीजस्थानापन्नः। तस्मादपि परतस्तु सूक्ष्मतमापेक्षया सूक्ष्मतममपि विशिष्य तद्वाचकत्वादभिन्न-शब्दार्थरूपं शब्दब्रह्मेत्यादिपदनिर्देश्यं परं ब्रह्मैव। तच्च प्रकाशैकाकार-स्यार्थादत्यन्तभिन्नस्य शब्दब्रह्मेत्यादिपदनिर्देशविशेषस्याभावादनिर्देश्यम् (अग्राह्यम्) अशब्दमस्पर्शम् इत्यादिनिषिद्धविशेषणम्। वस्तुतः सृष्टिद्वयमूलभूतसूक्ष्मरूपविशेषात्मकत्वादभिन्नशब्दार्थरूपं शब्दब्रह्मे-त्यादिपदनिर्देश्यं परं ब्रह्मैव।

तच्च प्रकाशैकस्वरूपम्, 'घटः स्फुरति, पटः स्फुरति' इत्यादिप्रत्ययेन पदार्थमात्रे स्फुरणाख्यवस्तुविशेषणस्य तत्तदभिन्नस्यानुभवसिद्धत्वात्। प्रकाशस्यापि स्फुरणमवश्यं वाच्यम्, 'प्रकाशः स्फुरति' इति प्रत्ययात्। तच्च स्फुरणं शक्तिरित्युच्यते। प्रकाशस्फुरणयोश्च मिलितयोरेव कार-णत्वम्, अन्यतरमात्रस्य जनकत्वानुपपत्तेः कामकलाविलासव्याख्यायां स्फुटतरमुपपादनात्। तेन शुद्धस्य शिवस्य शुद्धायाः शक्तेर्वा जगत्कारणत्वं तत्र तत्रोच्यमानं शिवशक्तिरूपस्योभयात्मन एव बोध्यम्। तत्र प्रकाशस्त्व-कारस्वरूपस्तद्वाच्यश्च। स्फुरता च हकाररूपा तद्वाच्या च। तावेता-वकारहकारौ परारूपौ सूक्ष्मतमौ प्रागुक्तौ। परादिसृष्टिमूलभूतस्य बीजस्थानीयस्य बिन्दुविशेषस्य तु व्यक्ताव्यक्तविलक्षणौ वाचकौ। तस्यापि जनकस्य परब्रह्मणस्तु केवलमव्यक्तावेव शून्यरूपौ वाचकौ। तयोः शून्यस्वरूपत्वादेव "यतो वाचो निवर्तन्ते" (तै० ३।२।४) इत्यादिश्रुतिभिरवाच्यतोक्तिः, वाच इति बहुवचनेन परादिचतुष्टयस्यैव परामर्शात्। तथा स्मर्यते—

अहमित्येकमद्वैतं यत्प्रकाशात्मविभ्रमः।
अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः॥
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्त्तितः।
अनयोः सामरस्यं यत् परस्मिन्नहनि स्फुटम्॥ इति।

"अक्षराणामकारोऽस्मि" इति गीता च। "शून्याकाराद् विसर्गान्ताद् बिन्दुप्रस्पन्दसंविदः" इति योगिनीहृदयं च। शून्याकारः शून्यमात्रस्वरूपो यो विसर्गान्तः षोडशस्वरान्त्यस्तस्माद् बिन्दुविशेष उत्पन्न इति तदर्थः। विसर्गस्याव्यक्तहकारतुल्यत्वेनाकारस्यापि तत्र सत्त्वेन षोडशस्वरकीर्तनं प्रकृतम्। तेनाकारहकारावेव शून्याकारौ कीर्तितौ वेदितव्यौ। अत एव शून्यश्चासावकारश्चेति केचिद् व्याख्याय विसर्गो हकारः स एवान्ते यस्येति विग्रहप्रदर्शनपूर्वकं हकारविशिष्टादकारादिति व्याचक्षते। तन्मते हकारे शून्यत्वलाभो दुर्घटः।

अत्रायं सृष्टिक्रमः—यथा हि कश्चित् पुरुष उत्पत्स्यमानपुत्राद्यदृष्टवशाद् उत्पादनेच्छाविशिष्टः स्वीयामुत्पादनशक्तिमवलोक्य स्वार्धशरीरात्मिकायां भार्यायां स्वयमन्तः प्रविशति शुक्रूरूपेण, "पतिमेकादशं कृधि", "आत्मा वै पुत्रनामासि" इति श्रुतेः। प्रविशतः स्वाभिन्नत्वात् स्थूलतरभेदाक्रान्तत्वाच्च नाभेदभानम्। ततस्तस्य शुक्रस्य शोणितरूपेण भार्या प्रविशति। तेन च स बिन्दुरुच्छूनो भवति। स एव वटोदुम्बरादिबीजस्थानीयः। तस्मादङ्कुरविशेषाद्युत्पत्तिक्रमेण कालान्तरे पुत्राद्युत्पत्तिरिति। यथा वा सूर्याभिमुखदर्पणे तदन्तःप्रविष्टकिरणादुभयकिरणसंकलनरूपस्तेजोबिन्दुविशेषः कुड्यादौ प्रादुर्भवति, तथा प्राण्यदृष्टवशात् स्वान्तःसंहृतविश्वसिसृक्षया प्रकाशरूपं ब्रह्म स्वीयां शक्तिमवलोकयितुं तदभिमुखीभूय तदन्तस्तेजोरूपेण प्रविश्य शुक्रबिन्दुभावमयते। ततस्तं बिन्दुं रक्तरूपा शक्तिः प्रविशति। तेन संमिश्रबिन्दुरुच्छूनो भवति। तत्र च हार्दकलारूपोऽप्येकः पदार्थविशेषो भवति। स च बिन्दुः समष्टिरूपेणैकः स्फुटशिवशक्तिसामरस्यनामा कामो रविरग्निषोमात्मक इत्यादिशब्दैर्व्यवह्रियते। व्यष्टिरूपेण द्वयम्। तत्र शुक्र इन्दू रक्तोऽग्निरिति बिन्दुद्वयात्मकत्वाद् विसर्ग इति च व्यवह्रियते। अत एव च खे रात्रावग्नावमावास्यायां चन्द्रे च प्रवेशस्य

श्रुत्यादिसिद्धत्वात् समष्टिबिन्दो रवित्वम्। एवं च कामाख्यो बिन्दु-र्विसर्गो हार्दकला चेति त्र्यवयक एकः पदार्थोऽणादिप्रत्याहारवत् कामकलेत्युच्यते। इदमेव च समस्तसृष्टिबीजम्। अत एव अकार-हकारयोर्मध्ये सर्ववर्णपाठः। ककारस्य लकारादभिन्नत्वात् क्षकारस्य कषसंयोगरूपत्वान्न तद्बहिर्भावः शङ्क्यः। एतन्मूलभूतं ब्रह्म तुरीयं बिन्दुरित्युच्यते। तद्रूपाभ्यां शून्यस्वरूपाभ्यामकारहकाराभ्यामुत्पन्ना कामकला व्यक्ताव्यक्तविलक्षणाऽहंपदवाच्या। अकारहकारोभयात्मकं शिवशक्तिद्वयरूपत्वं चाहंपदस्य निष्कृष्टोऽर्थः। अत एव तज्जन्यानां सूक्ष्मादिस्थूलान्तानामखिलसृष्टीनामहंपदवाच्यत्वम्। यथा ह्युदुम्बर-पदवाच्यबीजाज्जनितानां परस्परविलक्षणानामपि पर्णकाष्ठकुसुमफल-क्रिमीणां सर्वेषामुदुम्बरत्वम्, उदुम्बरपर्णम् (उदुम्बरक्रिमिः) इत्यादि-व्यवहारात्। तथा च श्रुतयः—"ब्रह्म वा इदमग्र आसीत्। तदात्मान-मेव वेदाहं ब्रह्मास्मि" इति बृहदारण्यके, "त्वं वा अहमहं वै त्वम्" इत्यैतरेयके, "कस्त्वमित्यहमिति होवाच त्वमेवेदं सर्वं तस्मादहमिति सर्वाभिधानम्" इति तापनीये। पाणिनिनाऽप्यस्मच्छब्दस्य सर्वनाम-तोक्ता। तत्रैवान्यत्र—"तद्वा एतद् ब्रह्माद्वयम्" इत्यादिना ब्रह्मस्वरूप-मभिधाय तदुपासनां पूर्णाहंभावभावनारूपां "हंसः सोऽहम्" इत्यादिना विदधाति। तत्प्रकारस्त्वतिरहस्याद् गुरुचरणैकलभ्यः। उक्तं च कादिमते—

बन्धनं योनिमुद्राया मन्त्राणां वीर्ययोजनम्।
गुरोर्लक्षणमेतावदादिमन्त्यं तु वेदयेत्॥

आदिमोऽकारः, अन्त्यो हकारः, तयोः समाहारः (अहम्)। बिन्दु-लाभायैवेतरेतरद्वन्द्वपरित्यागेन समाहारद्वन्द्वोक्तिः। छान्दोग्येऽपि—"अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वम्" (७।२५।१) इति। विरूपाक्षपञ्चाशिकायामपि—

स्वपरावभासनक्षम आत्मा विश्वस्य यः प्रकाशोऽसौ।
अहमिति स एक उक्तोऽहन्ता स्थितिरीदृशी तस्य॥ इति।

इत्यादिपरःसहस्रं वचनानि। एतादृशस्याहंपदार्थस्य यथाऽहमिति पदं वाचकं तथोत्तमपुरुषैकवचनमपि वाचकम्। तस्य च परस्मैपदात्मनेपदभेदेन द्वैविध्येऽपि मिप इटश्चेकारत्वेनानुगमनादित्वमेव शक्तावच्छेदकम्, "अन्यायश्चानेकशब्दत्वम्" इति न्यायात्।

तस्य च धातूत्तरत्वेनोत्तमपुरुषत्वादिना वोपस्थितिः पदार्थस्मारकत्वे तन्त्रम्। एर्णलादावपि स्मरणम्। तदभावे शक्तिभ्रमाद् बोध इत्यादि यथायथमूह्यम्। तत्र चाकारहकारयोरवयवयोरदर्शनेऽपि शास्त्रप्रामाण्यात् सूक्ष्मरूपौ तौ स्त इति स्वीकार्यम्। तस्यैव च हार्दकलायोगे दीर्घताऽपि संपद्यत इति तुरीयस्वरस्य कामकलारूपत्वं मन्त्ररहस्यविद्भिः प्रतिपाद्यते। तदुक्तं योगिनीहृदये—

मध्यबिन्दुविसर्गान्तः समास्थानमये परे।
कुटिलारूपकं तस्याः प्रतिरूपं वियत्कले॥ इति।

मध्यबिन्दुः कामाख्यः, तस्य तुरीयबिन्दुविसर्गमध्यपातित्वात्, समष्टेर्व्यष्टिमध्य एवान्तर्गतत्वाच्च। विसर्गव्यष्टिरूपं बिन्दुद्वयम्, तयोरन्तर्मध्ये सम्यक् चैतन्यात्मनाऽवस्थानम्। तन्मये तत्प्रधाने। परे चरमेऽकारहकाररूपेऽक्षरे मातृकाणां क्रमेण पाठे चरमत्वाद्धकारस्य, व्युत्क्रमेण पाठे त्वकारस्य चरमत्वात्। किञ्च, इमे अक्षरे कुटिलारूपके। कुटिले अकुलकुले कुण्डलिन्यौ तयो रूपान्तरे। तावता कामविसर्गयोः किमायातमित्यत आह—तस्या इति। तयोः कुण्डलिन्योरित्यर्थः। वियत्पदेन शून्याकारत्वात् कामः प्रतिपाद्यते। कलापदेन च हार्दकलावत्त्वाद् विसर्गः। यतः कामविसर्गयोः कुण्डलिनीप्रतिबिम्बरूपत्वम्, ततः कुण्डल्या भिन्नाकारहकाररूपत्वं संभवतीति भाव इत्यस्य श्लोकस्य साम्प्रदायिकी रहस्यव्याख्या।

एवमकारहकारैकस्वरूपा कामकला। तद्भूते मन्त्रे विजातीयाक्षरवत्त्वान्यथानुपपत्त्याऽपि तयोर्गर्भे सूक्ष्मरूपे वान्येषां वर्णानामर्थसृष्टेश्चावस्थानं सिध्यति, यथा वटबीजरूपे संपुटे पर्णकाष्ठादेः। किञ्च, वटादिबीजानां स्फोटेनैवाङ्कराद्युपपत्तिरिति बीजस्य पूर्वार्धोत्तरयोर्वियोग इत्यविवादम्।

तच्चार्धद्वयं महति वृक्षे कस्मिन् कस्मिन् भागेऽस्तीति दुर्ज्ञेयम्। एवं मन्त्रेऽपि बीजांशयोरकारहकारयोरवस्थितयोः परिज्ञानाय संकेतभाषयोक्तं योगिनीहृदये—

"मध्यप्राणप्रथारूपस्पन्दव्योम्नि स्थिता पुनः।
मध्यमे मन्त्रपिण्डे तु तृतीये पिण्डके पुनः॥
राहुकूटाद्वयस्फूर्जत्" इति।

अस्यार्थः—कलाकामयोर्मध्यस्य विसर्गस्य यः प्राणश्चैतन्यं तस्य प्रथा पृथुत्वेन श्रूयमाणता। स्थूलतेति यावत्। तद्रूपं यत् स्पन्दव्योम हकारः, स्पन्दत उत्पद्यत इति स्पन्दम्, स्पन्दं व्योम यस्मादिति व्युत्पत्तेः। "हकाराद् व्योम संभूतम्" इत्युक्तेरिति केचित्। मध्यात्मको विसर्गभिन्नो यः प्राणो हकारस्तस्य प्रथारूपो यः स्पन्दः, स्थूलरूपा सृष्टिरित्यर्थः। तद्रूपं व्योम हकार इत्यर्थो युक्तः, "हः शिवो गगनं प्राणः" इति मातृकाकोशात्। मध्यम इत्यस्य द्विरन्वयः। तत्रैकं पदं मन्त्रपिण्डेन सह सामानाधिकरण्येनान्वेति, अपरं वैयधिकरण्येन। मध्यमकूटस्य मध्यमव्यञ्जने। द्वितीयहकार इत्यर्थः। द्वितीयगेषु सप्तसु व्यञ्जनेषु तस्य चतुर्थत्वेन मध्यमत्वात्। तत्र स्थिता। स्त्रीलिङ्गाच्छक्तिविशेष्या। तृतीये कूटे तु सकारेऽकारो मूलबीजीय इत्याह—राहुकूटेति।

लघुषोढान्यासान्तर्गतमहन्यासे राहोः शषसहाख्यवर्णचतुष्टयसहितस्य वक्त्रे न्यासः, "वक्त्रेशादिचतुर्वर्णैः सहितं राहुमेव च" इति

वचनात्। तेन शादिचतुष्कं राहुकूटम्। तत्र द्वयाद् भिन्नोऽद्वयस्तृतीयः सकारः। तस्मिन् स्फूर्जच्छोभमानम्। नपुंसकलिङ्गत्वाद् ब्रह्म विशेष्यम्। शिव इत्यर्थः। इत्यलमतिरहस्यप्रकाशनेन। अपि च नित्याषोडशिकार्णवे—

यदक्षरमहासूत्रप्रोतमेतद् जगत्त्रयम्।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम्॥ (श्लोक. ५)

व्याख्यायाम्—यस्या मातृकाया अक्षरैरेकपञ्चाशत्संख्यैर्महासूत्रैर्ब्रह्माण्डादिकटाहपर्यन्तं स्थूलतमादिसूक्ष्मतमान्तं प्रोतं स्यूतम्। सर्वस्यापि जगतो वाचकाः शब्दा मातृकाघटिता एवेति भावः। इत्यादौ पञ्चाशदेव वर्णा उपन्यस्ताः। किञ्च, गणेशग्रहनक्षत्रेतिश्लोकव्याख्यायां ग्रहेषु तु सूर्यः षोडशस्वरूपः। मङ्गलबुधगुरुशुक्रशनैश्चराः कादिवर्गपञ्चकरूपाः। चन्द्रराहू अन्तस्थोष्मरूपौ। क्षकार एकः केतुरूपः। ळकारस्तु लकारेणैव गतार्थ इति संप्रदायः।

षोडश स्वराः, कादीनि व्यञ्जनानि

तथा चात्र 'अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः' इति षोडश स्वराः, कादयः पञ्चवर्गाः पञ्चविंशतिः, यरलवाश्चत्वारः, शषसहाश्चत्वारः, क्षकारेण सह पञ्चाशद् वर्णा उपन्यस्ताः। ते च वर्णमालायां मन्त्रजपार्थमप्युपयुज्यन्ते। कामकलाविलासरीत्या तु यथा कश्चिद्राजा स्वात्माभिमुखस्वच्छादर्शतले स्वात्मप्रतिबिम्बं सम्यक् प्रसमीक्ष्य तत् प्रतिबिम्बम् अहमिति जानाति, एवं प्रकाशमात्रतनुः परमेश्वरोऽपि स्वाधीनीभूतां स्वात्मशक्तिं सम्यग् अवलोक्य स्वस्वरूपमवगच्छति। यथा लोके सूर्याभिमुखदर्पणतले सूर्यकिरणप्रतिफलनानन्तरं निकटगतकुड्ये सूर्यकिरणप्रतिहततेजोबिन्दुः प्रत्यक्षं प्रपद्यते, तद्वत् प्रकाशरूपपरमेश्वरस्य दर्पणवत् स्वस्वरूपविमर्शसम्बन्धे जाते तदानीं

तत्र महाबिन्दुः 'पूर्णोऽहम्' इत्येवंरूपः परमेश्वरोऽवभासते। एवं च प्रत्याहारन्यायेन अन्तर्गतसमस्तवर्णकदम्बकाहङ्काररूपप्रकाशविमर्श-संपुटादेव शब्दार्थात्मकसर्वप्रपञ्चविकासो भवति। "एको वर्णो बहुधा शक्तियोगाद् वर्णाननेकान् निहितार्थो दधाति" इति श्रुत्या, "यः परः स महेश्वरः" इत्युक्त्या च निखिलवेदादिशब्दोत्पादकानुत्तराभिधेयः परमेश्वरः स्वाङ्गभूताखिलप्रपञ्चविलयात्मकविमर्शशक्तिम् अनुप्रविश्य बिन्दुभावं मन्यते। ततः सा विमर्शशक्तिरपि स्वान्तर्गतप्रकाशमय-बिन्दुमनुप्रविशति। ततश्च बिन्दुरुत्पन्नो भवति। तस्माद् बिन्दो-र्नादात्मिका समस्ततत्त्वगर्भिणी तेजोमयी जीवरूपा वालाग्रवत् सूक्ष्म-रूपिणीति गत्या शृङ्गाटकरूपतामुद्गृह्णाति। एवं बिन्दुनादस्वरूपयो-स्तयोः प्रकाशविमर्शयोर् अहमिति शरीरं भवति। एवं द्विरूपयो-स्तयोर्मध्ये एको विमर्शो रक्तरूपतां भजते, अपरः प्रकाशः शुक्लबिन्दु-भावमेति, उभयोर्मेलने मिश्ररूपं सर्वतेजोमयं परमात्मस्वरूपं भवति।

अयमत्र निष्कर्षः—स्वान्तर्गतानन्ताक्षरराशिमहामन्त्रवीर्यपूर्णाहन्ता-रूपिणी प्रकाशानन्दसारा बिन्दुत्रयसमष्टिरूपलिप्यक्षररूपिणी कामकला नाम महात्रिपुरसुन्दरी मातृका परमयोगिभिर्महामाहेश्वरैरनिशमनु-स्मर्तव्या। तथा चोक्तं कामकलाविलासे—

स्फुटितादरुणाद् बिन्दोर्नादब्रह्माङ्कुरारवो व्यक्तः।
तस्माद् गगनसमीरणदहनोदकभूमिवर्णसंभूतिः॥

स्फुटिताद् बिन्दोर् उत्पादनशक्तिविशिष्टो ब्रह्मपदवाच्यो नादः पश्यन्त्यादिरूप आविर्भूतः। तथा चोक्तम्—

एको नादात्मको वर्णः सर्वनादाविभागवान्।
सोऽनन्तमितरूपत्वादनाहत इति श्रुतः॥

तस्मात् शब्दाद् गगनसमीरणदहनोदकभूमीनां पञ्चभूतानां वर्णानाम् आदिक्षान्ताक्षराणां च संभूतिर् उत्पत्तिराम्नाता।

अथ विशदादपि बिन्दोर्गगनानिलवारिभूमिजनिः।
एतत्पञ्चकविकृतिर्जगदिदमण्डाद्यजाण्डपर्यन्तम् ॥

पूर्वं शोणबिन्दोः सर्वात्मत्वं सर्वस्रष्टृत्वं चोक्त्वा तदिह शुभ्रबिन्दोरपि तत्स्वरूपतामतिदिशति। तथा च वाग् वर्णपदमन्त्ररूपा, अर्थः कलातत्त्वभुवनात्मा। एतद्वागर्थरूपत्वं तस्याः, प्रकाशविमर्शात्मकशब्दार्थाभ्यामेव षडध्वात्मकसकलप्रपञ्चोत्पत्तिश्रवणात्।

अयमत्र विवेकः—इयमेव प्रकाशविमर्शमयी पराशक्तिः पञ्चभूतात्मिका उत्तरोत्तरवृद्धिद्वारा पञ्चदशसंख्याकमात्राक्षरतिथ्यभिमानिदेवतास्वरूपिणी जाता। यथागमः—

एक एव प्रकाशाख्यः परः कोऽपि महेश्वरः।
तस्य शक्तिर्विमर्शाख्या सा नित्या गीयते बुधैः ॥
विमर्शाख्या च सा देवी पाञ्चविध्यं समागता ॥
आकाशानिलसप्तार्चिःसलिलावनिभेदतः ।
एकैकगुणवृद्ध्या तु तिथिसंख्यात्वमागता ॥
विमर्शरूपिणी विद्या षोडशी या प्रकीर्तिता।
गता सा षोडशैर्भेदैस्त्रिपुरा परमेश्वरी ॥ इति।

सप्तमं दलम्

पूर्वं मया भूमिकायां प्रतिज्ञातं यद् व्याकरणं नाम सर्ववेदपारिषदं शास्त्रम्। निरुक्तं तु व्याकरणस्यैव कात्स्न्र्यम्। निरुक्तमन्तरा व्याकरणमपूर्णं भवति। यथा महाभारतस्य निखिलो हरिवंशस्तथा व्याकरणस्य

कात्स्न्यं निरुक्तम्। एवमेव शिक्षामन्तरा साधुपदवाक्योच्चारणमसम्भवि। यद्यपि प्रातिशाख्ये शिक्षा छन्दोऽपि च प्राधान्येन गृहीते, तथापि व्याकरणास्यापि[1] प्राधान्यं नापलपितुं शक्यते। अतः प्रातिशाख्यानुसारं वर्णविषये किञ्चिद् विचारणीयम्।

अथ ऋक्

तत्रादौ ऋक्प्रातिशाख्यानुसारं किञ्चिदुपस्थाप्यते। तत्र पदवाक्यविचारोपयोगिनं वर्णक्रममाह--

"अकारर्कारावि उ ए ओ ऐ औ" (ऋक्प्रा० सू० ८)

'अ ऋ इ उ ए ओ ऐ औ' इत्येवं क्रमेण अष्टौ स्वरा निर्दिष्टाः। तत्र हि नहि पाणिनीयक्रमो नापि तत्तत्स्थानानुसारेण क्रमिकतया 'अ इ ऋ ऌ उ ए ऐ ओ औ' इत्येवं पाठः स्वीकर्तव्यः, वक्ष्यमाणसूत्रेषु तत्तत्संज्ञाकरणार्थमस्यैव पाठस्य युक्तियुक्तत्वात्।

"पदाद्यन्तयोर्न ऌकारः स्वरेषु" (सू० ८),

"अकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्वेषु" (सू० ८)

पदस्यादौ अन्ते च ऌवर्णः स्वरेषु न गृह्यते पदमध्ये तु गृह्यते। तेषां मध्ये मध्ये पञ्चसु अ ऋ इ उ ऌ इत्येतेषु द्वितीया दीर्घा अपि पठनीयाः। तथा च अ आ ऋ ॠ (ऌ ॡ) इ ई उ ऊ इत्येवं क्रमो वेदितव्यः।

अथ व्यञ्जनानि

"कखौ गघौ ङः, चछौ जझौ ञः, टठौ डढौ णः, तथौ दधौ नः, पफौ बभौ मः, यरलवाः, हशषसाः, अः, ५क, ५प, अं—इति वर्णराशिः क्रमश्च" (सू० १०)।

---

१. "न पूर्वशास्त्रे न पूर्वशास्त्रे" (तै. प्रा. अ. १९ सू. ५) अस्मिन् सूत्रे वैदिकाभरणे—"अस्य शास्त्रस्य मूलभूतं व्याकरणं पूर्वशास्त्रमित्युच्यते" इति। एतेन व्याकरणानन्तरं प्रातिशाख्यानि निर्मितानीति प्रतीयते।

यद्यपि द्विविध लृकारो मया "आकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्वेषु पदाद्यन्तयोर्न लृकारः स्वरेषु" इति सूत्रानुसारं सन्निवेशितः, तथापि सूत्रकारः पाठेषु तं न गणयति। यतो हि—"अष्टौ समानाक्षराण्यादितः" (ऋ० पा० प० १ सू० १), "ततश्चत्वारि सन्ध्यक्षराणि" (ऋ० पा० प० १ सू० २) इमे सूत्रे तेनोपन्यस्ते, तयोः संगतिः लृकारद्वयपाठेनासम्भविनी स्यात्। तथा चात्र समानाक्षरसन्ध्यक्षरेति संज्ञाद्वयमेषां निर्दिश्यते, एते स्वरपदवाच्याश्च भवन्ति। तत्र भाष्ये—ननु कथं वर्णसमाम्नायमनुपदिश्यैव "अष्टौ समानाक्षराण्यादितः" (ऋक् प्रा० ६१।१) इति सूत्रितम्, उपदिष्टस्य हि व्यपदेश एवमुपपद्यते, इति चेन्न, उपदिष्टो वर्णसमाम्नायो लौकिको वेदितव्य इति स्वीकारात्। तत्र यावन्तो वर्णा अस्यां शाखायामुपयोक्ष्यन्ते तावतां संज्ञां कर्तुं तमेव वर्णसमाम्नायमुररीकृत्य "अष्टौ समानाक्षराण्यादितः" (१।१), तथा तामेवानुपूर्वीमङ्गीकृत्य "चत्वारि सन्ध्यक्षराणि" (ऋक् प्रा० १–२) इत्युक्तम्। ननु यदि लौकिकोऽत्र वर्णसमाम्नायो गृह्यते, एवं तर्हि सैवानुपूर्वी निर्देष्टव्या। तथा च लोके अकारात् परौ ऋॠकारौ समामनन्ति। उ ऊ ऋ ॠ इति, तथा ए ऐ ओ औ इति च। सकारात् परं हकारं समामनन्ति, श ष स ह इति। आचार्यप्रवृत्त्या क्रमोऽन्यथाऽनुमीयते। तद् यथा—"ऋकारादयो दश नामिनः स्वराः" (१।६५)। यद्याकारात् परौ ऋॠकारौ पठ्येते, तदानीं दश-नामिनः स्वराः संपद्यन्ते। तथा सन्ध्यक्षरेषु च क्रमोऽन्यथाऽनुमीयते। तथाहि—"सन्ध्येष्वकारोऽर्धमिकार उत्तरम्, युजोरुकारः" (१३।३९) इति। यदि ए ओ ऐ औ एवं पाठो भवति, तदानीं युजोरुत्तरमर्धमुकारः संपद्यते। तथा यदि शकारात् पूर्वो 'हशषस' इत्येवं हः पठ्यते, तदानीं "दुःस्पृष्टं तु प्राग्धकाराच्चतुर्णाम्" (१३।१०) इत्यनेनायं पाठक्रम उपपद्यते। तथा चाचार्यप्रवृत्त्या द्विविधो लौकिकः पाठक्रमः सिध्यति।

"इपरो दीर्घवत् प्लुतः" (१।४) इत्यनेन प्लुतस्येकारस्य सत्ता सिध्यति। "अनुस्वारो व्यञ्जनं वा स्वरो वा" (१।५) इत्यनेन सूत्रेण अनुस्वारस्य केचन स्वरधर्मा ह्रस्वत्वदीर्घत्वप्लुतत्वोदात्तत्वानुदात्तत्व-स्वरितत्वानि। अर्धमात्राकालता संयोगश्चेति व्यञ्जनधर्माः। अत उभयधर्मत्वं यथायोगमनुसन्धेयम्। तत्र भाष्ये—"तस्मात् स्वर-व्यञ्जनातिरिक्तं वर्णान्तरमेतदिति व्याख्यानार्थं सूत्रमेतत्" इत्युक्तम्। तथा तेन रूपेण सिद्धं वस्तु नापह्नोतुं शक्यते। स्वरानुस्वारव्यतिरिक्तो व्यञ्जनसंज्ञो भवति। तेषां व्यञ्जनानामाद्या वर्णाः कादयो मान्ताः स्पर्शाः। ते च स्पर्शाः पञ्चवर्गाः। पञ्चानां पञ्चानां वर्ग एषां भवति। एवं सति पञ्चवर्गास्ते भवन्ति।

तेभ्यः स्पर्शेभ्योऽनन्तराश्चतस्रोऽन्तस्थसंज्ञिका वर्णव्यक्तयः। अन्त-स्थाभ्य उत्तरे अष्ट ऊष्मसंज्ञकाः। यथा ह श ष स अः ≍क ≍प अं इति। तेषामेवोष्मणामन्त्याः सप्त अघोषाः। यथा श ष स अः ≍क ≍प अं, इति। प्रतिवर्गं प्रथमद्वितीयावघोषौ—क ख च छ ट ठ त थ प फेति। पारिशेष्यादन्यानि व्यञ्जनानि घोषवन्ति। वर्गे वर्गे द्वितीयचतुर्थौ सोष्माणौ। यथा ख घ छ झ ठ ढ थ ध फ भेति। प्रतिवर्गम् अन्त्या ङ ञ ण न मा अनुनासिकाः। अन्यत् सर्वं नास्मत्प्रयोजनं साधयति, अतस्तन्नोपन्यस्यते। ह्रस्वस्वरो मात्राकालः, समासवर्तिनोः पदयोः पृथक्करणे मात्राकालो लगति। द्विमात्रो दीर्घः, त्रिमात्रः प्लुतः। अधः स्विदासी३त्, उपरिस्विदासी ३ इत्। विन्दती ३ (यजु० ३३।७४)। एतेषु त्रिष्वेव स्थलेषु प्लुतो भवति। रेफादुत्तरा स्वरभक्ती रेफसदृशी भवति। लकारादुत्तरा तु लकारसदृशी। स्वरभक्तिः अर्धमात्रा पादमात्रा च भवति। अकाराकारौ कण्ठ्यौ। ऊष्मणां मध्ये हकारविसर्जनीयौ कण्ठस्थानौ। केषाञ्चिन्मते एतौ 'ह अ' इति उरःस्थानौ वेदितव्यौ। ऋ ॠ ऌ ॡ ≍क क ख ग घ ङ, एते जिह्वामूलस्थाना वेदितव्याः।

लृकारोक्तिस्त्वत्र प्रासङ्गिकी ज्ञातव्या, एतदभिमतवर्णसमाम्नाये पाठाभावात्। ए ऐ इ ई च छ ज झ ञ य श एते एकादश तालुस्थानाः। ष ट ठ ड ढ ण एते षण् मूर्धस्थाना ज्ञेयाः। त थ द ध न एते पञ्च दन्तमूलस्थानाः। सकाररेफलकाराश्च दन्तमूलस्थानाः। रेफस्तु वर्त्वस्थानः। दन्तमूलादुपरि उच्छूनः प्रदेशो वर्त्व उच्यते एकेषां मतेन। उ ऊ ओ औ प फ ब भ म व उपध्मानीय एते एकादश ओष्ठ्स्थाना वेदितव्याः। यमा अनुस्वाराश्च नासिकास्थानाः। वर्णानामधिकरणं स्थानशब्देनोच्यते।

अत्र यमोपदेश इति सूत्रेण कण्ठ्योऽकार इत्यारभ्य यानि स्थानान्युक्तानि, एषु स्थानेषु यमानां स्थानोपदेशः कर्तव्यः। नासिक्यास्तु तावत् सर्वे यमा उक्ताः। द्वितीयमपि स्थानं यमानां विद्यते, तच्च स्थानं तदेवास्ति यद् यमप्रकृतिभूतस्य वर्णस्य विद्यते। अर्थात् पलिक्क्नी, चख्खनतुः, अग्ग्निः, अघ्घ्नन् इत्यत्र ककारखकारगकारघकाररूपाः क्रमशो यमा वेदितव्याः। यथा वक्ष्यते—"यमः प्रकृत्यैव सदृक्" (६।२२) इति। एवं विंशतिर्यमा बह्वृचानां भवन्ति। स्वरूपैश्चत्वार एव। तस्य विचारो यमलक्षणे भविष्यति।

[1]आचार्यो वेदमित्रो ळकारस्य जिह्वामूलं तालु च स्थानमाह। अनया रीत्या द्वयोः स्वरयोर्मध्ये स्थितो डकारो ळकारो भवति, ढकारस्तु ऊष्मणा सह प्रयुक्तो ळ्हकारतामेति। यथा इळा साळ्हा वीळु अङ्ग

---

१. सर्वशेषो व्यञ्जनान्येव (प० १ सू० ६), तेषामाद्याः स्पर्शाः (प० १ सू०७), पञ्च ते पञ्च वर्गाः (प० १ सू० ८), चतस्रोऽन्तस्थाः (प० १ सू० ९), उत्तरे अष्टा ऊष्माणः (प० १ सू० १०), अन्त्याः सप्त तेषामघोषाः (प० सू० ११), वर्गे वर्गे च प्रथमावघोषौ (प० १ सू० १२), युग्मौ सोष्माणौ (प० १ सू० १३), अनुनासिकोऽन्त्यः (१।१४), मात्रा

इत्यत्र (वीड्वङ्गेत्यत्र यदावग्रहः) 'व' एतद् भवति ।

अत्रेदं रहस्यम्—वेदमित्रो ढकारस्य ऊष्मणा युक्तं ळ्हकारं प्रतिपादयन् डकारहकारसंयोगेन निष्पन्नं ढकारं सूचयति, अर्थाद् ढकारमध्यस्थो डकारो यदि ळकारतामाप्नुयात्, तदा हकारोऽवशिष्ट एव भवेत् ।

प्रसङ्गत इदानीं संहिताविषये किञ्चिदुच्यते—पदान्तान् पदादिभिः सह यदेकीकुर्वन्नेति ग्रन्थमनुसरति सा संहिता संज्ञा भवति। सा च द्विविधा—आर्षी क्रमसंहिता चेति। आर्षी "अयं देवाय जन्मने" (ऋ. १-२०-१), "पर्जन्याय प्रगायत गायत दिवः" (ऋक् ७।१०२।१)।

ह्रस्वः (१।२७), तावदवग्रहान्तरम् (१।२८), द्वे दीर्घे (१।२९), तिस्रः प्लुत उच्यते स्वरः (१।३०), अधः स्विदासी३दुपरि स्विदासी३दर्थे प्लुतिर्भीरिव विन्दतीं ३ त्रिः (१।३१), स्वरभक्तिः पूर्वभागक्षराङ्गम् (१।३२), द्राघीयसी सार्धमात्रा (१।३३), इतरे च (१।३४), अर्धोनाऽन्या (१।३५), कण्ठ्योऽकारः (१।३८), प्रथमपञ्चमौ द्वा ऊष्माणौ (१।३९), केचिदेता उरस्यौ (१।४०), ऋकारलृकारावथ षष्ठ ऊष्मा जिह्वामूलीयः प्रथमश्च वर्गः (१।४१), तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः (१।४२), मूर्धन्यौ षकारटवर्गौ (१।४३), दन्तमूलीयस्तु तकारवर्गः (१।४४), सकाररेफलकाराश्च (१।४५), रेफं वर्त्स्वमेके (१।४६), शेष ओष्ठ्योऽपवाद्य नासिक्यान् (१।४७), नासिक्ययमानुस्वारान् (१।४८), इति स्थानानि (१।४९), अत्र यमोपदेशः (१।५०), जिह्वामूलं तालु चाचार्य आह स्थानं ळकारस्य तु वेदमित्रः (१।५१), द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते सकारो ळकारः। ळ्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्तः ॥ इवा साळ्हा चात्र निदर्शनानि वीड्वङ्ग इत्येतदवग्रहेण। (१।५२)।

अस्यामेव संहितायां यत् स्वरयोरन्तरं भवति तद् विवृत्तिसंज्ञं भवति। सा विवृत्तिः स्वरभक्तिकाला भवति। "द्राघीयसी सार्धमात्रा" (१।३३), "अर्धोनाऽन्या" (१।३५) भवति। अयं विवृत्तेर्विभागस्त्रिप्रकारः—उभयतो ह्रस्वा पादमात्राकाला, एकतो दीर्घाऽर्धमात्राकाला, उभयतो दीर्घा पादोनमात्राकाला।

ते च सन्धयश्चतुर्विधा भवन्ति—पूर्वे स्वरा व्यञ्जनान्युत्तराणि अनुलोमा अन्वक्षरसन्धयः। यथा एष स्य स चेति। पूर्वाणि व्यञ्जनानि, उत्तरे स्वराः, प्रतिलोमा अन्वक्षरसन्धयः। स्वरसन्धिस्तु अनेकप्रकारः। व्यञ्जनसन्धिरिति चत्वारो भेदाः। व्यञ्जनसन्धीनां बहवो भेदा भवन्ति। अत एवोक्तम् (ऋक् प्रा. २।८) भाष्ये—चतुःप्रकाराः सन्धयो भवन्ति। तद् यथा—द्वयोः स्वरयोः, द्वयोर्व्यञ्जनयोः, व्यञ्जनस्वरयोः, स्वरव्यञ्जनयोरिति। "प्रकृत्येतिकरणादौ प्रगृह्याः" (२।५१) इत्यनेन प्रकृतिभाव उच्यते। एवं च प्रकृतिभावं संमेल्य पञ्चसन्धयो भवन्ति।

ऋक्प्रातिशाख्ये संहिताभेदा उक्ताः, ते चात्र उदाहरणानुपन्यासपूर्वं प्रदर्श्यन्ते। तत्र मया पूर्वं संक्षेपेण ते प्रोक्ता इदानीं परित्यक्ता अपि भेदा उपन्यस्यन्ते। तत्र संहिताया: पदानि प्रकृतिभूतानि मन्तव्यानि। सा च संहिता पदान्तानां पदादिभिः सन्धानम्। अस्यामेव संहितायां स्वरयोरन्तरं विवृत्तिसंज्ञं भवति। सा च विवृत्तिः स्वरभक्तिकाला भवति, अधिककाला वा भवति। तत्र विवृत्तेर्विभागस्त्रिप्रकारो भवति—उभयतो ह्रस्वा पादमात्राकाला, एकतो दीर्घाऽर्धमात्राकाला भवति, उभयतो दीर्घा पादोनमात्राकाला भवति। उदाहरणानि तु प्रातिशाख्यभाष्यतो बोध्यानि। विस्तरभयान्नोदाहृतानि। "आनुपूर्व्येण सन्धीन्" (ऋ० प्रा० २।७) इति सूत्रेण पदानुपूर्व्येण प्रक्लिष्टान् सन्धीन् कुर्या दति प्रतिपादयता सूत्रकारेण 'इन्द्र आ इहि' इत्यत्र प्रथमं दीर्घस्ततो गुण इति 'इन्द्रेहि' इति रूपं सम्पद्यते। यदीदं सूत्रं न

स्यात्तदा तु कदाचित् 'आ इहि' इत्यत्र गुणे ततो वृद्धौ 'इन्द्रेहि' इत्यनिष्टं रूपं सम्पद्येत, तन्मा भूदित्येतदर्थमेतत् सूत्रमारब्धम्।

परं पाणिनिमते परसन्धावपि "ओमाङोश्च" (६।१।९५) इत्यनेन पररूपे 'इद्रेहि' इत्येव भविष्यति। तथा चेदं सूत्रं व्यर्थमिति चेन्न, आङतिरिक्तस्थलार्थं तदावश्यकत्वात्।

चतुःप्रकाराः सन्धयो भवन्ति। तद्यथा—द्वयोः स्वरयोः, द्वयोर्व्यञ्जनयोः, व्यञ्जनस्वरयोः, स्वरव्यञ्जनयोरिति। तत्र स्वरव्यञ्जनसन्धिः कथ्यते। तत्रापि यदा स्वराः पूर्वे व्यञ्जनानि च पराणि, तेऽनुलोमा अन्वक्षरसन्धयो ज्ञेयाः। ते एवान्वक्षरसन्धयो विपर्यये सति प्रतिलोमाः। पूर्वेष्वनुलोमसन्धिषु स्वराः पूर्वे व्यञ्जनान्युत्तराणि भवन्ति। इह प्रतिलोमेषु तु सन्धिषु व्यञ्जनानि पूर्वाणि स्वरा उत्तरे। परमत्र "तमिन्द्रं दानमीमहे" (ऋ० ८।४६।६) इत्यत्र मकारस्य अकारेण सम्मेलने सन्धिव्यवहारः। परमस्माकं पाणिनीयानां मते नहि तत्र सन्धिव्यवहारः। "तत्र प्रथमास्तृतीयभावं प्रतिलोमेषु नियन्ति" इत्यस्योदाहरणं "यदङ्ग दाशुषे त्वम्" (ऋक्० १।१।६) इति दत्तम्। परमस्माकं मते "प्रथमास्तृतीयम्" इत्यस्यावसर एव नास्ति, 'यद्' शब्दे दकारस्यैव सत्त्वात्। अन्यान्यप्युदाहरणानि तथैव दत्तानि। परमदुष्टान्युदाहरणान्यन्वेषणीयानि। यद्वा यः कश्चन वर्णः परिवर्त्तितरूपोऽपरिवर्त्तितरूपो वा भवेत्, स यदि परेण स्वरेण सहित उच्चार्यते तदा तत्र स व्यवहारः।

"पुर एता तितउना प्रउगं नम उक्तिभिः। अन्तःपदं विवृत्तयः" (ऋक्प्रा० २।१३) इति सूत्रेण एता अन्तःपदसंज्ञा विवृत्तयः। पदस्य मध्ये विवृत्तय इति तदर्थः। "यतो दीर्घास्ततो दीर्घा विवृत्तयः" (ऋक्प्रा० २।७९) इत्यनेन सूत्रेण यतो दीर्घस्वरो भवति पुरस्तात् पश्चादुभयतो वा, ततो दीर्घा विवृत्तय इत्यर्थकेन पुरस्तादीर्घा पश्चाद्-

दीर्घा उभयतो दीर्घा वा विवृत्तयो निर्दिष्टाः। "द्विषन्धयस्तूभयतः स्वर-स्वराः" (ऋक्प्रा० २।८०) अनेन सूत्रेण मध्यगतस्य स्वरस्योभयतः स्वरौ यासां विवृत्तीनां ता द्विषन्धिसंज्ञा विवृत्तयः। "समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम्" (ऋक्प्रा० २।१५) इत्यत आरभ्य "औकारं युग्मयोः" (ऋक्प्रा० २।१९) इत्येतत्पर्यन्तं ये सन्धय उक्तास्ते प्रश्लिष्टा नाम सन्धयः। "एते प्रश्लिष्टा नाम सन्धयः" (ऋक्प्रा० २।२०) इति सूत्रेण संज्ञा क्रियते।

"समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम्" (ऋक्प्रा० २।२१) अनेन सूत्रेण यः सन्धिः स क्षैप्रसंज्ञः, "ते क्षैप्राः प्राकृतोदयाः" (ऋक्प्रा० २।२३) इत्यनेन सूत्रेण क्रियते।

"विसर्जनीयोऽरिफितो दीर्घपूर्वः" (ऋक्प्रा० २।२४), "उत्तमौ च द्वौ स्वरौ" (ऋक्प्रा० २।२४) ता एतास्तिस्रः पदवृत्तय उच्यन्ते, "ताः पदवृत्तयः" (ऋक्प्रा० २।२४) इति सूत्रेण। "ह्रस्वपूर्वस्तु सोऽकारम्" (ऋक्प्रा० २।२७), "पूर्वौ चोपोत्तमात् स्वरौ" (ऋक्प्रा० २।२८) इत्याभ्यामुक्ताः सन्धयः "त उद्ग्राहाः" (ऋक्प्रा० २।२९)। अपरौ द्वौ एकारौकारौ तौ च प्रकृत्या भवतः। तत्र ओष्ठ्यपूर्वाः पञ्चालपदवृत्तिसंज्ञाः, इतरास्तु प्राच्यपदवृत्तिसंज्ञा भवन्तीति प्रतिपाद्यते। अभिनिहितः सन्धिस्तु "अथाभिनिहितः" (ऋक्प्रा० २।३४) इत्यादिभिः, "अन्तःपादं च" (ऋक्प्रा० २।५०) इत्यन्तैः सूत्रैरुक्तः। तथा च प्रश्लिष्टः, क्षैप्रः, पदवृत्तयः, उद्ग्राहाः, भुग्नाः, पञ्चालपदवृत्तयः, प्राच्यपदवृत्तयः, अभिनिहिताश्चेति चतुर्णां सन्धीनां भेदा अपि प्रातिशाख्ये उक्ताः।

"प्रकृत्येतिकरणादौ प्रगृह्याः" (ऋक्प्रा० २।५१) इत्यारभ्य अन्तं यावत् प्रकृतिभाव उक्तः। विशेषस्तु प्रातिशाख्यादवगन्तव्यः।

अधुना सामान्यशब्दविषये प्रातिशाख्यप्रक्रिया विभज्योच्यते—तत्र "वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा। आपद्यते श्वासतां नादतां वा वक्त्रीहायाम्" (ऋक् प्रा. १३।१) सर्वत्रापि प्राणस्य वायुत्वेनैव व्यवहारादत्रापि 'वायुः प्राणः' इत्युक्तम्। वेदान्ते तु "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" (मुण्डक० २।१।३) इत्यादिकाः श्रुतीरुपन्यस्य, 'न वायुक्रिये पृथगुपदेशात्' (२।४।९ वे. सू.) इत्यादिना प्राणस्य वायुरूपता निषिद्धा। तत्रैव शाङ्करे भाष्ये—कथं तर्हीयं श्रुतिः—'यः प्राणः स वायुः' इति। उच्यते—वायुरेवायमध्यात्मत्वमापन्नः पञ्च व्यूहो विशेषात्मनाऽवतिष्ठमानः प्राणो नाम भण्यते, न तत्त्वान्तरं नापि वायुमात्रम्। अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते। वस्तुतस्तु मनआदिवद् इन्द्रियादिवच्च भिन्नः प्राणो वायुरूपं शरीरमधितिष्ठति, अतो वायुरुच्यते। यथा देहादिभिन्नोऽप्यात्मा देवदत्तः शरीरे तत्त्वेन व्यवह्रियते, तद्वदत्रापि तदधिष्ठाने वायौ प्राणत्वेन व्यवहार इति सर्वं शास्त्रीयं लौकिकं च व्यवहारं समर्थयन्तु भवन्तः। अत एव वेदान्तकल्पलतिकायाम् (पृ. ८५ प. १७)—"रजोंशप्रधानाऽपञ्चीकृतमहाभूतकार्यं प्राणः। स च वृत्तिभेदात् पञ्चधाऽऽख्यायते—प्राणोऽपान उदानो व्यानः समान इति" इत्युक्तम्। तथा च प्राणवृत्तीरादायैव प्राणस्यापि वायुत्वेन व्यवहार इत्यपि केषाञ्चिन्मतम्। तन्मतेनाह—वायुः प्राण इति।

अस्यायमर्थः—य इमे शारीराः पञ्च वायवो नानाकर्माणः प्राणापानसमानव्यानोदानाः, तेषां प्राणो हि नाभेरुपरिष्टाद् व्याप्यास्ये व्याचरति। नाभेरधस्तात् पायुमेढ्रयोरपानः। प्रसारणाकुञ्चनोत्क्षेपणावक्षेपणगतिकर्मा व्यानः। कर्मप्रवृत्तिषु बलमारोपयत्युदानः। सर्वक्रियागामुपरमणः समानः। एवं वाचि वर्तमानं प्राणमेके आचार्या मन्यन्ते। अपरे उदानं मन्यन्ते। तत्रोभयथा विप्रतिपत्तिदर्शनात् शौनकेन भगवता

प्राणं मन्यमानेन शास्त्रं प्रणीतम्। ये पुनरुदानं मन्यन्ते तेषामिदं न सिध्यतीति चेन्न, शारीराणां पञ्चानामपि प्राणत्वेन व्यवहारात्। वक्त्रचेष्टायां सत्यां गलस्य छिद्रे विवृते विपुले प्राणो वायुः कोष्ठ्यमनुप्रदानं श्वासमापद्यते। तस्मिन्नेव छिद्रे संवृते संकुचिते सति स वायुर्नादमनुप्रदानमापद्यत इति पिण्डितोऽर्थः। तस्मिन्नेव कण्ठबिले नातिविवृते नातिसंवृते, समे इति यावत्, श्वासनादोभयमापद्यते। ता एव श्वासनादोभयात्मिकास्तिस्रः प्रकृतयो भवन्ति सर्वेषां वर्णानाम्।

तत्र केषां वर्णानां का प्रकृतिरित्यत्रोच्यते—अघोषाणां वर्णानां श्वासः प्रकृतिर्भवति। स्वराणां घोषवतां च नादः प्रकृतिरिति वेदितव्यम्। सोष्माणो ये घोषिणो वर्गचतुर्थाः, ऊष्मणां च घोषो हकारः, एतेषां वर्णानां श्वासनादौ प्रकृतिरिति। तथा च श्वासानुप्रदाना अघोषा हचतुर्था उभयानुप्रदानाः, अवशिष्टाः सर्वे नादानुप्रदाना इति ज्ञेयम्। एवं श्वासादीनि त्रीण्यनुप्रदानानि वर्णकालस्थानानि भवन्ति, नाधिकानि न न्यूनानि। तत्र वर्णात्मतत्त्वज्ञाने करणं नाम विशेषो वक्ष्यते। करणं प्रदानमिति समानार्थकम्[1]।

स्पृष्टं करणं स्पर्शानां तदस्थितं वेदितव्यम्। यरलवानाम् ईषत्स्पृष्टं ज्ञेयम्। स्वराणामनुस्वारस्य ऊष्मणां च अस्पृष्टं स्थितं वेदितव्यम्। यत्र वर्णस्थानमाश्रित्य मध्ये जिह्वा न संतिष्ठते, तदस्थितमित्युच्यते। यत्र वर्णस्थानमाश्रित्य जिह्वावतिष्ठते, तत् स्थितमित्युच्यते।

---

१. उभयं वान्तरोभौ (ऋक्प्रा० १३।२), ता वर्णानां प्रकृतयो भवन्ति (१३।३), श्वासोऽघोषाणाम् (१३।४), इतरेषां तु नादः (१३।५), सोष्मिणां घोषिणां श्वासनादौ (१३।६), तेषां स्थानं प्रतिनादात्तदुक्तम् (१३।७), तद्विशेषः करणम् (१३।८)।

पूर्वं "स्वरानुस्वारोष्मणाम् अस्पृष्टं स्थितम्"[1] (ऋक्प्रा० १३।११) इत्यनेन सर्वेषामूष्मणां शषसहविसर्गाणाम् अस्पृष्टं स्थितमाहुः। परन्तु एके आचार्याः कण्ठ्यस्य ऊष्मणो हकारस्य विसर्जनीयस्य च अस्पृष्टं करणं न मन्यन्ते, किन्तु स्पृष्टं दुःस्पृष्टं वा। अपरे अकण्ठ्यस्येति वर्णयन्ति। तन्मते शषसानामित्यर्थः।

"कण्ठ्यः स एको वायुः प्रयोक्तुः पुरुषस्य चेष्टारूपेण गुणविशेषेण सम्बन्धाद् वर्णीभवन् बहूनि रूपाणि क्रियया प्राप्नोति" इत्यर्थकेन "प्रयोक्तुरीहागुणसंनिपाते वर्णीभवन् गुणविशेषयोगात्। एकः श्रुतीः कर्मणाप्नोति बह्वीः" इत्यनेन सूत्रेण वर्णविशेषोत्पत्तिर्विस्तरेण प्रतिपाद्यते। के ते विशेषगुणाः, यैः संयोगाद् वर्णानां श्रुतितो भवतीति शङ्कायामुच्यते—

अनुप्रदानस्थानसंसर्गकरणपरिमाणानीत्यवधार्यताम्। तथाहि—वर्गे वर्गे तुल्यस्थानानां तुल्यप्रयत्नानामपि प्रथमतृतीयानाम् अनुप्रदानकृतो विशेषः। यतो हि कचटतपानां श्वासोऽनुप्रदानम्। गजडदबानां तु नादोऽनुप्रदानम्। हकारस्य नादोऽनुप्रदानम्। विसर्गस्य तु श्वास इति तयोर्भेदः। संसर्गकृतं वर्णभेदमाह—कचटतपानां खछठथफैः सह स्थानप्रयत्नानुप्रदानसाम्येऽप्यूष्मसंयोगकृतो विशेषः। तथा चोक्तम्—"सोष्मतां च सोष्मणामाहुः सस्थानेन" (१३।१६)। अर्थात् सोष्मणां वर्णानां सोष्मतां सस्थानेनोष्मणामाहुः। खकारस्य ≍ क इत्यनेन छकारस्य श इत्यनेन ठकारस्य ष इत्यनेन थकारस्य स इत्यनेन फकारस्य ≍ प इत्यनेन।

अत्रेदं तत्त्वम्—एकैव विसर्गश्रुतिर्यदा कटतपानां पूर्वं याति तदा जिह्वामूलीयशकारषकारसकारोपध्मानीयरूपं धारयति। यदा च एषां

---

१. स्पष्टमास्थितम् (१३।९)।
दुःस्पृष्टं प्राग्घकाराच्चतुर्णाम् (१३।१०)।
स्वरानुस्वारोष्मणामस्पृष्टं स्थितम् (१३।११)।

परत्र तिष्ठति, तदा एत एव कचटतपाः खछठथफरूपेण परिणमन्तो गजडदबाश्च घझढधभरूपाणि धारयन्ति। त एव तृतीया यदा अनुस्वारेण संयुज्यन्ते, तदा ते पञ्चमवर्णानां रूपाणि धारयन्ति। स्थानेनेति तुल्यप्रयत्नानुप्रदानानामपिअ ऋ इ ऊ इत्येतेषां स्थानकृतो विशेषः। एवं कचटतपानां यरलवानां हशषसानां च स्थानभेदाद् भेदः। तुल्यस्थानानुप्रदानानाम् इकारजकारयकाराणां करणकृतश्रुतिविशेषः। इकारस्य विवृतं करणम्, जकारस्य स्पृष्टम्, यकारस्येषत्स्पृष्टमिति। तुल्यस्थानप्रयत्नयोरपि ह्रस्वाकारदीर्घाकारयोः ह्रस्वेकारदीर्घेकारयोर्ह्रस्वोकारदीर्घोकारयोः परिणामकृतो विशेष इति।

तथा चोक्तम्—

अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात्।
जायते वर्णवैशेष्यं परिणामाच्च पञ्चमात्॥

एके आचार्या वर्णान् नित्यान् मन्यन्ते, न तु कार्यान्। एके तु गलविवरे विवृते वायौ श्वासरूपेण परिणते काकलकाधःस्थले स्पन्दरहिते घोषाभावे कचटतपाः पञ्च वर्णा उत्पद्यन्ते। तथा संवृते गलबिले वायौ नादरूपेण परिणते घोषे संजाते त एव कचटतपा घोषसंसर्गाद् गजडदबरूपाणि धारयन्ति। त एव गजडदबा अनुस्वारेण संसृष्टा ङञणनमा भवन्ति। त एव प्रथमाः समानस्थानेन ऊष्मणा वायुना विसर्गेण यद्वा ५क शषस ५प इत्येतैः संपृक्ता भवन्ति, तदा खछठथफरूपेण परिणमन्ते। एवं त एव गजडदबा घोषिणा हकारेण संबद्धा घझढधभरूपा भवन्ति। अनया रीत्या स्पर्शोत्पत्तिः—"आहुर्घोषं घोषवतामकारमेकेऽनुस्वारमनुनासिकानाम्" (१३।१५), "सोष्मणां च सोष्मणामाहुः सस्थानेन" (१३।१६), "घोषिणां घोषिणैव" (१३।१७) इत्येतैः सूत्रैः प्रदर्शिता।

केचन आचार्या वर्णान् नित्यान् मन्यन्ते। तन्मते कगखघेति-विशेषरूपेण श्रवणे हेतुस्त्वयमेवास्ति यत् तत्रैव वर्णेषु ऊष्मघोषौ वायुविशेषौ उत्पद्येते। तथा च पूर्वोक्तरीत्या श्रवणे भेदः। तथा च सूत्रे—"अत्रोत्पन्नावपरे ऊष्मघोषौ" (१३।१८), "शीघ्रतरं सोष्मसु प्राणमेके" (१३।१९) इति।

एके आचार्यास्तु कगचजटडतदपवेति दशसु वर्णेष्वधिकं प्राणं मन्यन्ते, तावता प्राणाधिक्येन द्वितीयचतुर्थौ वर्णाः संश्रूयन्ते। प्रातिशाख्ये "अत्रोत्पन्नावपरे ऊष्मघोषौ" (१३।१८) इति सूत्रे भाष्यम्—अत्रैव सोष्मस्सु घोषवत्सु चोत्पद्येते ऊष्मघोषौ इत्यपरे आचार्या मन्यन्ते। यदुक्तम्—अकारो घोषवतां घोषवत्त्वं जनयति। अनुस्वारोऽनुनासिकानामिति। सोष्मणां चोष्मा सोष्मत्वमिति तत्र स्पष्टं लक्ष्यते। कस्मात्? एवमुच्यमाने सति वर्णानामनित्यत्वं प्रसज्येत। नित्याश्च वर्णाः कूटस्थाश्चाविचालिनः।

'शीघ्रतरं सोष्मसु प्राणमेके" (१३।१९) सोष्मसु द्वितीयचतुर्थषु शीघ्रतरं प्राणमेके आचार्या मन्यन्ते। सर्वेषु वर्णेषु स्थानकरणानुप्रदानानि त्रयो गुणाः समानाः। सोष्मसु ऊष्मा गुणोऽधिकः। तत्र गुणबहुत्वाद् मात्राकालेन शैघ्र्याद्दते न शक्यमुच्चारयितुमिति तेषु शीघ्रतरं प्राणं मन्यन्ते।

पदकारेणाप्युक्तम्—प्रथमद्वितीयाः श्वासानुप्रदाना अघोषाः। एकेऽल्पप्राणा अपरे महाप्राणाः। द्वितीयचतुर्था नादानुप्रदाना घोषवन्तः। एकेऽल्पप्राणा अपरे महाप्राणाः। इति सोष्मसु महाप्राणं विदधदेवमेवार्थमाह।

"रक्तो वचनो मुखनासिकाभ्याम्" (१३।२०) मुखेन नासिकया च य उच्यते स रक्तो वेदितव्यः। ङञणनम इति। अत्रानुक्तं मुखनासिकावचनत्वमिह विधीयते, न तु रक्तसंज्ञा क्रियते; तस्याः पूर्वमेव कृतत्वात्।

"एतद् वर्णोत्सर्गुणशास्त्रमाहुः" (१३।२१) एतद् वर्णोत्सर्गुणशासनम्। यथा श्वासता, नादता, उभयता, स्पृष्टता, ईषत्स्पृष्टता, अस्पृष्टता, कण्ठविलस्य विवृतता, संवृतता, अघोषता, घोषता, सोष्मता, अनुनासिकता इति।

इदानीमनुस्वारोच्चारणप्रक्रियामाह—

नपुंसकं यदूष्मान्तं तस्य बह्वभिधानजः।
अनुस्वारो दीर्घपूर्वः सिष्यन्तेषु पदेषु सः॥ (१३।२२)।

नपुंसकलिङ्गं यद् ऊष्मान्तं शब्दस्वरूपं तस्माद् बहुवचने दीर्घपूर्वोकारजन्यः पदमध्येऽनुस्वारो वेदितव्यः। यथा भासांसि यजूꣳषि इत्यादौ।

ननु किमर्थं दीर्घपूर्वस्य पदमध्ये वर्तमानस्यानुस्वारस्य लक्षणं क्रियते। ननु पाठादेव सिद्धम्, यथाऽन्येषां पाठात् सिद्धम्। सत्यम्, किन्तु दुरान्नाननिवृत्त्यर्थम्। अनयोः शिक्षापटलयोर्बहूनां वर्णानां लक्षणं क्रियते, कथं पुनर्दुरान्नानप्रसङ्गः? सन्ति ह्यतीर्थोषिता अलसा अगुणदोषज्ञा अन्योन्याध्यापकाः सर्ववर्णान्यत्वजनयितारः। तद्दोषं निवृत्त्यर्थमाचार्येण शिष्यहितार्थमिदमारब्धम्। यथा अनुस्वारस्थाने ङकारं जनयन्ति। तस्माद् ङकारात् परं ककारमन्तःपातं जनयन्ति, 'हवींषि' इति 'हवीङ्क्षि' इति पठन्ति। तस्मादस्माभिर्यत्नो विधेयः, अस्माभिरनुस्वार उच्चार्यते ङकारो वेति ज्ञानार्थम्। यथानुस्वारोच्चारणे ङकाराभासो न भवेत्, तथा यत्नः संपाद्यः। सम्प्रति तु पाश्चात्त्यदेशे ईदृशं यन्त्रमाविष्कृतं येन हि अनुस्वार उच्चार्यते ङकारो वेति प्रत्यक्षं द्रष्टुं शक्यते। व्याडिराचार्योऽनुस्वारं नासिकास्थानं मुखनासिकास्थानं वा मन्यते। तथा च वर्ततेऽनुस्वारोच्चारणे विप्रतिपत्तिः। "व्याडिर्नासिक्यमनुनासिकं वा" (१३।३७) व्याडिराचार्यः सर्वमनुस्वारं नासिकास्थानं मुखनासिकास्थानं

वा मन्यते। तथा च व्याडेर्मते नासिकया मुखनासिकेन वा उच्चारणं कर्तव्यम्।

"त्वं राजेन्द्र" (ऋ. १।१७४।१) "त्वँ राजेन्द्र ये च देवा रक्षाकृन् पाह्यसुरत्वमस्मा। त्वं सत्पतिर्मघवानस्तरुत्रस्त्वं सत्यो वसवानः सहोदा॥ त्वाँ राजानम्, त्वाँ राजानम्" (ऋ. २।१।८) इति वा।

अत्र ऋ ॠ इत्यनयोर्वर्णयोरुच्चारणविषये सूत्रम्—"रेफोऽस्त्यृकारे च परस्य चार्धे पूर्वे ह्रसीयांस्तु वेतरस्मात् मध्ये सः" (१३।३४) इति। ह्रस्वस्य दीर्घस्य च ऋकारस्य पूर्वेऽर्धे रेफो विद्यते। अन्यस्माद् रेफाद् अयं ह्रस्वतरः। यद्वा सम एव वा न ह्रस्वतरः। स च द्वयोर्ह्रस्वदीर्घयोर् ऋकारयोर्मध्ये वर्तते। एतावताऽपि ऋकारस्य मूलं रेफ इति[1] पाराशर्यमतम् अद्विष्टं वेदितव्यम्। तस्यैव लकारभावे "धातौ स्वरः कल्पयता लृकारः" (ऋक् प्रा. १३।३५) कृप्धातौ तस्यैव रेफस्य लकारे स ऋकार लृकारो भवति। "चक्लृपे तेन ऋषयो मनुष्याः" (ऋ. १०।१३०।६) अत्र स्वरपरत्वात् ककारस्य द्विर्वचनं न भवति, असंयोगादित्वात्। पकारस्य च द्विर्वचनं भवति, स्वरोपधत्वात्। एतेन लृकारस्य लकारादुत्पत्तिरिति पाराशर्यमतं परिपुष्टं भवति।

अत्र सन्ध्यक्षरविषये किञ्चिद् विचार्यते। इमानि 'ए ऐ ओ औ' इति सन्ध्यक्षराणि। तानि सन्धिजानि मन्तव्यानि, स्वरेष्विमानि चत्वार्यक्षराणि नहि स्वयमुद्भूतानि, अकारादिवत्, किन्तु द्वयोर्द्वयोर्वर्णयोः सन्धौ सति निष्पद्यन्ते। स्थानद्वयोच्चार्यमाणत्वमेवैषां सन्धिजत्वं द्रढयति। तत्र 'ए ऐ' इत्यनयोरकारः पूर्वार्धम्, इकारस्तूत्तरार्धम्। 'ओ औ' इत्यनयोस्तु अकार एव पूर्वार्धम्, उत्तरार्धन्तु उकारः। परम् 'ए ओ' इत्यनयोर्द्वयोः क्रमशोऽकारेकारौ, अकारोकारौ च क्षीरोदकवत्

---

१. पाराशर्यमतम् अस्मन्मतमित्यर्थः।

सम्मिश्रितौ स्तः। अतो द्वयोः पृथक् श्रवणं न भवति। तथा च सूत्रम्—"सन्ध्यानि सन्ध्यक्षराण्याहुरेके द्विस्थानतैषु तथोभयेषु" (ऋ. प्रा. १३।३८), "···सन्ध्यक्षरे मात्रासंसर्गादवरे अपृथक्श्रुती" (ऋ. प्रा. १३।४०) अस्मिन्नेव सूत्रे पृथक्श्रुती इति पाठेन ऐकारे औकारे च पार्थक्येन श्रवणं प्रदर्शितम्। ऐकारे औकारे च इवर्णोवर्णयोर्भूयसी मात्रा, अवर्णस्य त्वल्पीयसी सा। अतोऽवर्णस्य इवर्णोवर्णयोश्च पार्थक्येन श्रवणं भवति। अनयोर्द्वयोः हिन्दीभाषायाम् अय् अव् इत्येतत्सदृश-मुच्चारणं भवति। संस्कृते तु 'अ ई अ ऊ' इत्येवंविधमुच्चारणं जायते। अत एव तत्र प्रातिशाख्यभाष्ये—तस्मात् तयोरवर्णस्य इवर्णोवर्णयोश्च स्पष्टमुच्चारणं भवति।

अत्र हिन्दीभाषीयमुच्चारणं संस्कृतभाषीयं वा उच्चारणं युक्तियुक्तमिति विचार्यते। "सन्ध्यक्षरेषु विवृतत्वात्" (ऐ औच् वा. १०) यदत्रावर्णं विवृततरं तदन्यस्मादवर्णाद् ये अपीवर्णोवर्णे विवृततरे ते अन्याभ्याम् "इवर्णोवर्णाभ्याम्" इति वार्त्तिकतद्भाष्यबलेन अय् अव् इत्येतादृश-मेवोच्चारणं युक्तियुक्तं प्रतिभाति, संस्कृतभाषाभाषिभिस्तु [1]ऐकारौकारौ नहि विवृततमौ उच्चार्येते। महाभाष्यप्रातिशाख्यादिपर्यालोचनया तु हिन्दीभाषाभाषिणामेवानयोरुच्चारणं शास्त्रसम्मतम्। आधुनिक-संस्कृतभाषाभाषिणस्तु प्राकृतसंस्कारसंस्कृताः प्रतीयन्ते, यतो हि प्राकृतभाषायां नेमौ ऐकारौकारौ स्तः। तयोः स्थाने क्रमश 'अ इ' 'अ उ' इत्येवमुच्चारणं लब्धास्पदं विद्यते। अत्रत्यो विशेषस्तु दोषप्रदर्शना-वसरे प्रकटयिष्यते।

---

१. स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च॥
इति पाणिनिशिक्षा (श्लो० २१)।

अष्टमं दलम्

अथ दोषाः

इतः पूर्वं वर्णानामात्मविशेषगुणा उक्ताः, इदानीं तेषां दोषविशेषाः क्रमशो निर्दिश्यन्ते। तत्र प्रथमं वर्णानामसम्यगुच्चारणे[1] आयः, अपायः, व्यथनं चेति त्रयो दोषाः प्रादुर्भवन्ति।

(१) तत्र आद्यो नाम—असतो वर्णस्योपजनः, यथा 'ह्वयामि' इत्यत्र पुरस्तादनुनादः। अर्थाद् ह्व इत्यतः पूर्वम् 'अव्' इत्याकारो ध्वनिः।

(२) अपायो नाम—सतोऽपकर्षः। यथा 'ऊनयीः' इत्यत्र यकारस्यानुच्चारणम्।

(३) व्यथनं नाम सतोऽन्यथा श्रवणम्। यथा 'रथ्या' इत्यत्र थकारस्य सकारवच्छ्रवणम्।

(४) निरस्तं[2] नाम दोषः स्थानकरणयोरपकर्षे समुत्पद्यते। यथा—स्थानकरणाभ्यां वर्णा अपकृष्यन्ते, एवमेव वर्णादपि स्थानकरणे अपकृष्टे भवतः।

(५) स्थानकरणयोर्विस्तारे [3]व्यासो नाम दोषः समुत्पद्यते, तयोः संहारे पीडनं नाम दोषः सञ्जायते। व्यासोऽविवेकः।

(६) पीडनं द्विर्भावः।

(७) ओष्ठाभ्यां बद्धं यद् दुष्टं [4]तदम्बूकृतमित्युच्यते।

---

१. समुद्दिष्टा वर्णगुणाः पुरस्तान्निर्दिष्टानां सांहितो यश्च धर्मः।
तदायापायव्यथनानि दोषास्तान् व्याख्यास्यामोऽत्र निदर्शनाय॥
(ऋक्प्रा० १४।१)

२. निरस्तं स्थानकरणापकर्षे (ऋक्प्रा० १४।२)।

३. विहारसंहारयोर्व्यासपीडने (ऋक्प्रा० १४।३)।

४. ओष्ठाभ्यामम्बूकृतमाह बद्धं दुष्टम्। (ऋक्प्रा० १४।४)।

(८) सुषिरेण मुखेन यदाह वक्ता तद् दुष्टं [1]शूनमित्युच्यते।

(९) हन्वोर्नीचैर्भावे [2]संदष्टं नाम दोष उच्यते।

(१०) हन्वोः सर्वतश्चलने [3]विक्लिष्टं नाम दोषः। विक्लिष्टमित्यस्य असंयुक्तमित्यर्थः।

(११) जिह्वामूलस्य स्तम्भने [4]ग्रस्तं नाम दोषः।

(१२) नासिकयोर्यदा वर्णोऽनुषज्यते [5]तदाऽनुनासिकत्वमुत्पद्यते। स दोषस्तं परिवर्जयेत्। अयं हि दोषोऽननुनासिकेषु स्वरेष्वेव। यत्र हि केनचिच्छास्त्रेणानुनासिकत्वं न विहितं परं तत्रानुनासिकत्वं वर्णानां क्रियते तदैव दोषावहत्वम्। यथा साम्प्रतं पञ्चमवर्णेभ्यः परः स्वरः प्रायेणानुनासिकः क्रियते। तदुदाहरणं यथा—'मनुः' इत्यस्य स्थाने 'मँनुँः' इत्युच्चार्यते। अयं हि दोषः। अथ हि नहि केनापि सूत्रेण अकारस्य उकारस्य चानुनासिकत्वं विधीयते। परं हे राम[6] इत्यत्र तु "अणोऽप्रगृह्यस्यानुनासिकः" (८।४।५७) इति सूत्रेण मकारोत्तरस्याकारस्यानुनासिकत्वं विधीयते, तत्र च 'हे रामँ' इत्युच्चारयितुं शक्यते। तथा च अविहितानुनासिकत्वस्थलेऽनुनासिकोच्चारणं दोषस्तं परिहरेत्।

(१३) ह्रस्वदीर्घप्लुतानामयथामात्रोच्चारणं[7] दोषो भवति स परिहरणीयः। प्रायेण हि दीर्घेषु ह्रस्वेषु च रक्तेषु (अनुनासिकेषु)

---

१. मुखेन सुषिरेण शूनम् (ऋक्प्रा० १४।५)।

२. संदष्टं तु व्रीडन आह हन्वोः (ऋक्प्रा० १४।६)।

३. प्रकर्षणे तदु विक्लिष्टमाहुः (ऋक्प्रा० १४।७)।

४. जिह्वामूलनिग्रहे ग्रस्तमेतत् (ऋक्प्रा० १४।८)।

५. नासिकयोस्त्वनुषङ्गेऽनुनासिकम् (ऋक्प्रा० १४।९)।

६. पञ्चमानां वर्णानामुच्चारणपरम्परा चिराद् भ्रष्टा।

७. अयथामात्रं वचनं स्वराणाम् (ऋक्प्रा० १४।१०)।

मात्राधिक्यं कुर्वन्ति। तदाचार्येण निदर्शनार्थमुत्तरत्रोदाहृतम्। तथा च तत्र सूत्रम्—"रक्तं ह्रस्वं द्राघयन्त्युग्र ओकः" (ऋ० प्रा० १४।५१)। अत्र हि 'उग्रँ' इत्यस्य 'उग्राँ' इत्युच्चारणं कुर्वन्ति। स च दोषः। सूत्रे दीर्घस्य रक्तस्य त्रिमात्रोच्चारणं नोदाहरणत्वेन सूत्रकृतोपात्तम्। तच्च स्वयमूहनीयम्।

तत्र पूर्वं ये दोषास्तद्विषये सूत्रकारः सिंहावलोकनन्यायेनाह—[1]संदंश-व्यास-पीडन-निरासाः स्वराणां दोषा ज्ञेयाः। [2]ग्रासो नाम दोषः पूर्वमुक्तः। स च कण्ठ्ययोरकाराकारयोरुत्पद्यते। अनुनासिकानां वर्णानां [3]संदष्टता विषयरागता वा दोष उक्तः। तत्र संदष्टता "संदष्टं तु व्रीडन आह हन्वोः" (१४।६) इत्यनेन सूत्रेणोक्ता। तत्र रागं प्रत्याख्याय अनुनासिका न वर्तन्ते, तस्माद् विषमरागता दोषः। विषमरागता नाम मात्राधिक्येन अनुनासिकस्य स्वरस्योच्चारणम्। यथा "अक्रतँ एमि" (ऋ० १०।३४।५), "अभ्र औं अपः" (ऋ० ५।४८।१) इत्यत्र। अत्र हि ह्रस्वं द्राघयन्ति, दीर्घञ्च प्लुतयन्ति चतुर्मात्रयन्ति वा।

(१४) सान्तःस्थानां[4] वर्णानां क्वचिदादिलोपः, क्वचिदन्तलोपः क्रियते, स दोषः। तत्र आदिलोपः "पिबा निषद्य" (ऋ० १।१७७।४) इत्यत्र दकारलोपः। अन्तलोपः "इन्द्रवाय्वोः" इत्यत्र।

इदानीं दोषाणां नामानि प्रातिशाख्ये नोपन्यस्तानि, अतो मयाऽपि तेषां नामोल्लेखमकृत्वा केवलं दोषा इत्येवोच्यन्ते। किञ्च,[5] अस्थाने

---

१. संदंशो व्यासः पीडनं निरासः (ऋ० प्रा० १४।११)।

२. ग्रासः कण्ठ्ययोः (ऋ० प्रा० १४।१२)।

३. अनुनासिकानां सन्दष्टता विषयरागता वा (ऋ० प्रा० १४।१३)।

४. सान्तःस्थानामादिलोपान्तलोपौ (ऋ० प्रा० १४।१४)।

५. अदेशे वा वचनं व्यञ्जनस्य (ऋ० प्रा० १४।१५)।

असद् व्यञ्जनमुच्यते स दोषः। यथा "स्तोमैरुत्स्महि" (ऋ० ४।५२।४), "उत्स्नाय" (२।१५।५), "विश्वःस्त्यस्य" (७।४२।६) इत्यत्र सकारात् परस्तकार उच्यते। यथा वा "यक्ष्मं दोषण्यम्" (१०।१६०।२) "विष्णुः" इत्यत्र षकारादिकारोकारौ।

[1]व्यञ्जनानामन्योन्येन सह विरागः क्रियते। अन्योन्येन सह विरागो नाम एकस्यापरेण सह स्थानादिसाम्यापत्तिः। अयमपि दोषः। यथा "उपमा षड् द्वा द्वा" (ऋ० ८।६८।१४) इत्यत्र उकारात् परस्य दकारस्य विरागः क्रियतेऽज्ञातृभिः। [2]प्रयत्नशैथिल्येन व्यञ्जनानामुच्चारणम् अतिप्रयत्नेन वा। तावुभावपि दोषः। [3]पदादिस्थानां घोषवतां पुरस्तादनुनादो ध्वनिः क्रियते। अथवा तेषां घोषवतां धारणं नामानुपलब्धिः। यथा 'ह्वयामि' इत्यत्र पुरस्तादधिकः शब्दः क्रियते। अथवा तस्य दोषस्य परिहरणार्थं हकारस्यानुलब्धिः क्रियते। एकस्य दोषस्य निरासार्थमपरः प्रयत्नोऽपि दोषायते। अपरे पुनर्धारणस्य नानुपलब्धिरर्थः, किन्तु धारणं नाम द्विर्वचनमिति मन्यन्ते। "ज्योतिष्कृत्" (ऋ० १।५०।४) "द्यावा द्वादश" इति।

[4]सोष्मणाम् ऊष्मणाञ्च आदिस्थानां पुरस्तादनुनादः, अनादो वा क्रियते। तावपि दोषः, यथा अभिख्या। छायामिव (ऋ० ६।१६।३८) श्रोतन्ति, स्तौति। [5]ऊष्मणां त्वघोषाणां लोमश्यं नाम असौकुमार्यम्,

---

१. अन्योन्येन व्यञ्जनानां विरागः (ऋ० प्रा० १४।१६)।

२. लेशेन वा वचनं पीलनं वा (ऋ० प्रा० १४।१७)।

३. घोषवतामनुनादः पुरस्तादादिस्थानां क्रियते धारणं वा (ऋ० प्रा० १४।१८)।

४. सोष्मोष्मणामनुनादोऽप्यनादः (ऋ० प्रा० १४।१९)।

५. लोमश्यं च श्वेलनमूष्मणां तु (ऋ० प्रा० १४।२०)।

क्ष्वेलनं नाम अधिको वर्णस्य ध्वनिः, तावुभावपि दोषौ स्तः। [1]आद्येषु चतुर्षु वर्गेषु जिह्वाया विस्तारः क्रियते स दोषः।

इदानीं दोषाणां नामानि प्रातिशाख्यरीत्या प्रदर्श्यन्ते—

(१५) एतेषां वर्गाणां मुख्ये आद्ये वर्गे [2]ग्रासो नाम दोषः सञ्जायते।

(१६) एतेषामेव चतुर्थे वर्गे उच्चारणीये प्रतिहारो नाम दोषो भवति। [3]प्रतिहारो नाम अतिप्रयत्नः।

(१७) रेफे मध्यमयोर्द्वयोर्वर्गयोश्चवर्गटवर्गयोश्च [4]निरासो नाम दोषो भवति।

(१८) चतुर्थे वर्गे उच्चारणीये करणे स्थाने चाविशति सति [5]विक्लेशो नाम दोषो भवति। रेफे [6]अतिस्पर्शः, असौकुमार्यं च दोषौ स्तः।

(१९–२१) लकारस्य त्रयो दोषाः—अतिस्पर्शः, असौकुमार्यम्, [7]जिह्वाग्रान्ताभ्यां वचनं च।

(२२–२३) अधिकः श्वासः, [8]अघोषसदृशत्वं वा हकारस्य दोषौ।

(२४–२५) हकारभिन्नेष्वन्येषु ऊष्मसु शकारादिषु [9] निरासः पीडनं वा दोषौ स्तः।

---

१. वर्गेषु जिह्वाप्रथनं चतुर्षु (ऋ० प्रा० १४।२१)।
२. ग्रासो मुख्ये (ऋ० प्रा० १४।२२)।
३. प्रतिहारश्चतुर्थे (ऋ० प्रा० १४।२३)।
४. सरेफयोर्मध्यमयोर्निरासः (ऋ० प्रा० १४।२४)।
५. विक्लेशः स्थाने सकले चतुर्थे (ऋ० पा० १४।२५)।
६. अतिस्पर्शो वर्वता च रेफे (ऋ० प्रा० १४।२६)।
७. जिह्वान्ताभ्यां च वचनं लकारे (ऋ० प्रा० १४।२७)।
८. श्वासोऽघोषनिभता वा हकारे (ऋ० प्रा० १४।२८)।
९. निरासोऽन्येषूष्मसु पीलनं वा (ऋ० प्रा० १४।२९)।

(२६) स्वरात्परं विसर्जनीयं पूर्वस्य सस्थानं निरस्तमाहुः। उक्तोऽयं दोषः—रथीः, वधूः। किमुच्यते दीर्घादिति, ह्रस्वादपि परो विसर्जनीयः पूर्वसस्थान एव श्रूयते—अग्निः, वायुः। यद्यपि श्रवणं तुल्यं ततोऽप्याचार्येण दीर्घग्रहणं कृतम्। तस्माद्दीर्घादेव पूर्वसस्थानत्वं दोषो भवति, न ह्रस्वादपि दोषत्वं तस्येत्यवधेयम्। अपरेषां मते तु दीर्घग्रहणमुत्तरार्थम्, तथा च ह्रस्वादपि विसर्जनीयस्य पूर्वसस्थानत्वं दोषः।

यद्यपि शास्त्रान्तरे "कण्ठस्थानौ हकारविसर्जनीयौ "(तै० प्रा० २।४६), "उदयस्वरादिसस्थानो हकार एकेषाम्" (तै० प्रा० २।४७), "पूर्वान्तसस्थानो विसर्जनीयः" (तै० प्रा० २।४८) इति तेषां विसर्गः पूर्वान्तसस्थानो भवति, तस्मात्तदपि युक्तम्। इह दोषसमुच्चयप्रकरणे दोषः स इति निश्चयः। तथा च ऋग्वेदे तथात्वं दोषो न तु वेदान्तरे। यथाऽनुनासिकपरादूष्मणः परः सस्थानयमागमो भवत्येकेषाम्। यथा "अस्मे विष्णु" इति। तदिहास्माकम् ऋग्वेदिनां प्रतिषिद्धम्।

दीर्घात्[२] कण्ठ्यात् परं विसर्जनीयं पूर्वान्तसस्थानम्, तथा रेफवद्

---

१. स्वरात् परं पूर्वसस्थानमाहुर्दीर्घान्निरस्तं तु विसर्जनीयम्। (ऋ० प्रा० १४।३०)। अपरे पुनरस्य सूत्रस्य व्याख्यानं प्रकारान्तरेण वर्णयन्ति। अन्यस्थाने दीर्घात् स्वरात् परो विसर्जनीयो देवैरपि न शक्य उच्चारयितुमिति विधिं वर्णयन्ति। दीर्घात् स्वरात् परं विसर्जनीयं पूर्वसस्थानमाचार्या इच्छन्ति। तस्मिन्नपि पक्षे दीर्घग्रहणमनर्थकम्। ह्रस्वादपि ते तथैवेच्छन्ति। एवं तर्हि परस्य योगस्य कृते दीर्घग्रहणं वृत्तवशेनेह पठितम्। स्वरात् परं पूर्वसस्थानमाहुर्निरस्तं तु विसर्जनीयम्। इत्येवं योगे सत्युभयोरपि पक्षयोः 'अग्निः, वायुः, रथीः, वधूः' इति सर्वं सिद्धं भवति।

२. कण्ठ्याद् यथा रेफवतस्तथाहुः (१४।३१)।

ऋकारात् परं जिह्वामूलीयं पूर्वान्तसस्थानं निरस्तं नाम दोषः। स विसर्जनीयः। देवाः सोमा इति यथा दीर्घादिति कथनेन "देवः सोमः" इत्यत्र पूर्वान्तसस्थानत्वेऽपि न दोषः। तथा च ह्रस्वात् कण्ठ्यात् परो विसर्जनीयो ह्रस्वसस्थान एव भवति। रक्तात्[1] कण्ठ्याद् दीर्घात् परं विसर्जनीयं नासिक्यं नाम दोषः। यथा "स्वतवाँः पायुः" (ऋ. ४।२।६)। एवं रक्तादीर्घाद् ऋकारात् परं विसर्जनीयं नासिक्यं नाम दोषः, यथा "नः पतिभ्यः" (तै. पृ. १४२)। स्वरोपधात्[2] संयोगादेरूष्मणः पूर्वमधिकं विसर्जनीयमाहुः, स दोषो वर्जनीयः। "पावक ते स्तोकाश्चोतन्ति" (ऋ. ३।२१।२)। ऊष्मणः[3] अघोषाद् रक्तपरात् परं यममाहुः, सोऽपि दोषो वर्जनीयः। "पृश्निः विष्णुः स्नात्वा" (ऋ. १०।७१।७)। घोषिण[4] ऊष्मणो रक्तपरात् परं तेन घोषिणा तुल्यप्रयत्नम् ऊष्माणं वा यममाहुः। स दोषः, तं वर्जयेद् बुधः। "ब्रह्म अह्ना शुनश्शेपो यमह्वद् गृभीतः" (ऋ. १।२४।१२)। "मानो मद्येव निष्षपी परा दाः" (ऋ. १।१०४।५) इत्यादिषु शकारस्थाने षकारस्थाने च विसर्गोच्चारणं[5] दोषः। "अन्तर्महाँश्चरति रोचनेन" (ऋ. ३।५५।९); "पीवो अन्नाँ रयिवृधः सुमेधाः" (ऋ. ७।९१।३), "उत्पणीर्हतमूर्म्यामदन्ता" (ऋ. १।१८४।२), "विदस्यूँर्योनावकृतः" (१।६३।४) एतेष्वनुस्वारं कुर्वन्ति स दोषः। अर्थाद् अनुनासिकमकृत्वा अनुस्वारकरणं दोषः[6] स वर्जनीयः।

---

१. रक्तात्तु नासिक्यमपीतरस्मात् (१४।३२)।

२. संयोगादेरूष्मणः पूर्वमाहुर्विसर्जनीयमधिकं स्वरोपधात् (१४।३३)।

३. परं यमं रक्तपरादघोषात् (१४।३४)।

४. ऊष्माणं वा घोषिणस्तत्प्रयत्नम् (१४।३५)।

५. शुनश्शेपो निष्षपी शास्सि निष्षाळ विक्रमा ब्रह्म विष्णुः स्स पृश्निः (१४।३६)।

६. स्पर्शोष्मसन्धीन् स्पर्शरेफसन्धीनभिप्रायांश्च परिपादयन्ति। (१४।३७)

"तिस्रो मातॄस्त्रीन् पितॄन्" (ऋ. १।१६४।१०), "कर्हिस्वित्तदिन्द्र यन्नृभिर्नॄन्" (ऋ. १।१६४।१०) अत्र सरेफौ ऋ ॠ इत्येतौ उवर्णसदृशौ उच्चार्येते, स[1] दोषः। स च वर्जनीयः। अस्यायं भावः—सर्वे हि दाक्षिणात्या उत्कलाश्च ऋवर्णं रुकारसदृशमुच्चारयन्ति। तच्चोच्चारणं तेषां दुष्टम्।

"दन्त्यान् सकारोपनिभानघोषान् रथ्यः पृथ्वी पृथिवी त्वा पृथीति" (सू. १४।३९) एतत्सूत्रस्य व्याख्याभेदेनोदाहरणानि प्रदर्श्यन्ते—तत्र केषाञ्चिन्मते सूत्रे 'पृथिवी त्वा' इति त्वाग्रहणं त्वाघटितमन्त्रग्रहणार्थं पृथग् वा तदुदाहरणार्थमिति सन्देहः। तद्बीजं तु प्रायेण थकारे सकारसदृशो दोषः संलक्ष्यते, न तकारे, इति मन्त्रविशेषग्रहणार्थमिति।

अपरे तु यदि थकारस्यैव स दोषः स्यात् तर्हि कथं 'थकारं सकारोपनिभम्' इति लघीयसा न्यासेन सिद्धे दन्त्यग्रहणम् अघोषग्रहणं च कुर्यात्। तेन पृथग् ग्रहणं मन्यन्ते। "अदितिः सिन्धुः पृथिवी उत द्यौः" (ऋ. १।९४।१६), "त्वा यत् त्वा सूर्य स्वर्भानुः" (ऋ. ५।४०।५)।

ऊष्मपरम्[2] अन्तःस्थापरं रेफपूर्वं च ह्रस्वं नोच्चारयन्ति। अथवा अविद्यमानं ह्रस्वं रेफात् परमुच्चारयन्ति। तत्र 'अर्यमा' 'आष्ट्र्याम्' इत्यनयोरविद्यमानं ह्रस्वमुच्चारयन्ति। यथा "अर्यमा यातयज्जनः" (ऋ. १।१३६।३), "आष्ट्र्यां पदं कृणुते अग्निधाने" (ऋ. १०।१६५।३) इत्यत्रासन्तमपि ह्रस्वम् 'अरियमा' 'आष्ट्रियाम्' इत्येवमुच्चारयन्ति।

---

१. स्वरौ कुर्वन्त्योष्ठनिभौ सरेफौ
तिस्रो मातॄस्त्रीन् पितॄन् नृभिर्नॄन्। (१४।३८)।

२. ऊष्मान्तःस्थाप्रत्ययं रेफपूर्वं
ह्रस्वं लुम्पन्त्याहुरथाप्यसन्तम्।
पुरुषन्ति पुरुवार्यमाष्ट्र्यां
हरियोजनाय हरियूपीयायाम्॥ (१४।४०)

"याभिर्ध्वसन्ति पुरुषन्तिमावतम्" (ऋ. १।११२।२३), "महो रायः पुरुवार प्रयन्धि" (ऋ. ४।२।२०), "पुरुवीराभिर्वृषभक्षितीनाम्" (ऋ. ६।३२।४), "अतक्षद् ब्रह्म हरियोजनाय" (६।३२।४), "वृचीवतो यद्धरि यूपीयायाम्" (ऋ. ६।२७।५) एषु सन्तमपि ह्रस्वम् 'पुर्षन्तिम्', 'पुर्वार', 'पुर्वीर', 'हर्योजनाय', 'हर्यूपीयायाम्' इत्येवमुच्चार्य लुम्पन्ति। अत्र सूत्रे 'पुरुवीर'शब्दो नास्ति। कथं नाम भाष्ये स शब्दो गृहीतः। एतद् विचार्यम्।

"हृणीयमानो अप हि मदैयेः" (ऋ. ५।२।८), "वैयश्वस्य श्रुतं नरा" (ऋ. ८।२६।११) अनयोर्यैकारस्य[1] द्वित्वं कुर्वन्त ऐकारस्य स्थाने अकारमुच्चारयन्ति, तौ द्वावपि दोषौ। अर्थात् 'मदय्येः', 'वय्यश्वस्य' इत्येवमुच्चारयन्ति।

एतद् वैपरीत्येन[2] "ते रय्या संसृजन्तु नः" (ऋ. १०।१९।७), "परि प्रयन्तं वय्यं सुषंसदम्" (ऋ. ९।६८।८), "श्रद्धां हृदय्यया कूत्या" (१०।१५१।४) एतेषु त्रिषु 'रैया', 'वैयम्', 'हृदैयया' इत्येवमकारस्य स्थाने ऐकारं कृत्वा यकारं द्विर्नोच्चारयन्ति।

अत्रेदं रहस्यम्—मया पूर्वम् ऐकारोच्चारणविषये द्वौ पन्थानौ समुद्दिष्टौ। तस्यैवोच्चारणस्यायं प्रभाव आपतितो यद् ऐकारम् अय्-रूपेणोच्चारयन्ति। 'अय्'शब्दं च 'ऐ'रूपेणोच्चारयन्ति। तेन क्वचिद् यकारस्य द्वित्वं कुर्वन्ति, क्वचित्तु सन्तमपि यकारद्वित्वं नोच्चारयन्ति।

[2]एवमेव "जरितुः काममूनयीः" (ऋ. १।५३।३), "यात्वाग्निर्ध्वन-

---

१. ऐ पेरित्यैकारमकारमाहुर्
वैथश्वेति क्रमयन्तो यकारम्। (१४।४१)

२. तदेवान्येषु विपरीतमाहु-
स्तरप्या वय्यं हृदय्ययेति च। (१४।४२)

यीद् धूमगन्धिः" (ऋ. १।१६२।५), "दश कोशयीर्दश वाजिनोऽदात्" (ऋ. ६।४७।२२) यत्र हि यकारेण सहित इकारो विद्यते, तत्र सयकारमीकारं नोच्चारयन्ति, किन्तु ततः पूर्वस्य अकारस्य स्थाने ऐकारमुच्चारयन्ति। तथा च बह्वक्षरमपि पदं द्व्यक्षरतां नयन्ति। एवमेवैतद्वैपरीत्येन "अभैष्माप तदुच्छतु" (ऋ. ८।४७।१८), "अजैष्माद्यासनाम च" (ऋ. ८।४७।१८), "दूरं नैष्ट परावतः" (ऋ. ८।३०।३) इत्येतेषु ऐकारस्थाने अकारं कृत्वा सयकारमीकारमसन्तमपि उच्चारयन्ति। अनयोर्द्वयोः स्थलयोर् ऐकारोच्चारणशैलीप्रयुक्त एव भेदः।

तथा हि[1]—ऐकारस्य यदा 'ऐ' इति विवृततमत्वेन उच्चारणं तदा यीत्यस्य लोपः। यदा च ऐकारस्य प्राकृतभाषीयोच्चारणाभासस्तदा असतः सयकारस्य ईकारस्य ततः पूर्वमकारस्य चोच्चारणम्। अनया रीत्या प्रातिशाख्यकाले ऐकारस्य औकारस्य च द्विविधमुच्चारणमस्माकं परिषदि लब्धास्पदमभवत्। परं हिन्दीभाषायाम् ऐकारस्य 'है' इत्येतादृशं विवृततमोच्चारणमद्यावधि अनुस्यूतं वर्तते। नहि तत्र प्राकृतोच्चारणस्य साम्राज्यमापतितम्। प्रत्युत संस्कृतभाषायामेव प्राकृतोच्चारणस्य प्रचारः प्राचुर्येण स्थानमलभत। "प्लुतावैच इदुतौ" (८।२।१०६), "एचोऽप्रगृह्यादूराद्भूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ (८।२।१०७) इति सूत्रयन् भगवान् पाणिनिः स्वसमयेऽपि तथोच्चारणं सूचयति। तत्रापि 'ऐतिकायन, औपगव' इत्यत्र ऐ३तिकायन औ३पगव इत्येवं प्लुतो चतुर्मात्रत्वसम्पत्तये आ ईतिकायन आ ऊ पगव इत्येवमुच्चारण-

---

१. तदेव चान्यत्र विपर्ययेण
कार्ये ऐत्वे सयमीकारमाहुः।
द्यातोर्बिभेतेर्जयतेर्नियश्च
मैष्म चाजैष्म नैष्टेति चैषु॥ (१४।४४)

मनुमते, चतुर्मात्रावत्र ऐचौ सम्पद्येते इत्युक्त्या द्विमात्रस्य अकारस्य द्विमात्रस्य ईकारस्य च सत्तासूचनात्। किञ्च, तत्सूत्रीयभाष्यसमालोचनया समप्रविभागपक्ष एव सिद्धान्तो वर्तते। यदा अर्धमात्राऽवर्णस्य अध्यर्धमात्रा इवर्णोवर्णयोस्तदा 'सिद्धं तु इदुतोर्दीर्घवचनात्' इत्यनेन इदुतोर्दीर्घेऽर्धतृतीयमात्रः प्राप्नोति। अथ हि अध्यर्धमात्रा वर्णस्य अर्धमात्रा इवर्णोवर्णयोस्तदा इकारोकारयोर्दीर्घेऽर्धचतुर्थमात्रः प्राप्नोति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तत्रायथेष्टप्रसङ्ग इति। तत्र सौर्यभगवतोक्तमनिष्टिज्ञो वाडवः पठति। इष्यत एव चतुर्मात्रः प्लुत इति भाष्योक्त्या चतुर्मात्रतापक्ष एव भाष्यसम्मतः, स च समप्रविभागपक्ष एव सम्भवति। "तयोर्य्वावचि संहितायाम्" (८।२।१०८) इति सूत्रं च प्रातिशाख्येन संवदते।

एवमेव[1] इकारस्य स्थाने क्वचिद् ऋकारं कुर्वन्ति। यथा "पतरेव चचरा चन्द्रनिर्णिक्" (ऋ० १०।१०६।८), "अतः सहस्रनिर्णिजा" (ऋ० ८।८।११) इत्यत्र निघटकेकारस्य स्थाने ऋकारमुच्चारयन्ति। स हि दुष्टत्वाद् वर्जनीयः। एवं "सुशील्ये बृहती मही" (ऋ० ९।५।६) इत्यत्र शिल्यघटकस्य इकारस्य स्थाने लृकारमुच्चारयन्ति। सोऽपि दोषः।

एतद्विपरीत्येन[2] "शिशीते शृङ्गे रक्षसे रक्षसे विनिक्षे" (ऋ०५।२।९), "यमीर्यमस्य बिभृयादजामि" (ऋ० १०।१०।९), "पाशा आदित्या रिपवे विचृत्ताः" (ऋ० २।२७।१६) इत्येतेष्वनन्तरे तालव्ये वर्ण सति ऋकारमुच्चारयन्ति इकारस्य स्थाने। अर्थाद् ऋकारात् पूर्वः परो वा यत्र तालव्यो वर्णो भवति, तदा पूर्ववैपरीत्येन इकारस्थाने

---

१. इकारस्य स्थाने ऋकारमाहुर्
लृकारं वा चन्द्रनिर्णिक् सुशिल्पे। (ऋ० १४।४५)

२. अनन्तरे तद्विपरीतमाहुस्
तालव्ये शृङ्गे बिभृयाद् विचृत्ताः (१४।४६)

ऋकारोच्चारणं कुर्वन्ति। पूर्वं हि इकारस्थाने ऋकार उच्चारितः, अत्र तु ऋकारस्यैव स्थाने इकार उच्चार्यत इति तद्वैपरीत्यं सुतरामापतति।

एवम्[1] "शुनःशेपो यमह्वद् गृभीतः" (ऋ० १।२४।१२), "प्रपाकं शास्सि प्रदिशो विदुष्टरः" (ऋ० १।३१।१४), विशां ववर्जुषीणाम्" (ऋ० १।१३४।६), "आजामिरत्के अव्यत" (ऋ० ९।१०१।१४), "विरप्शी गोमती मही" (ऋ० १।८।८) अत्र यकारादन्यस्तालुस्थानो वर्णो व्यञ्जनादुत्तरः 'शुनःशेप' इत्यत्र शकारः, 'शास्सि' इत्यत्र इकारः, 'ववर्जुषीणाम्' इत्यत्र जकारः, 'अत्के' इत्यत्र एकारः, 'विरप्शी' इत्यत्र शकारः। तत्र सयकारमुच्चारणं दोषः, स च वर्जनीयः।

"इन्द्र ज्यैष्ठ्याय सुक्रतो" (ऋ० १।५।६), "संवारत्रकिरस्य मधानि" (ऋ० १०।१३२।३), "आपृच्छ्यं धरुणं वाज्यर्षति" (ऋ० ९।१०७।५), "पुरुहूतो यः पुरुगूर्त ऋभ्वा" (ऋ० ६।३४।२), अत्र[2] चतुर्षु व्यञ्जनादुत्तरं यकारं वकारं वा नोच्चारयन्ति स दोषः।

[3]दीर्घायुः, सूर्यः, रुशदीर्त्ते, ऊर्जम् एषु चतुर्षु रेफेण संसक्तम् अन्तर्व्यस्यन्ति, अर्थाद् रेफात् पृथक् कुर्वन्ति, केनचित् स्वरेण व्यवदधतीत्यर्थः। स च दोषः।

---

१. तालुस्थानो व्यञ्जनादुत्तरश्चेद्
अयकारस्तत्र सयकारमाहुः।
शुनःशेपः शास्सि ववर्जुषीणा-
मत्के विरप्शीति निदर्शनानि॥ (१४।४७)

२. लुम्पन्ति वा सन्तमेवं प्वकारं
ज्यैष्ठ्याय संवारन्नापृच्छ्यमृभ्वा। (१४।४८)

३. व्यस्यन्त्यन्तर्महतोऽव्यायतं तं
दीर्घायुः सूर्योरुशदीर्त ऊर्जम्। (१४।४९)

[1]स्वस्तये। अधायि। भुवना। इयम्। ऊवुः। एष्वन्तस्थां यकारं वकारं वा नोच्चारयन्ति। अत्र हि सस्थानात् स्वरात् पूर्वां परां वा अन्तस्थां लुम्पन्ति द्विरुच्चारयन्ति वा।

[2]उग्रँ ओकः (ऋ० ७।२५।४) इत्यत्र अनुनासिकमँकारं दीर्घं कुर्वन्ति। स दोषो वर्जनीयः।

[3]आपृच्छ्यम्। तुच्छ्यान्। दध्याः। ऋभ्वा। एषु सोष्मभिः छकारधकारभकारैः सहिताद् यकारादवकाराद्वा पूर्वं ये छकारधकारभकाराः सन्ति, ततः परं शकारं सकारमुपध्मानीयं चोच्चारयन्ति। एवमेव ह्वये, अह्य इत्यादिषु वकाराद् यकाराच्च पूर्वमपरं हकारमुच्चारयन्ति। स दोषो वर्जनीयः।

[4]तृष्णुत, (ऋ० १।११०।१) आप्नानम्, (ऋ० १०।११४।७) औभ्नात (ऋ० ४।१९।४) इत्यादौ पवर्गेण संसृष्टाद् अनुनासिकात् पूर्वमन्यमधिकं यममुच्चारयन्ति, स दोषो भवति। अत्रेदं तत्त्वम्—ऋक्प्रातिशाख्यकाले 'तृष्णुत' इत्यादौ पकारानन्तरं णकाराच्च पूर्वं पूर्ववर्णपकारसदृशमागमत्त्वेन प्रसिद्धं यममुच्चारयन्ति स्म। परं तदानीमेव तद्यमातिरिक्तमधिकं यममपि उच्चारयन्ति स्म वेदानामध्येतारः

---

१. लुम्पन्त्यन्तस्थां क्रमयन्ति वैतां
स्वरात् सस्थानादवरां परां वा।...
स्वस्तयेऽधायि भुवनेयमूवुः।

२. रक्तं ह्रस्वं द्राघयन्त्युग्रँ ओकः। (१४।५१)

३. हकारसोष्मोपहिताद् यकाराद्
वकाराद्वा सर्वसोष्मोष्मपूर्वात्।
तत्स्थानं पूर्वमूष्माणमाहु-
स्तुच्छ्यान् दध्यामापृच्छ्यमृभ्वा ह्वयेऽह्यः॥ (१४।५२)

४. पकारवर्गोपहिताच्च रक्तात्
अन्यं यमं तृष्णुताप्नानमौभ्नात्। (१४।५३)

स च दोष इति स वर्जनीयः। अर्थाद् एक एव यमस्तत्र शास्त्रानुशिष्टः।

अनुस्वारमुपधां वान्यवर्णाम्, स्वरोपधात् सोष्मयमोदयश्चेत् तङ् घ्नन्त्यज्जो जङ्घ्नत ईङ्स्वयन्तीः सज्ज्ञातरूपोऽथ सज्ज्ञानमिन्द्रः। (ऋ० प्रा० १४ सू० ५४)। अस्यार्थः—यत्र ह्यनुनासिको वर्णः सोष्मपरको यमपरको वा भवति, तत्र स्वरोपधाद् रक्तात् पूर्वमनुस्वारमाहुः; उपधां वा अन्यवर्णाम्। अत्रायमर्थः—यथा 'तङ् घ्नन्ति' इत्यत्र 'तं घ्नन्ति' इत्यवस्थायामनुस्वारस्य परसवर्णो 'तङ् घ्नन्ति' इति स्थितौ अकारोपधो रक्तो ङकारोऽस्ति। स च ङकारः सोष्मघकारपरकोऽस्ति। ततो ङकारात् पूर्वमनुस्वारं केचन उच्चारयन्ति तङ् घ्नन्ति इत्येवम्। यद्वा अस्मिन्नेव स्थलेऽनुस्वारस्थानेऽपरं ङकारमुच्चारयन्ति। एतच्च उपधां वान्यवर्णामित्यनेन प्रतिपाद्यते।

अस्यैव सूत्रस्य अपरा व्याख्या—अस्मिन् सूत्रे "तत् सस्थानं पूर्वम्" (१४।५२) इत्यस्मात् सूत्रात् पूर्वमिति नानुवर्तते। तथा च स्वरोपधाद् रक्तपरात् परमनुस्वारमाहुः, उपधां वान्यवर्णामिति।

पुनरप्यन्या व्याख्या कैश्चित् क्रियते। तथा हि—सोष्मवर्णपरां यमपरां वा उपधामन्यवर्णमनुस्वारं कुर्वन्ति। तथा चास्मिन् पक्षे स्वरोपधं रक्तमनुस्वारं कुर्वन्तीत्यर्थः। एतत् सर्वं दोषत्वेन परिगण्यते।

भिन्नासु भिन्नासु व्याख्यासु इमान्येवोदाहरणानि सन्ति, तानि यथा—"नकिष्टङ् घ्नन्त्यन्तितो न दूरात्" (ऋ. २।२७।१३), "गोभिरञ्जसो मदाय कम्" (ऋ. ९।४५।३), "पवमानस्य जङ्घ्नतः" (ऋ. ९।६६।२५), "ईङ्खयन्ती रपस्युवः" (ऋ. १०।१५३।१), "सञ्ज्ञातरूपश्चिकेतदस्मै" (ऋ. १।६९।५), "सञ्ज्ञानमिन्द्रश्चाग्निश्च" (ऋ. खि० १०।१९१।१), [1]"शर्मन् स्याम मरुतामुपस्थे" (७।३४।२५), "अस्मिन्

---

१. सान्तस्थादौ धारयन्तः परक्रमं
शर्मन् स्यामास्मिन्मुजनाञ् छ्रधीयतः। (१४।५५)

स्वेतच्छकपूत एनः" (१०।१३२।५), "सं यावप्रथो अपसेव जनाञ् छूधीयतः" (ऋ. ६।६७।३) एषु स्थलेषु सान्तस्थस्य संयोगस्यादावनुनासिकं वर्णं विलम्बेनोच्चारयन्तः परस्य क्रमं द्वित्वं कुर्वन्ति ।

[1]अनुनासिकैर्वर्णैः समवाये स्वराणां रागो नामानुनासिकत्वं क्रियते । स दोषो वर्जनीयः । यथा—"न नूनमस्ति नो श्वः" (१।१७०।१), "नृम्णं तद्धत्तमश्विना" (ऋ. ८।९।२), "नृमणा वीरपस्त्यः" (ऋ. ५।५०।४), "कर्हि स्वित्तदिन्द्र यन्नृभिर्न्नून्" (ऋ. ६।३५।२), 'नूनम्', 'नृम्णम्', 'नृमणा', 'नॄन्' एषूदाहरणेषु स्वराननुनासिकानुच्चारयन्ति । इयं हि रीतिरन्यत्राप्यात्मसात् क्रियते । प्रायो हि लोके पञ्चमवर्णसहितेषु स्वरेष्वनुनासिकत्वं क्रियते । अयमेव हि विषयो जस्टिस् धावले सविधे मया समुपस्थापितोऽभवत् पुर्यां समुद्रतटे– नास्मिन् भारते कोऽपि मनुष्योऽदुष्टान् वर्णानुच्चारयितुं शक्नोतीति । यत्प्रसङ्गतः प्रसन्नः स मां प्राविन्सल्सर्विसपदमानेतुं प्रायतिष्ठ, आनीतवांश्च ।

[2]"दध्यङ् ह मे जनुषम्" (ऋ. १।१३९।९), "देवान् हवत ऊतये" (ऋ. १।१०५।१७), "दक्षसोमहान्हिषः" (ऋ. ८।१३।१) एष्वनुनासिकात् परो हकारः सोष्मा क्रियते । अर्थाद् यद्वर्गीयो रक्तो वर्णस्तद्वर्गीयसोष्मवदुच्चार्यते स दोषः ।

संयोगानां स्वरभक्त्या व्यवायो विक्रमणं क्रमणं वा यथोक्तम् ॥

(१४।५८)

अस्मिन् ह्यष्टपञ्चाशत्तमे सूत्रे चत्वार उच्चारणदोषाः प्रतिपादिताः सन्ति । तत्र प्रथमो दोषः क्वचित् संयोगानामविद्यमानया स्वरभक्त्या

---

१. रक्तै रागः समवाये स्वराणां
न नूनं नृम्णं नृमणा नृभिर्नॄन् । (१४।५६)

२. रक्तात्तु सोष्मा क्रियते हकारो
दध्यङ् ह देवान् हवते महान्हि । (१४।५७)

व्यवायः। क्वचिच्च विक्रमणम्। विक्रमणं द्विर्वचनाभावः। अर्थात् संयोगस्य मध्ये क्वचित् स्वरोत्पादनम्। अयं हि द्वितीयो दोषः। क्वचिच्चायथोक्तं क्रमणं द्वित्वमित्यर्थः। अयं हि तृतीयो दोषः। क्वचिद् विपर्ययः, विपर्ययो नाम विद्यमानायाः स्वरभक्तेरनुच्चारणम्। अयं हि चतुर्थो दोषः। इमे चत्वारो दोषाः संयोगस्य भवन्ति। ते च वर्जनीयाः।

अत्र सूत्रे भाष्ये चतुर्णां दोषाणां नहि विशकलितयोपपादनं कृतम्। पूर्वत्र त्वविद्यमानया स्वरभक्त्या व्यवायः। अन्यस्य स्वरस्योच्चारणेन द्वित्वाभावः। अनीप्सितं द्वित्वम्। क्वचिच्च विद्यमानायाः स्वरभक्तेरनुच्चारणम्।

[1]व्यत, तिल्विले, आज्मन्, द्रप्सः—एषु चतुर्षूदाहरणेषु विक्रमणमेव दोषः प्रदर्शितोऽस्ति। तथा च व्यत, तिल्विले, अज्मन्, इत्येतेषु स्वरभक्त्या व्यवाय इव भवति, अतो द्विर्वचनाभावः। 'द्रप्सः' इत्यत्रापि विक्रमणमेव, परमत्र स्वरेण व्यवायसत्त्वाद् द्वित्वाभावः। तथा च विक्रमणत्वेन ग्रहणे त्रय एव दोषा भवेयुः। स्वरभक्त्या अन्येन वा स्वरेण व्यवाये इत्येवं विभागे चत्वारो दोषा भवेयुः। अजुष्रन् इत्यत्र षकारात् परं टकारमिव किञ्चिदुत्पाद्य अयथोक्तं द्वित्वं कुर्वन्तीत्यर्थः। साञ्जर्य इत्यत्र विद्यमानायाः स्वरभक्तेरनुच्चारणम्। अष्ट्राम्, नेष्ट्रात्, इत्येतेषु च क्रमणमेव। "शूरो यो युत्सु तन्वं परिव्यत" (ऋ० २।१७।२), "भद्रे क्षेत्रे निमिता तिल्विले वा" (ऋ० ५।६२।७), "विश्वो वो अज्मन् मयते वनस्पतिः। द्रप्सश्चस्कन्द पथमाँ अनुद्यून्" (ऋ० १०।१७।११), "स्वसारः इयावी मरुषोमजुष्रन्" (ऋ० १।७१।१), "भरद्वाजान् सार्ञ्जयो अभ्ययष्ट" (ऋ० ६।४७।२५), अष्ट्रां पूषा शिथिरामुद्वरीवृजत्" (ऋ० ६।५८।२), "प्रदेवं देव्या धिया" (ऋ० १०।१७६।२), "नेष्ट्रात्

---

१. विपर्ययो वा व्यत तिल्विलेज्मन्
द्रप्सोऽजुष्रन् सार्ञ्जयोऽष्ट्रां प्रनेष्ट्रात्। (१४।५८)

सोमं द्रविणोदः पिब ऋतुभिः" (ऋ० २।३७।३) इमान्युदाहरणानि प्रातिशाख्यभाष्ये संदर्शितानि।

"विवृत्तिषु प्रत्ययादेरदर्शनं यथा वा ऐच्छश्च य औशिजश्च" (१४।५९)। सेयं विवृत्तिः 'स्वरान्तरं तु विवृत्तिः' (प० २–सू० ३) इत्यादिभिः सूत्रैर्लक्षिताः। 'सा वा स्वरभक्तिकाला (प० २। सू० ४) इत्यनेन सूत्रेण तु स्वरभक्तिसमानकालत्वं विवृत्तेः प्रतिपादितमस्ति। तत्सूत्रे भाष्ये पूर्वसूत्रसारांशो वक्ष्यमाणः प्रतिपादितोऽस्ति। तत्रायं विवृत्तेर्विभागस्त्रिप्रकारः—उभयतो ह्रस्वा पादमात्राकाला, एकतो दीर्घार्धमात्राकाला, उभयतो दीर्घा पादोनमात्राकाला।

[1]इ उ इत्येतयोः सन्धौ कासुचिद् विवृत्तिषु सन्ध्यक्षरस्योच्चारणं परस्यादर्शनं च क्रियते, तौ दोषौ वर्जयेत्। यथा—"स इ दस्तेव प्रतिधादसिष्यन्" (ऋ० ६।३।५), "स इन्द्रचित्रां अभितृन्धि वाजान्" (ऋ० ६।१७।२), "कस्त एषः कधध्रिये" (ऋ० १।३०।२०), "त उत्स्राय रयिमभि प्रतस्थुः" (ऋ० २।१५।५)।

[2]समानवर्णासु विवृत्तिषु कासुचिद्विपर्ययः क्रियते, परस्यादेर्वा अदर्शनम्। विपर्ययो नाम पूर्वो वर्णः परः क्रियते परश्च पूर्व इति। यथा "आ न स्तुत उपवाजोरूती इन्द्रम्" (ऋ० ४।२९।१), "क आसतो वचसः सन्ति" (५।१२।४), "त आ गमन्तु त इह" (ऋ० ६।४९।१), "अच्छा यो गन्ता नाधमानमूती इत्था" (ऋ० ४।२९।४), 'ऊती इन्द्र' इत्यत्र पूर्वं दीर्घोच्चारणमकृत्वा ह्रस्वोच्चारणं क्रियते। अथवा परस्य इन्द्रघटकस्य इकारस्य लोपः। एवमेव सर्वत्र योजना।

---

१. इ उ सन्धौ सन्ध्यवचनं च कासुचित्
स इदस्ता कस्त उषो यथैते। (१४।६०)

२. समानवर्णासु विपर्ययो वा
यथा ह्यूती इन्द्रक आसतश्च। (१४।६१)

अभिव्यादानं च विवृत्तिपूर्वे कण्ठ्ये ता आपोऽवसा एति दीर्घे (१४ सू० ६२)। अस्मिन् सूत्रे विवृत्तिः पूर्वा अस्मात् स विवृत्तिपूर्वस्तस्मिन् विवृत्तिपूर्वे कण्ठ्ये दीर्घे परे अभिव्यादानं नाम दोषः क्रियते। स वर्जनीयः। इत्येवं सप्तमीनिर्देशेन 'क आसत' इति पूर्वसूत्रोदाहरणे "समानवर्णासु विपर्ययो वा" (१४।६१) इत्यनेन विपर्यय उक्तः, स च विरुध्येत। तस्मान्न सप्तमीनिर्देशः। किन्तु विवृत्तिः पूर्वाऽस्मादक्षरात् तद्विवृत्तिपूर्वमक्षरम्। विवृत्तेः पूर्वमपि विवृत्तिपूर्वम्। द्वयोरेकशेषे द्विवचनान्तोऽयं प्रथमाविभक्त्यन्तः शब्दः। तथा च ते उभे कण्ठ्ये दीर्घ यदा भवतस्तदा कासुचिद् विवृत्तिष्वभिव्यादानं क्रियते, कासुचित् प्रत्ययादेरदर्शनं वा क्रियते, तौ दोषौ वर्जयेत्। अभिव्यादानं नाम विवृत्तेः कालात् पादमात्रमधिकं कालमपेक्षते यत्र तदभिव्यादानम्। यथा "ता आपो देवीरिह यापयन्तु" (ऋ० ७।४९।१), "स्वस्त्या गृहेभ्य आवसा आ विमोचनात्" (ऋ० ३।५३।२०), "या आपो दिव्याः" (ऋ० ७।४९।२९), "ता आचरन्ति" (ऋ० ४।५१।८) अत्र पादोनमात्राकाला विवृत्तिः शास्त्रसम्मता। सैव यदि एकमात्रात्मकेन कालेनोच्चार्यते तदा अभिव्यादानं नाम दोषो भवति।

एते दोषा दिङ्मात्रेण दर्शिताः। [1]एते च दोषाः स्वरेषूच्चार्यमाणेषु प्रदर्शिताः। व्यञ्जनसंयोगजानां दोषाणां स्वरूपं तु न प्रदर्शितम्, यतो ह्युच्चावचाः प्रयोक्तारो नानास्थानकरणानुप्रदानस्वरोच्चारणास्तथा नानाप्रकृतिस्वभावशीलसमाचाराः केषु केषु वर्णेषु कान् दोषान् जनयन्तीति ज्ञातुं न शक्यते।

---

१. न दोषाणां स्वरसंयोगजानामन्तो गम्यः संख्ययाप्येतराणाम्। (ऋ० प्रा० १४ (६३)

अस्माच्छास्त्राद्[1] वर्णानां सम्यक् स्वरूपं ज्ञातुं शक्यते। यो हि मनोवाग्बुद्धियुक्तस्तत्त्वार्थदर्शी शिक्षालक्षणविदूहापोहवितर्कज्ञः शास्त्रागमकुशलो ध्यानपरोऽवितथाध्यवसायी स हि सम्यग् वर्णस्वरूपं बोद्धुं तथा यथावद् वर्णान् उच्चारयितुं च शक्नोति।

[2]अकारस्य करणावस्थयाऽन्यान् ऋ ॠ इ ई उ ऊ इत्येवमाद्यानन्यानपि स्वरान् ब्रूयात्। तद्धि संपन्नं भवति। परान् ककारादीनपि वर्णान् व्यञ्जनसंज्ञकान् ऊकारपरकानिव विवक्षेत् सर्वत्र वर्णानित्याहुराचार्याः क का कि की कु कू इति यथा। सा संपदुभाभ्यां पटलाभ्यां व्याख्याता। अस्मिन् प्रातिशाख्ये शास्त्राणामपवादोऽस्ति। अर्थाद् वर्णोच्चारणप्रक्रियामुपपाद्य नहि कोऽपि वर्णों यथावदुच्चारयितुं शक्यते, इति हि प्रतिपादितम्। अन्यत्र शास्त्रेषु बहवो दोषाः पुनरुक्तता अविस्पष्टार्थता कष्टशब्दता अशक्यार्थतेत्येवमादयः सन्ति। अत्र त्वशक्यार्थता दोषो जागर्ति। तस्मात् शास्त्रापवादाद् अप्रयोजना वर्णशिक्षेति "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायेनास्मिन् शास्त्रे नहि कोऽपि प्रामाणिकः प्रवर्तेत।

किञ्च, प्रतिपत्तिभेदादपि निष्प्रयोजनेयं वर्णशिक्षेत्यप्यवधार्यताम्। प्रतिपत्तिभेदो नाम विरुद्धाभिधानम्। तथा हि "आहुर्घोषं घोषवतामकारम्" (१३।१५) इत्युक्त्वा "अत्रोत्पन्नावपरे ऊष्मघोषौ" (१३।१८) अनयोः सूत्रयोराद्यं सूत्रमनित्यतापक्षे संघटते। तच्च

---

१. शक्यस्तु शास्त्रादधि साधुधर्मो
युक्तेन कृत्स्नः प्रतिपत्तुमस्मात्। (प० १४ सू० ६४)

२. अकारस्य करणावस्थयाऽन्यान् स्वरान् ब्रूयात् (प० १४ सू० ६५), तद्धि संपन्नमाहुः (प० १४ सू० ६६), परानकारोदयेवद् विवक्षेत् सर्वत्र वर्णानिति संपदेषा (प० १४ सू० ६७), शास्त्रापवादात् प्रतिपत्तिभेदान्निन्दन्यकृत्स्नेति च वर्णशिक्षाम् (प० १६। सू० ६८)।

नास्माकमभीष्टम्। अतः "अत्रोत्पन्नावपरे ऊष्मघोषौ" (१३।१८) इत्यनेन वर्णनित्यत्वाभिमानिनां मतेन ऊष्मघोषौ वायू उत्पद्येते इत्यपरेषां मतम्। तथा चैवं विरुद्धार्थाभिधानान्निष्प्रयोजनेयमिति चेन्न, [1]अन्येष्वपि शास्त्रेषु ग्रस्तनिरस्तादयो दोषा निर्दिश्यन्ते। सत्सु तेषु दोषेषु तानि शास्त्राण्यकृत्स्नानीति नोच्यते, किन्तु तानि कृत्स्नान्येव भवन्ति; तद्वदिदमपि शास्त्रं कृत्स्नं भवेदित्याद्युक्तिशतानां जागरूकत्वात्, अन्येष्वपि शास्त्रेषु बहुविधानां विकल्पानां सद्भावात् तेषां चानिन्द्यत्वात्। तथा चेदमपि शास्त्रं शिक्षात्वेन षट्स्वेवाङ्गेष्वन्तर्भवति। तथा चेदमपि शास्त्रं सप्रयोजनम्, अनिन्द्यमिति च। एतच्छास्त्रं पठित्वा सर्वानपि विदुषोऽतिशेते।

प्रातिशाख्येषु करणं द्विविधं प्रदर्शितम्—एकं तु स्पृष्टतादिरूपम्, अपरं तु वर्णस्थानानि येन स्पृश्यन्ते तदिति। परमत्र ऋग्वेदे स्पृष्टतादिकमेव करणमुपनिबद्धम्। तथा च ऋग्वेदप्रातिशाख्ये—(१) कण्ठः, (२) उरः, (३) जिह्वामूलम्, (४) तालु, (५) मूर्धा, (६)

---

१. सैतेन शास्त्रैर्न विशिष्यतेऽन्यैः
कृत्स्नं च वेदाङ्गमनिन्द्यमार्षम्। (१४।६९)
तथा चोक्तं तद्भाष्ये—

उक्त्वोदाहरणं किञ्चिद् बहुग्रन्थधरो नरः।
आक्षिप्तः शैक्षिकेणेह तृणाग्निरिव शाम्यति॥
सुबहुज्ञोऽपि यो भूत्वा शिक्षां चेन्नाधिगच्छति।
न राजति सभायां सः शैक्षिकस्य समीपतः॥
ब्राह्मणेषु समेतेषु विद्वत्सु च बहुष्वपि।
ब्रह्मोद्ये संप्रवृत्ते यः शैक्षिकः स विराजते॥

क्रमादित्वाद् वुनि शिक्षक इत्येव पाठः समीचीनः।

दन्तमूलम्, (७) वर्त्वम्, (८) ओष्ठः, (९) नासिकेति नव स्थानानि। अत्र करणं तु "तद्विशेषः करणम्" (प० १३ सू० ८) इति सूत्रेण लक्षितं प्रदानापरनामधेयं वेदितव्यम्। तानि च (१) स्पृष्टम्, (२) अपृस्पृष्टम्, (३) दुःस्पृष्टमितीमानि त्रीणि करणानि भवन्ति।

नवमं दलम्

यजुःप्रातिशाख्यानुसारमधुना प्रदर्श्यते—माध्यन्दिनानां जिह्वामूलीयोपध्मानीयनासिक्या न सन्ति। प्रातिशाख्यप्रवृत्तिस्तु प्राधान्यतो वेदशाखामवलम्ब्यैव सङ्गच्छते। अत एव "स्वरसंस्कारयोश्छन्दसि नियमः" (यजुः प्रा० १।१) इति सूत्रं सङ्गतं भवति। यतो हि लोके स्वरस्यानुदात्तादेः संस्कारस्य लोपागमवर्णविकारप्रकृतिभावरूपस्य नियमो नास्ति। वेदे एव एते नियमेनापेक्ष्यन्ते। कुत इति चेद् "लौकिकानामर्थपूर्वकत्वात्" (पृ० १–१)। लोके हि किञ्चित् प्रयोजनमुद्दिश्यैव वक्ता शब्दं प्रयुङ्क्ते। वेदे तु "अहरहः स्वाध्यायमधीयीत" इति शासनेन नित्यमध्ययनं विधीयते। परमत्रापरितुष्यन् सूत्रकारः स्वयमेव "न समत्वात्" (य० १–३) इति सूत्रयति। यतो हि "एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति" (महा० पस्प०)।

नाकमिष्टसुखं यान्ति चतुर्भिर्वाडवै रथैः।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः॥

इत्यादिभगवत्पतञ्जल्युक्त्या लोकेऽपि स्वरसंस्कारयोरपेक्षा नापह्नोतुं शक्यते। "य एव लौकिकास्त एव वैदिकास्त एव तेषामर्थाः" (यजुःप्रा० उव्वटभाष्यम्, अ० १ सू० ३) इत्यनेनायमेवार्थः पुष्यते उव्वटभाष्ये।

परमुपरिष्टात् "स्याद् वाम्नायधर्मित्वाच्छन्दसि नियमः" (य० प्र० अ० १-४) इति सूत्रयता सूत्रकारेण छन्दोऽर्थमेतत् प्रातिशाख्यं प्रवृत्तमिति निश्चीयते। यतो हि छान्दसान्येव तत्तच्छाखीयानि वाक्यान्युद्धृतानि ग्रन्थकृता। लोकार्थं तु सर्ववेदपारिषदं पाणिनीयं व्याकरणं सर्वसाधारणसाधुशब्दज्ञानार्थं जागर्त्येवेति। यच्चास्मिन्नेव प्रातिशाख्ये "यत्तन्न" (य० प्रा० १-५) इति सूत्रं समुट्टङ्कितम्, तत्तु नहि "स्याद् वाम्नायधर्मित्वाच्छन्दसि नियमः" (य० प्रा० १-५) इत्यस्य प्रतिषेधकम्, किन्तु "यन्न ज्ञायते शब्दकारणं तद् वक्ष्यामः" इति सूत्रशेषेण उत्तरग्रन्थोपोद्घातकम्। तत्र शब्दस्य कारणमुच्यते "वायुः खात्" (यजुः प्रा० ३१।४६) शब्दस्य कारणभूतो वायुराकाशादुत्पद्यत इति च तदर्थः। स च वाग्वात्मकः शब्दः सम्यक्करणैरुपहितो वेणुशङ्खादिभिः शब्दीभवन् पुरुषप्रयत्नं प्राप्य वर्णो भवतीति "शब्दस्तत्" (य० प्रा० १।७) इति सूत्रेण प्रतिपाद्यते। तथा च उरः, मूर्धा, कण्ठ इतीमानि[1] त्रीणि स्थानानि संवृतविवृते इति द्वे[2] करणे [3]शरीराद् निर्गच्छतो वायोर्भवन्ति, मुखस्थानानि स्थानकरणानि तूपरिष्टाद् वक्ष्यन्ते। तथा च [4]शारीरमग्निमाहत्य उरसः समुद्भूतो वायुर्मूर्धानमाहत्य कण्ठतः [5]शारीरेषु तालवादिषु स्थानेषु विशेषवर्णरूपेणाभिव्यक्तिमापद्यते। तत्र वर्णानां निर्देशोऽकारोत्तरात् कादिकात् कारप्रत्ययेन क्रियत इति शब्देन केवलेन वा। यमानुस्वारविसर्गजिह्वामूलीयोपध्मानीयाः स्वरूपतो निर्दिश्यन्ते।

---

१. त्रीणि स्थानानि (य० प्रा० १।१०)।
२. द्वे करणे (य० प्रा० १।११)।
३. शरीरात् (य० प्रा० १।१२)।
४. शरीरम् (य० प्रा० १।१३)।
५. शरीरे (य० प्रा० १।१४)।

'उपरिष्टाद् वर्णाः' (य. प्रा. १।३४) इति सूत्रयन् सूत्रकारो लौकिकं वर्णसमाम्नायमङ्गीकरोति। तत्रादौ स्वराणां मध्ये आद्यानामष्टानां सिमूसंज्ञा क्रियते। तथा च अ आ इ ई उ ऊ ऋ ॠ इत्येवं पाठक्रमः प्रतीयते। "सन्ध्यक्षरं परम्" (यजुः प्रा. अ. १–४५) इत्यनेन सूत्रेण ए ऐ ओ औ इत्येतेषां चतुर्णां सन्ध्यक्षरसंज्ञा भवति। तदनन्तरं "व्यञ्जनं कादि" (य. प्रा. १।४७) "अमात्रो ह्रस्वः" (य. प्रा. १।५५) इति सूत्रेण मात्राह्रस्वशब्दौ पर्यायौ प्रतीयेते। ह्रस्वाद् द्विगुणकालो वर्णो [२]दीर्घसंज्ञो भवति। त्रिमात्रः [३]प्लुतः। [४]व्यञ्जनमर्धमात्रा। [५]अर्धमात्रार्धमणुसंज्ञं भवति। वर्णानामधिकरणं स्थानशब्देनोच्यते।

वर्गाणां प्रथमवर्णग्रहणेन तत्तद्वर्गगता वर्णा बोद्धव्याः। ऋकारः, ॠकारः, ॠ३कार इति त्रयः, जिह्वामूलीयः कवर्गश्च इत्येते [७]जिह्वामूलस्थाना वेदितव्याः। इ ई ई ३ इत्येते त्रयः, चवर्गः, शकारः, एकारः, यकार इत्येते [८]एकादशवर्णास्तालुस्थाना वेदितव्याः। षकारः, टवर्ग इत्येते [९]षड् वर्णा मूर्धन्या वेदितव्याः। रेफो दन्तमूलस्थानो[१०]ज्ञेयः।

---

१. सिमादितोऽष्टौ स्वराणाम् (य० प्रा० १–४४)
२. °द्विस्तावान् दीर्घः (य० प्रा० १।५७)।
३. प्लुतस्त्रिः (य० प्रा० (१।५८)।
४. व्यञ्जनमर्धमात्रा (य० प्रा० १।५९)।
५. तदर्धमणु (य० प्रा० १।६०)।
परमाण्वर्धाणुमात्रा (य० प्रा० १।६१)।
६. प्रथमग्रहणे वर्गम् (यजुःप्रा० १।६४)।
७. ऋ ५ कौ जिह्वामूले (यजुःप्रा. १।६५)।
८. इचशेयास्तालौ (यजुःप्रा. १।६६)।
९. षटौ मूर्ध्नि (१।६७)।
१०. स्थाने (य. प्रा. १।६२)।

ऌ, ॡ, ॡ ३ लकारः सकारः, तवर्ग इत्येते दशवर्णा दन्तस्थाना बोद्धव्याः। त्रिविध उकारः, वकारः, पवर्गः, ओकारः, उपध्मानीयश्चेति एकादशवर्णा ओष्ठस्थाना ज्ञेयाः। त्रिविधः अकारः, हकारविसर्गौ एते पञ्च वर्णा कण्ठस्थाना भवन्ति।

तत्र भाष्ये संवृतास्यप्रयत्नः अकारः, विवृत्तास्यप्रयत्ना इतरे स्वराः। एवं च अस्पृष्टास्यप्रयत्नाः स्वराः, स्पृष्टास्यप्रयत्नाः स्पर्शाः, ईषत्स्पृष्टास्यप्रयत्ना अन्तस्थाः, अर्धस्पृष्टास्यप्रयत्ना ऊष्माणः, अनुस्वारश्च भवन्ति। अयमास्यप्रयत्नः शिक्षाविद्भिरुक्तः।

ऐकारे औकारे च अकारमात्रा पूर्वा एकारमात्रा ओकारमात्रा च उत्तरा क्रमशो ज्ञेयाः। एकारमात्रा तालव्या ओकारमात्रा तु ओष्ठ्या भवति।

अत्र केचिदाहुः—[1]ऐकारे अकारस्यार्धमात्रा एकारस्याध्यर्धमात्रा। औकारे अकारस्यार्धमात्रा ओकारस्याध्यर्धमात्रेति। [2]चत्वारो यमा अनुस्वारनासिक्यौ चेति षड् वर्णा नासिकास्थाना भवन्ति। तत्र हुँ इति नासिक्यः। मुखसहितया नासिकया यो हि वर्ण उच्चार्यते सोऽनुनासिको भवति[3]। तत्र स्वराणामयं वैकल्पिको धर्मोऽनुनासिकत्वं नाम। रेफवर्जितानामन्तःस्थानां तु वाचनिकः। परमेतन्नोपपद्यते, नहि वचनमन्तरा स्वराणामनुनासिकत्वं दृश्यते। केवलं प्रतिज्ञया पाणिनीया वर्णा अनुनासिका भवन्ति।

इत ऊर्ध्वं वर्णानां करणं प्रदर्श्यते—[4]दन्त्यानां वर्णानां जिह्वाग्रं करणं

---

१. ऐकारौकारयोः कण्ठ्या पूर्वमात्रा तालव्योष्ठ्योरुत्तरा (य. १।७३)।

२. यमानुस्वारनासिक्यानां नासिक (य. १।७४)।

३. मुखनासिकाकरणोऽनुनासिकः (य. १।७५)।

४. दन्त्या जिह्वाग्रकरणाः (य. १।७६)। रश्च (१।७७)।

भवति रेफश्च जिह्वाग्रकरणो वेदितव्यः। [1]मूर्धन्याः=षकारटवर्गौ प्रतिवेष्टितजिह्वाग्रकरणौ ज्ञेयौ। [2]तालुस्थाना इ-चु-श-य इत्येते जिह्वामध्यकरणा वेदितव्याः। हुँ इति नासिक्यः, ओष्ठ्याश्च वर्णाः समानकरणस्थाना भवन्ति[3]। वकारस्य तु [4]दन्ताग्रं करणं भवति। [5]यमानां नासिकामूलं करणं भवति। [6]जिह्वामूलीयानुस्वारा हनुमूलकरणा भवन्ति। कण्ठ्या[7] हनुमध्यकरणा वेदितव्याः।

[8]क्रमजं चेति सूत्रे भाष्ये पाशर्व्यमित्यत्र "स्वरात् संयोगादिर्द्वि-रुच्यते" (अ. ४-१०) इत्यनेन शकारस्य द्वित्वे प्रथमः शकारः क्रमजो द्वित्वाज्जातो वेदितव्य इत्युक्तम्। तच्चिन्त्यम्, आगन्तुकानामग्रे सन्नि-वेशादाद्यस्य क्रमजत्वाभावात्।

अत्र प्रातिशाख्ये—[9]स्वरात् संयोगादिरित्यादिना प्रकरणेन यस्य द्विरुच्येते तस्य कृते वर्णद्वयमपि एकप्रयत्ननिर्वर्त्यं स्यात्। [10]समानपदे स्वरमध्ये यद् द्विवर्णं तत् समानधारणादेकवर्णवत् स्यात्। [11]वर्णद्वयमपि

---

१. मूर्धन्याः प्रतिवेष्टयाग्रम् (य. १।७८)।
२. तालुस्थाना मध्येन (य. १।७९)।
३. समानस्थानकरणा नासिक्यौष्ठ्याः (य. १।८०)।
४. वो दन्ताग्रैः (य. १।८१)।
५. नासिकामूलेन यमाः (य. १।८२)।
६. जिह्वामूलीयानुस्वारा हनुमूलेन (य. १।८३)।
७. कण्ठ्या मध्येन (य. १।८४)।
८. क्रमजं च (य. १।१०४)।
९. द्विवर्णमेकवर्णवद्धारणात् स्वरमध्ये (य. ४।१४२)।
१०. समानपदे (य. ४।१४४)।
११. स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र (अ. ४।१०१)।

एकप्रयत्ननिर्वर्त्यं स्यादिति भावः। यथा व्यात्तम्, वित्तम्, कुक्कुटः।

स्वरमध्य इति कथनेन आज्ज्यम्, भुज्ज्युः—इत्यत्र जकारस्य यकारेण व्यवधानाद् एकवर्णबद्धावाभावः।

[1]ऐकार औकारश्च द्विवर्णौ सन्तौ एकवर्णबद्धारणाद् एकवर्णौ भवतः, एकप्रयत्ननिर्वर्त्यौ भवत इत्यर्थः। एतेन ऐकारौकारयोरुच्चारणं हिन्दीभाषायां यथा क्रियते तथैव साधु, न तु प्राकृतोच्चारणं पुण्यावहमिति तत्त्वम्।

एकेषामाचार्याणां मतेन स्वरमध्ये समानपदे वर्तमानौ [2]डकार-ढकारौ क्रमशः ळह्यौ आपद्येते, एतच्च परेषां मतेनोक्तम्। स्वमते तु "तस्मिळँ ळह्व जिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम्" इत्यनेन तन्निषेधात्। [3]ऋकारे ऌकारे च यथासंख्यं रेफलकारौ कण्ठ्याणुमात्रयोर्मध्येऽर्धमात्रकौ (संश्लिष्टौ =) एकीभूतौ, अविद्यमानपृथक् श्रुतिधरौ = एकश्रुतिभूतौ स्तः। असंयोगपूर्वो [4]ऽनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्राकालो भवति, पूर्वश्च ह्रस्वोऽर्धमात्राकालः। [5]दीर्घात् स्वरात् परोऽनुस्वारोऽर्धमात्राकालो भवति।

अथ यमाः—"अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम्" (अ० ४ सू० १६३) पदमध्येऽपञ्चमः स्पर्शः पञ्चमेषु स्पर्शेषु परेषु विच्छेदमापद्यते। विच्छेदो नाम यमः। 'रेक्क्म्' इत्यत्र "स्वरात्संयोगादिः" इत्यादिना सूत्रेण ककारस्य द्वित्वे कृतेऽनेन सूत्रेण द्वितीयस्य ककारस्य यम इत्ययं कार्यक्रमः क्रियते। यथा 'यज्ज्ञः' जकारयमौ ञकारश्च संयोगः।

---

१. ऐकारौकारौ च (अ. ४।१४५)।

२. डढौ ळ ळह्यौ एकेषाम् (यजुः प्रा. ४।१४६)।

३. ऋऌवर्णौ रेफलकारौ संश्लिष्टौ अश्रुतिधरौ एकवर्णौ।

४. अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रा पूर्वा चार्धमात्रेति (४।१५७)।

५. दीर्घादर्धमात्रा पूर्वा चाध्यर्धा (अ० ४।१५१)।

'दद्भ्या' दकारधकारयमौ नकारश्च संयोगः। 'अन्तः पदे' इति किम्? 'त्मन्या समञ्जन्' अत्र द्वित्वाभावात् तकारमकारौ संयोगः। यजुःप्रातिशाख्यमते तु यमा आदेशा एव "अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम्" (यजुः प्रा० आ ४ सू० १६) इति सूत्रे 'अन्तःपदे' ग्रहणसामर्थ्यात्। अन्यथा पदादेर्द्वित्वाभावात् पञ्चमे मकारे परे आद्यस्य धकारस्य यमादेशे पूर्वसादृश्यस्य तत्राभावात् यमत्वव्यवहारस्यैवोन्मूलत्वात्।

वस्तुतस्तु आदेशपक्ष एव 'अन्तःपदे' इत्यस्य वैयर्थ्यम्, द्वित्वाभावेन सूत्रस्य तत्राप्रवृत्तेः। यदि त्वनुपसर्गाज्ज्ञ इत्यादौ अन्तःपदे ग्रहणाभावे दकारस्य जकारस्य वा जकारेण प्रयत्नसाम्यस्य सत्त्वात् तत्र यमत्वाभावाय तद्ग्रहणं चरितार्थमित्युच्येत, तदा सर्वं सुस्थम्।

किञ्च, यदि यमा आदेशा मन्येरंस्तदात्मना इत्यत्र अन्तःपदे ग्रहणाभावेऽपञ्चमस्तकारः पञ्चमे मकारे परे यमत्वमापद्येत। परं तकारात् पूर्वमन्यस्य वर्णस्याभावात् कथं तकारस्य यमादेशः, यमस्तु पूर्ववर्णे विद्यमाने एवावकाशमासादयति, अत्र च पूर्ववर्णस्याभावात्। तस्मादन्तःपदे इत्येवागमपक्षं पुष्णाति। विशेषस्तु ऋक्प्रातिशाख्यीये यमविचारे द्रष्टव्यः।

ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः। "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (यजु. ४।१०४।१०२) इत्यनेन सूत्रेण द्वित्वे कृते "ऊष्मभ्यः पञ्चमेषु" (४।१६४) इत्यनेन यमत्वं निषिध्यते। परमत्र "अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम्" (य० ४।१६१) इत्यनेन सूत्रेण यमापत्तिरायात्येव, नह्यूष्मण एव सत्त्वान्न स्पर्शास्तत्र यमापादानं कर्तुं शक्नुवन्ति, तेषां तत्राभावात्। तत्परिहारार्थं यदि "अन्तःपदेऽपञ्चमात् पञ्चमेषु विच्छेदम्" इति पाठः कल्प्यते, तदा तु प्राप्तो यमो निषेद्धुं शक्यते। अपञ्चमादित्यनेन ऊष्माणोऽन्तस्थाश्च ग्रहीतुं शक्यन्ते। तदेव ऊष्मभ्य

इत्यनेन निषिध्यते। एवं सति प्रतिदिव्नेत्यादौ यमप्राप्तिर्नैव निषेद्धुं शक्यते। तथाभ्युपगमे तु प्रातिशाख्यान्तरविरोधोऽपरिहार्यः स्यात्।

मन्मते तु "ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः" (य० ४।१६२) इत्यत्र ऊष्मशब्द ऊष्मप्रकृतिकपरः। यद्वा "प्रदोधुव···श्रुषु" (ऋ० २।११।१७) इत्यत्र पूर्वसूत्रेण प्राप्ता यमापत्तिः सूत्रारम्भसामर्थ्याद् भूतपूर्वगत्याश्रयेण निषेधनीया।

"न स्पर्शस्योष्मप्रकृतेः प्रतीयाद् यमापत्तिम्" (ऋक् प्रा० ६।३०) इत्यनेन साम्यं सम्पद्यते। "स्फोटनं च ककारवर्गे वा स्पर्शात्" (य० ४।१६३-१६५) स्फोटनं च स्पर्शानां पोषणमापद्यते ककारवर्गे परभूते। स्फोटनं नाम पिण्डीभूतस्य संयोगस्य पृथगुच्चारणम्। स्फोटनाख्यो दोषो भवति न च भवति। यथा काण्डात्काण्डात् वषट्कृते, यकृत् क्लोमानम्। यथा सूत्रकारप्रस्थानं तथा स्फोटनं दोषः, स्वरात् संयोगादिरिति द्विरुक्तेर्विधानात्। न च स्फोटने सति द्विरुक्तिः सम्भवति।

एतदपि नहि युक्तं प्रतिभाति। यतो ह्येकमेव सूत्रं स्फोटरूपस्य द्वयोर्व्यञ्जनयोः पार्थक्येन स्थापनरूपस्य कार्यस्य दुष्टत्वमदुष्टत्वं च विदध्यात्। नेदृशं विधानं प्रातिशाख्ये क्वापि दृष्टम्। नहि ब्रह्महत्या दोषः, न वादोषः। यदि हि धर्मशास्त्रमेवं विदध्यात्-रोगे लशुनभक्षणं न दोषः, अन्यत्र तु दोषावहस्तदा तु तत् कथनं युज्येत, नैवमत्र।

वस्तुतस्तु "स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र" (य० प्रा० १००) इति सूत्रे सर्वत्रग्रहणादेतस्य सूत्रकारस्य मते स्फोटनं दोष एव, सूत्रमते द्वित्वविधानात्। तच्च द्वित्वं स्फोटने संयोगादित्वाभावान्नोपपद्यते। तस्मादन्यस्य सूत्रकारस्य मते स दोषो मा भूत्।

"स्वरात् स्वरे समानपदे जो यन्त तु ऋकारे" (प० ४।१००) इति सूत्रेण जकारस्थाने यकारविधानेन प्राकृतभाषायाः प्रभावस्तदानीं पतितो वेदे। यतो हि प्राकृते प्रायो "लुक् कगचजतदपयवाम्"

इत्यनेन जकारस्य लोपे "य श्रुतिरः" इत्यनेन यकारश्रुतिर्विधीयते, तथैवात्रापि जातम्।

अष्टमाध्याये "अथातो वर्णसमाम्नायं व्याख्यास्यामः" (यजु० अ० ८ सू० १) इत्यनेन सूत्रेण वर्णसमाम्नायस्योपक्षेपः प्रारब्धः। "तत्र स्वराः प्रथमम्" (य० अ० ८ सू० २) इत्यनेन अ आ आ ३ इ ई ई ३ उ ऊ ऊ ३ ऋ ॠ ॠ ३ ऌ ॡ ॡ ३ पञ्चस्थानोद्भवा ह्रस्वदीर्घप्लुतभेदैः पञ्चदश स्वरा निर्दिष्टाः। यद्यप्येषां पञ्चदशानां प्रयोगो वाजसनेयिनां पर्षदि नोपलभ्यते, लोकेऽप्येषां सर्वेषां लक्ष्याणि नोपलभ्यन्ते, तथापि सम्भाव्यमानत्वेनैव एते निर्दिष्टाः सन्ति।

"अथ सन्ध्यक्षराणि" (य० प्रा० अ० ८।४), "ए ए ३ ऐ ऐ ३ ओ ओ ३ औ औ ३ इति स्वराः" (य० प्रा० अ० ८ सू० ६) इदं सूत्रं सूत्रयन् सूत्रकारः पञ्चदशैव मौलिकाः स्वराः, इमान्यष्ट तु सन्धिनैव निष्पद्यन्त इति सूचयति।

"अथ व्यञ्जनानि" (य० प्रा० अ० ८। सू० ७) व्याख्यायन्ते क् ख् ग् घ् ङ् इति कवर्गः। सर्वेषां पुर इतिशब्दो निर्देश्यः।

च् छ् ज् झ् ञ् इति चवर्गः।

ट् ठ् ड् ढ् ण् इति टवर्गः।

त् थ् द् ध् न् इति तवर्गः।

प् फ् ब् भ् म् इति पवर्गः।

"इति स्पर्शाः" (य० प्रा० ८।१३) व्याख्याताः।

"अथान्तःस्थाः" (य० प्रा० अ० ८ सू० १४) व्याख्यायन्त इति शेषः।

"यिति रिति लिति विति" (अ० ८ सू० १५) व्याख्यायन्त इति शेषः।

"अथोष्माणः" (अ० ८ सू० १६) व्याख्यायन्त इति शेषः।

"शिति षिति सिति हिति" (अ० १७ सू० १८), "अथायोगवाहाः" (अ० १७ सू० १९)।

अपूर्वेयं व्याख्या भाष्यकाराभ्यां कृता । तथा हि—उ० भा० व्याख्यायन्त इति शेषः । अकारादिना वर्णसमाम्नायेन सहिताः सन्त एते वहन्त्यात्मलाभं प्राप्नुवन्त्ययोगवाहाः । तथा चायोगवाहघटकोऽश्शब्दोऽकारादिवर्णसमाम्नायोपलक्षक इति प्रतिभाति ।

परन्त्वनन्तभट्टभाष्ये—योगवहत्वं च इत्थम् । योगेन अकारादिवर्णसमुदायेन सहिताः सन्त आत्मानं च वहन्त इति योगवाहाः । तन्मते योगवाहा एते इत्यायाति ।

तथा च एतेऽयोगवाहा न, किन्तु योगवाहा एव । परमेतत्पातञ्जलभाष्यविरुद्धम् । तत्र हि प्रत्याहाराह्निके हयवरट्सूत्रे—"कथं पुनरयोगवाहाः । यदयुक्ता वहन्ति अनुपदिष्टाश्च श्रूयन्ते" इत्युक्तम् । एतेन एषामयोगवाहत्वम्, न तु योगवाहा एते इति प्रतीयते ।

"ᳫ क इति जिह्वामूलीयः" (अ० ८ सू० १९), "ᳫ प इत्युपध्मानीयः" (अ० ८ सू० २०), "अं इत्यनुस्वारः" (अ० ८ सू० २१), "अः इति विसर्जनीयः" (अ० ८ सू० २२), "हुँ इति नासिक्यः" (अ० ८ सू० २३) । अयं ऋक्शाखायां प्रसिद्धः । "कुँ खुँ गुँ घुँ इति यमाः" (अ० ८ सू० २४) इति यमसंज्ञका वर्णा विंशतिसंख्याका भवन्तीत्येतच्चतुर्थाध्याये व्याख्यातम् ।

विंशतिसंख्याका[1] भवन्तीति व्याख्यानं न युक्तियुक्तम्, "एते पञ्चषष्टिर्वर्णा ब्रह्मराशिरात्मवाचः" (अ० ८ सू० २५) इति सूत्रेण विरोधात् । तथा सति षोडशानामाधिक्यात् एकाशीतिसंख्यकत्वं भवेत् ।

---

१. परमाभ्यामेव भाष्यकाराभ्यां "यमानुस्वारनासिक्यानां नासिके" १–७४ इति सूत्रव्याख्यायां चत्वारो यमा इत्युक्तम् । तथा च विंशतिर्यमा इत्यस्य विंशतेः स्थानिनां चत्वारो यमा आदेशा इति स्थानिनां विंशतित्वादादेशानामपि विंशतित्वव्यवस्था निर्वोढव्या ।

"एते पञ्चषष्टिर्वर्णा ब्रह्मराशिरात्मवाचः" (अ० ८ सू० २५) य एते पञ्चषष्टिर्वर्णास्ते समस्ता एव त्रयीलक्षणो ब्रह्मराशिः। एत एव कदाचिदानुपूर्व्या व्यवस्थिताः सन्त ऋग्यजुःसामाख्या भवन्तीत्यर्थः। लौकिक्या अपि वाचोऽयमेवात्मा। एतदेव स्पष्टीकर्तुमाह—"यत् किञ्चिद् वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम्" इति। एतेन एते पञ्चषष्टिर्वर्णाः सर्वे एवास्मच्छाखायां प्रयुज्यन्त इत्यायाति। तन्निराकृत्यै सूत्रं पठति "तस्मिन्" (अ० ८ सू० ३५) इत्यादि। तस्मिन् ळ्हळजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम् "ऌकारो दीर्घः प्लुताश्चोक्तवर्जम्" (अ० ८ सू० ३५) इत्यनेन एते वर्णा माध्यन्दिनानां न सन्ति। परमत्र ळळ्हौ प्राप्तावेव नहि। यतो हि वर्णसमाम्नाये एतौ नैव निर्दिष्टौ तर्हि कथमत्र तयोर्निषेधः।

किञ्चात्र वर्णसमाम्नायोऽष्टमाध्याये यादृशो निर्दिष्टस्तादृशो यदि गृह्यते तदा तु प्रथमाध्यायस्थेन "सिमादितोऽष्टौ स्वराणाम्" (य० प्रा० अ० १ सू० ४४) इत्यनेन विरोधः स्यात्। यतो ह्यष्टमाध्याये नह्यष्टौ स्वराः पूर्वं निर्दिष्टाः, किन्तु पञ्चदश। तर्हि कया रीत्या विरोधः परिहार्य इति शङ्कायां तत्र भाष्ये उक्तम्—"न च सवर्णदीर्घत्वमुक्तानां प्लुतानां सम्भवति, अतः प्लुता न गृह्यन्ते" (अ० १ सू० ४४ भाष्यम्) इति। अनया युक्त्या अष्टत्वसंख्या सूपपादा। तत्र "प्लुताश्चोक्तवर्जम्" इत्यनेन सर्वमप्रा३इ, लाजी३च्छाची३द् इति त्रिमात्राणि (अ० २ सू० ५०) प्रणवश्च (अ० २ सू० ५१) त्रिमात्रः सर्वोदात्तश्च विवेशा ३ इति चानुदात्तम् (अ० २ सू० ५२) विवेशा ३ इति सर्वं पदमनुदात्तम्, अन्त्यमक्षरं त्रिमात्रम्। आसी ३ दिति चोत्तरं विचारे (अ० २ सू० ५३) आसीदिति सर्वं पदं विचारे वर्तमानमुत्तरं सर्वमनुदात्तम्। तस्य चान्त्यमक्षरं त्रिमात्रं भवति। इत्येतद् विहाय नान्यत्रान्यः स्वरः प्लुतो भवति। तथा च माध्यन्दिनानां मते ईकार आकार

ओकारश्चेति त्रय एव प्लुताः, लकारो ह्रस्वः, अ आ इ ई उ ऊ ऋ ॠ ए ऐ ओ औ इति द्वादश स्वराः। पञ्चविंशतिः स्पर्शाः, चत्वारोऽन्तःस्थाः, चत्वार ऊष्माणः चत्वारो यमाः, विसर्गः, अनुस्वारः। (३+१२+२५+४+४+४+१+१=५२) इत्येवं संकलनया द्विपञ्चाशदेव वर्णा माध्यन्दिनशाखायां भवन्ति।

अधुना अन्तःस्थानामाद्यस्य यकारस्योच्चारणप्रक्रियां प्रदर्शयामि। टिप्पण्यां [1]प्रदर्शितप्रतिज्ञासूत्रानुसारम् अन्तःस्थानामाद्यस्य यकारस्योच्चारणे जकारोच्चारणं कर्तव्यमित्यन्वयः। इतः पूर्वं प्रातिशाख्यानुकूल्येन यत् स्वनविज्ञानं मया प्रदर्शितं तच्च श्रौतस्मार्तसूत्रवत् पञ्चदशशाखासाधारणं वेदितव्यम्। एतत्तु माध्यन्दिनानामेव। तत्र यकारं विशिनष्टि पदादिस्थस्येति। यथा "युञ्जानः प्रथमम्" (य. ११-१) अत्र पदादिस्थत्वाद् यकारस्य स्थाने जकारोच्चारणम्, पदादिस्थस्येति कथनात्। "धियः तत्त्वाय" (यजु० ११-१) इत्यादौ न जकारोच्चारणम्, अन्येन व्यञ्जनेन असंयुक्तस्येति विशेषणाद् अस्मिन् यज्ञे इत्यत्र न भवति। रेफेण ऊष्मणामन्त्येन हकारेण युक्तस्याप्यविशेषेण पदादिस्थत्वादिविशेषमन्तरेण आदिमध्यावसानेषु पदस्थस्य यकारस्य जकारोच्चारणम्, "सूर्य्य वडा" (यजु० ३३।३९) "ह्यर्य्यत", "गे ह्याय च" [2] (यजु० १६।४४)।

ऋकारेण संयुक्तस्यापि यकारस्य जकारोच्चारणम्। "सामान्यृग्भिः" (यजु० २०।१२) अत्र लाघवेन रेफोष्मान्त्यऋकारैः परे इति वक्तव्ये

---

१. प्रतिज्ञासूत्रपरिशिष्टे द्वितीयकण्डिकाया इदमादिमं सूत्रम्-"अथान्तःस्थानामाद्यस्य पदादिस्थस्य अन्यहलसंयुक्तस्य संयुक्तस्यापि रेफोष्माभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणम्" इति।

२. विस्तरभयात् सर्वाण्युदाहरणानि न प्रदर्श्यन्ते।

भिन्नपदोपादानेनान्यहलसंयुक्तस्येति न विशेषणीयमिति ध्वन्यते। तथा च सामान्यर्ग्भिरित्यत्रान्यहल्योगेऽपि चवर्गतृतीयोच्चारणं भवति।

"द्विर्वचनेऽप्येवम्" (प्रतिज्ञा० क० २ सू० २) एवं पदादिमध्यावसानेषु यकारं द्विर्भावे द्वित्वे सति ज्ञेयम्। द्वित्वं सिद्धमसिद्धं वोपादीयते। यथा धाय्याः, पाय्यम्।

प्रातिशाख्येऽपि भगवता कात्यायनेन याज्ञवल्क्येन चेषत्स्पृष्टस्य यकारस्य पदादिस्थले पञ्चदशशाखासाधारण्येन स्पृष्टप्रयत्नता विहिता। अतः सम्प्रदायविद एवंविधे यकारे स्पृष्टप्रयत्नज्ञापनाय मध्ये बिन्दुं प्रक्षिपन्ति। स्पृष्टप्रयत्नं स्थानैक्याच्चवर्गतृतीयसदृशं यकारं पठन्ति च। एवमेव रेफस्य अयुक्तान्यहलः ऋकारैः संयुक्तस्य शषसहैर्युक्तस्य एकारसहितोच्चारणं [1]कर्तव्यमित्यर्थः। "यथा दर्शनम्" (यजु० ११-३६) इत्यत्र दरेशतमिति। [2]अन्यान्युदाहरणादीनि तत्रैव द्रष्टव्यानि।

पूर्वोक्तरीत्या संयुक्तासंयुक्तस्थले तृतीयान्तःस्थस्य लकारस्य क्वचिल्लक्ष्यानुरोधेन पूर्वोक्तम् एकारसहितोच्चारणं कर्तव्यम्। उपवल्हामस्मीत्यत्र उपवलेहामसि इत्युच्चारणम्। ऋकारस्य [3]संयुक्तस्य असंयुक्तस्य चाविशेषेण सर्वत्र=आदिमध्यावसानेषु एकारसहितोच्चारणं कर्तव्यम्। यथा रेता षट् (यजु० १८।३७), एवं क्लृप्तिश्च मे (यजु० १८।११) इत्यादौ ऋसावर्ण्याद् लृकारस्यापि बोधः।

---

१. "अथापदान्तःस्थस्यायुक्तान्यहलः संयुक्तस्योष्मऋकारैरकारसहितोच्चारणम्" (प्रतिज्ञा क० २ सू० ३)।

२. "एवं तृतीयान्तःस्थस्य क्वचित्" (प्रतिज्ञा० क० २ सू० ४)।

३. "ऋकारस्य तु संयुक्ताऽसंयुक्तस्याविशेषेण सर्वत्रैवम्" (प्रतिज्ञा० क० २ सू० ५)।

[1]अन्तःस्थानामन्त्यस्य पदादिमध्यान्त्यस्थस्य वकारस्य क्रमेण गुरुमध्यलघुवृत्तिभिरुच्चारणं कर्तव्यम्। तदुक्तं महर्षिणा याज्ञवल्क्येन—

वकारस्त्रिविधः प्रोक्तो गुरुर्लघुलघूतरः।
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः॥ इति।

व्वायवस्थ। देवो वः। [2]मूर्धन्योष्मणः षकारस्य असंयुक्तस्य टवर्गातिरिक्तवर्णप्रयुक्तसंयोगवतश्च खकारोच्चारणं कर्तव्यम्। "इषे त्वा" इत्यादीन्युदाहरणानि।

[3]अथानुस्वारस्य ठे० कार आदेशो भवति शषसहरेषु। [4]स च त्रिविधो भवति ह्रस्वात् परो दीर्घः, दीर्घात् परो ह्रस्वः, गुरौ (संयुक्ते वर्ण) परे गुरुः। गुरोर्लिपिः ठँ ईदृशी, लघोर्लिपिः ॅ एतादृशी। नेदं वर्णान्तरम्, किन्त्वनुस्वारस्यार्धगकारस्यैव एतच्चिह्नम्। "त्रिठँ०शद्धाम्, यजूँषि" इत्यादीन्युदाहरणानि द्रष्टव्यानि।

अधुना उदात्तादिस्वरविषये विचार्यते। [5]तत्र सवनक्रमेण उरः,

---

१. "अथान्त्यस्थान्तःस्थानां पदादिमध्यान्त्यस्थस्य त्रिविधं गुरुमध्यमलघुवृत्तिभिरुच्चारणम्" (यजु० का० २ सू० ६)।

२. अथो मूर्धन्योष्मणोऽसंयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारणम्" (प्रतिज्ञा क० २ सू० १२)।

३. "अनुस्वारस्य ठँ०मित्यादेशः शषसहरेफेषु" (प्रति० क० ३ सू० १)

४. "तस्य त्रैविध्यमाख्यातं ह्रस्वदीर्घगुरुभेदैर्दीर्घात् परो ह्रस्वो ह्रस्वात् परो दीर्घो गुरौ परे गुरुः" (प्रति० क० ३ सू० २)। तै० प्रा० अ० २ सू० ३० भाष्ये, अर्धगकाररूपत्वात्।

५. तथा च सूत्राणि—"सवनक्रमेणोरःकण्ठभ्रूमध्यानि"। (यजुः प्रा० अ० १ सू० ३०), "आयाममार्दवाभिघाताः" (यजुः अ० १ सू० ३१), "उच्चैरुदात्तः" (यजुः अ० १ सू० १०८), "नीचैरनुदात्तः" (यजुः अ० १ सू० १०९), "उभयवान् स्वरितः" (यजुः अ० १ सू० ११०)।

कण्ठः, भ्रूमध्यम्, इतीमानि त्रीणि स्थानानि वायोर्भवन्ति। एवमेतेषु स्थानेषु वर्णेषूच्चार्यमाणेषु त्रयो विकारा आयाममार्दवाभिघाताः शरीरस्य भवन्ति। तत्रायामो नाम ऊर्ध्वगमनं शरीरस्य। मार्दवं नामाधोगमनं गात्राणाम्। अभिघातस्तिर्यग्गमनं कायस्य। तत्र आयामेन (ऊर्ध्वं नयनेन) गात्राणां यः स्वरः सम्पद्यते, स उदात्तसंज्ञो भवति। नीचैर्मार्दवेनाधोगमनेन गात्राणां यः स्वरः सम्पद्यते, सोऽनुदात्तसंज्ञो भवति। उदात्तस्योर्ध्वगमनं गात्राणां प्रयत्नः। अनुदात्तस्याधोगमनं गात्राणां प्रयत्नः। आभ्यां प्रयत्नाभ्यां समाहारीभूताभ्यां यः स्वर उच्चार्यते स स्वरितसंज्ञो भवति।

स च स्वरितोऽष्टविधः। जात्यः, अनुदात्तपूर्वः, उदात्तपूर्वः। तत्रोदात्तपूर्वः सप्तविधः—अभिनिहितः, क्षैप्रः, प्रक्लिष्टः, तैरोव्यञ्जनः, तैरोविरामः, पादवृत्तः, ताथाभाव्यः। तत्रैकपदेऽनुदात्तपूर्वे यकारवकाराभ्यां सहितो जात्यः। एकारादू ओकाराच्च परोऽकारो यत्रानुदात्तो लुप्यते तत्राभिनिहितः स्वरो भवति। यत्र इकार उदात्तोऽनुदात्तपरो यकारेण युक्तो भवति, यद्वा उकार उदात्तोऽनुदात्तपरो वकारेण युक्तो भवति, तत्र क्षैप्रः स्वरितो भवति। समस्तपदे यदावग्रहो भवति, तदोदात्तादवग्रहात् परस्तैरोविरामः, यथा गो पतो। गो पतौ। स्वरयोरन्तयोरन्तरं विवृत्तिरुच्यते। तया लक्ष्यते इति विवृत्तिलक्षणः पादवृत्तः, उदात्तादिरुदात्तान्तो नीचावग्रहस्ताथाभाव्यसंज्ञकः स्वरो भवति। अयं च माध्यन्दिनानां न भवति। उदाहरणादिकं विस्तरभयान्नोपन्यस्यते। अधिकं जिज्ञासुभिः प्रातिशाख्यादिकं द्रष्टव्यम्।

"एकश्रुतिदूरात्सम्बुद्धौ" (१ पा० सू० १।२।३३) इति सूत्रे महाभाष्ये उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरितेय उदात्तः सोऽन्येन विशिष्ट एकश्रुतिः सप्तम इति सप्त स्वरा उक्ताः।

दशमं दलम्

अथ तैत्तिरीयप्रातिशाख्यमधिकृत्य वर्णानां स्वरूपोच्चारणपद्धतिः प्रदर्श्यते। तत्र वैदिकाभरणकारानुसारं प्रातिशाख्यस्वरूपं साम्प्रतिकीं स्थितिं च निर्दिशामि।

अद्यत्वे नियमातिक्रमाद् ऋषयो न जायन्ते। न चानृषिः सर्वाणि लक्ष्याणि लक्षणानि च शक्नोति सम्यगधिगन्तुम्, का कथा तद्व्यवस्थापनायाम्। न चैकशाखाध्यायिनोऽपि तदेतद्विषयलक्षणविवेकमुखेन तत्त्वरूपनिर्णयः शक्य इति वाच्यम्, अतद्व्यावृत्तिरूपानवगतौ तन्निर्णयायोगात्, अतद्रूपानवगतौ व्यावृत्त्यवगमायोगाच्च। तथा च भगवान-क्षपादः—"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" इति। "तदेतद् विद्वांसः परमकारुणिका महर्षयः प्रतिशाखं व्यवस्थितानां शिक्षाव्याकरणोपदिष्टकार्याणां विस्पष्टोपदेशानि लक्षणानि प्रणयन्ति स्म। तत्रान्तरीयकतया तु स्पष्टोपदिष्टान्यपि कार्याण्यनुवर्ण्यन्ते। तानि प्रातिशाख्यानीत्याख्यायन्ते" (तै० प्रा० अ० १ सू० १ वैदिकाभरण-भाष्यम्, पृ० ५) इत्यादि एतदंशोपोद्बलकम् "ऋषिषूत्क्रामत्सु" इत्यादि-निरुक्तमप्यनुसन्धेयम्। तत्र प्रथमं कियन्तो वर्णा इति चिन्तायामुच्यते—

स्वराः [1]स्पर्शास्तथान्तःस्था ऊष्माणश्चाथ दर्शिताः।
विसर्गानुस्वारळाश्च नासिक्याः पञ्च चोदिताः॥

---

१. स्वरव्यञ्जनस्वरूपं तु "षोडशादितः स्वराः" (तैत्ति० प्रा० अ० १ सू० ५) इति सूत्रे वैदिकाभरणे निर्वचनम्—"स्वयं राजन्ते नान्येन व्यज्यन्ते इति स्वराः। तदुक्तम्—

यस्स्वयं राजते तं तु स्वरमाह पतञ्जलिः।
उपरिस्थायिना तेन व्यङ्ग्यं व्यञ्जनमुच्यते॥" इति।

तथा च स्वरं विना व्यञ्जनस्यात्मलाभो नैव भवेदिति सिद्धम्।

इह खलु "षोडशादितः स्वराः" (तै० प्रा० अ० १ सू० ५) इति पञ्चभिः सूत्रैरकारादिहकारान्ता एकपञ्चाशद्वर्णा गणशो निर्दिष्टाः "ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः" (तै० प्रा० अ० १ सू० १२) इति विसर्जनीयो दर्शितः। "अनुस्वारश्च" (तै० प्रा० अ० १ सू० ३४) इत्यनुस्वारः। "पृक्तस्वरात् परो ळो डम्" (तै० प्रा० अ० १३ सू० १६) इति ळकारः। "स्पर्शादनुत्तमात्" (तै० प्रा० अ० २१ सू० १२) इत्यादित्रिभिः सूत्रैः पञ्च नासिक्या विहिताः। एवमेकोनषष्टिर्वर्णास्तैत्तिरीयैः समाम्नायन्ते।

ननु व्याकरणप्रसिद्धानां नवानामचां ह्रस्वदीर्घप्लुतभेदात् सप्तविंशतिः स्वरा भवन्ति। तत्र षोडश स्वरा इति केषां ग्रहणम्?

तदुच्यते—वासिष्ठशिक्षायाम् ऌवर्णदीर्घं परिहाय्य 'स्वराः षड्विंशतिः प्रोक्ताः' इत्यादिनाष्टषष्टिं वर्णानुक्त्वा अष्टपञ्चाशत्पक्षार्थं पुनरपि ऋवर्णप्लुतम् ऌवर्णप्लुतं सन्ध्यक्षरह्रस्वप्लुतांश्च दशस्वरान् परिहाय्य षोडशस्वरपक्ष उक्तः। स इहाविरुद्धत्वात् परिगृह्यते।

ननु "स पूर्वस्यार्धसदृशमेकेषाम्" (तै० प्रा० अ० ११ सू० १९) इत्यनेन अर्धैकारौकारौ विधास्येते इति कुतस्तयोरिहानुपादानम्) इति चेन्न, अस्मिन्नध्यायेऽनुपलम्भात्। तदुक्तं महाभाष्ये—"ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमोकारं चाधीयते सुजाते ए अश्वसूनृते, अध्वर्यो ओ अद्रिभिः सुतम्, शुक्रं ते ए अन्यद् यजतम् ते ए अन्यदिति (महाभाष्य एओङ्भाष्ये) पार्षदकृतिरेषा तत्रभवताम्, नैव लोके नान्यस्मिन् वेदे अर्ध एकारः, अर्ध ओकारो वा उपलभ्यते" (महाभाष्यम् एओङ्सूत्रस्थम्) इति। एतेन वेदस्थप्रणवस्वरस्य मात्रार्धस्य वचनं सूत्रकारस्यानिष्टमवगम्यते। तदभ्युपगमे परिमाणकृताद् वर्णभेदाद् अष्टादशस्वरत्वापत्तेः। स्वाध्यायारम्भसमाप्तिप्रणवानां तु सत्यपि मात्राभेदे वेदबाह्यत्वान्न सप्तदशस्वरत्वा-

पत्तिरित्यविरुद्धं तद्वचनम्। अत्र डकारलकारयोरस्मत्संहितायामविद्यमानत्वेऽपि शुक्रियब्राह्मणे पितृमेधादिषु विद्यमानत्वात् समाम्नातमत्र। तथा च शिक्षायां 'चत्वारश्च यमास्तथा' इति चत्वार एव नासिक्याः स्मर्यन्ते। सूत्रकारस्तु समाम्नायसिद्धत्वाद् अत्र 'हकारान्नणमपरान्नासिक्यम्' (तै० प्रा० अ० २१ सू० १४) इति हकारद्वित्ववत् पञ्चमं नासिक्यं विधास्यति। (वैदिकाभरणे पृ० ८)।

तथा चायं निष्कर्षः—

ह्रस्वदीर्घप्लुतावर्ण वर्णो वर्णा ऋ ॠ ऌ च।
ए ऐ ओ औ इति ज्ञेयाः षोडशे हादितः स्वराः॥
कखौ गघौ ङचछजा झञौ टठडढा णतौ।
थदौ धनौ पफबभमाः स्पर्शाः पञ्चविंशतिः॥
परौ लवौ चतस्रोऽन्तःस्थाश्च ऽकशषस ऽपहाः।
षड्ऊष्माणो विसर्गानुस्वारौ लो नास्यपञ्चकम्॥
इत्येकोनाष्षष्टिवर्णा अस्मत्स्वाध्यायवर्तिनः।

त्रिभाष्यरत्नकृता तु रङ्गः स्वरभक्तिश्चेति द्वावधिकौ उक्तौ पञ्चमो यमश्च नोक्तः। अन्यत् समानम्। तथा चैतन्मते षष्टिर्वर्णा उक्ताः।

वैदिकाभरणकारस्तु रङ्गस्वरभक्त्योर्वर्णान्तरत्वं नेच्छति। तच्चाग्रे स्फुटीभविष्यति।

तत्र तावत् सूत्रोपयोगार्थं सूत्रकाराभिमतवर्णसमाम्नायक्रमः प्रदर्श्यते—अ आ आ ३ इ ई ई ३ उ ऊ ऊ ३ ऋ ॠ ऌ ए ऐ ओ औ।

कखगघङ चछजझञ टठडढण तथदधन पफबभम यरलव ऽ क शषस ऽ प ह।

इदानीं वक्ष्यमाणग्रन्थेषु कञ्चनोपयोगमाकलय्य केषाञ्चन वर्णानां

संज्ञां निर्दिशामि । [1]वर्णसमाम्नायस्यादितो नव वर्णाः समानाक्षरसंज्ञा भवन्ति । 'तस्य त्राता भवसि' इत्यत्र "अप्रग्रहाः समानाक्षराण्यनुनासिकान्येकेषाम्" (तै० प्रा० अ० १५ सू० ६) अनेन सूत्रेण अन्त्यस्य इकारस्यानुनासिकत्वं भवति । "अणोऽप्रगृह्यस्यानुनासिकः" (पा० सू० ८।४।५७) इति सूत्रेण संवादोऽस्य सूत्रस्य भवति । तत्राद्यानां षोडशानां वर्णानां स्वरसंज्ञा क्रियते, अवशिष्टानां च व्यञ्जनसंज्ञा । व्यञ्जनेष्वाद्यानां पञ्चविंशतेः स्पर्शसंज्ञा भवति । ततः पराश्चतस्रोऽन्तःस्थसंज्ञाः संपद्यन्ते । ततः परे षडूष्मसंज्ञका भवन्ति । स्पर्शानां मध्ये आनुपूर्व्वेणादित आरभ्य क्रमेण पञ्च पञ्च अवान्तरगणभूता वर्गसंज्ञा भवन्ति । एकैकस्मिन् वर्गे यथाक्रमेण वर्णाः प्रथमद्वितीयतृतीयचतुर्थोत्तमसंज्ञका भवन्ति । ऊष्माणश्च विसर्जनीयाश्च प्रथमद्वितीयाश्च वर्णा अघोषसंज्ञा भवन्ति । हकारस्योष्मत्वादघोषत्वं प्राप्तमनेन निषिध्यते । अघोषेभ्योऽन्यो व्यञ्जनशेषो घोषसंज्ञो भवति ।

"ऋकारल्कारौ ह्रस्वौ" (तै० प्रा० अ० १ सू० ३१), "ऋकारश्च ऌकारश्च

---

१. अथ नवसमानाक्षराण्यादितः (तै० प्रा० अ० १ सू० २) । षोडशादितः स्वराः (तै० प्रा० अ० १ सू० ५) ।
शेषो व्यञ्जनानि (तै० प्रा० अ० १ सू० ६) ।
आद्याः पञ्चविंशतिः स्पर्शाः (तै० प्रा० अ० १ सू० ७) ।
पराश्चतस्रोऽन्तःस्थाः (तै० प्रा० अ० १ सू० ८) ।
परे षडूष्माणः (तै० प्रा० अ० १ सू० ९) ।
स्पर्शानामानुपूर्व्येण पञ्च पञ्च वर्गाः (तै० प्रा० अ० १ सू० १०) ।
प्रथमद्वितीयतृतीयचतुर्थोत्तमाः (तै० प्रा० अ० १ सू० ११) ।
ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः (तै० प्रा० अ० १ सू० १२)
न हकारः (तै० प्रा० अ० १ सू० १३) ।
व्यञ्जनशेषो घोषवान् (तै० प्रा० अ० १ सू० १४) ।

ह्रस्वसंज्ञौ भवतः [1]"अकारश्च" (तै० प्रा० अ० १ सू० ३२) "तेन च समानकालस्वरः" (तै० प्रा० अ० १ सू० ३३) इत्याभ्यां सूत्राभ्यामेव ऋकारल्कारयोः ह्रस्वत्वसिद्धौ एतत्सूत्रं व्यर्थमेवेति चेन्न, ऋकारल्कारयो रेफस्य लकारस्य च सत्त्वादधिकमात्रत्वं शङ्केत तन्निवृत्त्यर्थमस्य सूत्रस्य स्पष्टार्थत्वात्। अकारेण तुल्यकालस्वरश्चाषरुतकालतुल्यो ह्रस्वो भवति। अनुस्वारोऽप्यकारेण तुल्यकालो भवतीत्यनुस्वारश्चेति सूत्रेणोच्यते। "अनुस्वारः स्वरभक्तिश्च" (२।१।६) इति सूत्रेण स्वरं प्रत्यङ्गत्वविधानादनुस्वारस्य व्यञ्जनत्वम् तथा सति "ह्रस्वार्धकालं व्यञ्जनम्" (१।३७) इत्यनेन अर्धमात्रत्वे प्राप्ते तन्मा भूदित्यनुस्वारश्चेति सूत्रेण विधीयते।

शिक्षायां तु "मात्राद् द्विमात्रोऽनुस्वारो द्विमात्रान्मात्र एव तु" इत्युक्त्वा द्विविधस्याप्यनुस्वारस्य संयोगपरत्वे द्वित्वं मात्रिकत्वं चोक्तम्। तथा च 'मात्राद् द्विमात्र' इत्यादिना द्विमात्रत्वमप्यनुस्वारस्य प्रतीयत इति विरोधः प्रतिभाति। तन्निवारणार्थं प्रायिकत्वेन व्यवस्था विधेया। अनुस्वारविषये विविधानि वचनान्युपलभ्यन्ते। तेषामत्र निवेशे तु विस्तरो भवेदिति संक्षेपेण सारोंऽशः परिदर्श्यते। तत्रायं विवेकः—

स्वरितग्राह्यनुस्वारो द्विमात्रो मात्रिकात् परः।
दीर्घादध्यर्धमात्रः स्याद् द्वैरूप्ये मात्रिकं परम्॥
द्विमात्र उत्तमो ह्रस्वादध्यर्धो व्यञ्जनात् परः।
दीर्घादनन्तरस्तद्वन्मात्रिको व्यञ्जनान्तरः॥

---

१. अकारश्च (तै० प्रा० अ० १ सू० ३२)।
तेन च समग्रकालस्वरः (तै० प्रा० अ० १ सू० ३३)।
अनुस्वारश्च (तै० प्रा० अ० १ सू० ३४)।
द्विस्तावान् दीर्घः (अ० १ सू० ३५)।
त्रिः प्लुतः (अ० १ सू० ३६)।
ह्रस्वार्धकालं व्यञ्जनम् (अ० १ सू० ३७)।

द्विमात्रा यलवा ह्रस्वादध्यर्धा व्यञ्जनान्तरः।
दीर्घपूर्वात् परा रेफान्मात्रिका इति निर्णयः॥

एवं सत्यनुस्वारस्य द्विमात्रत्वे परिमाणाच्च पञ्चमादित्यनेन वर्णान्तरत्वं प्राप्नोति, तच्च वैदिकाभरणकारो निषेधति। तथा हि—अथ कस्मादस्मिन् ग्रन्थे शिक्षाव्याकरणेषु च मात्रिकद्विमात्रिकव्यञ्जनानां ह्रस्वदीर्घसंज्ञे न विधीयेते, वर्णान्यत्वाभावात्। स्वरेष्वेव हि कालभेदाद् वर्णान्यत्वम्, न व्यञ्जनेषु। अत एवोक्तम् 'अनुप्रदानात्' (२३।१) इति सूत्रव्याख्यायां वैदिकाभरणकृता—

अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात्।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्॥ (तै० प्रा० २३।१)

परिमाणस्य पृथग्वचनं स्वराख्यवर्णमात्रविषयत्वख्यापनार्थम्। तेन व्यञ्जनानां ङकारानुस्वारादीनां कालभेदे वर्णान्यत्वं न भवतीति। परमत्र प्रमाणाभावान्मात्राधिक्ये कथं न वर्णान्तरत्वमिति विचारणीयम्। ह्रस्वद्विगुणकालो वायसरुततुल्यकालस्वरो दीर्घसंज्ञको भवति। ह्रस्वत्रिगुणकालो मयूररुततुल्यकालस्वरः प्लुतसंज्ञो भवति। शरादिवद्दूरगामित्वात् प्लुत इत्युच्यते। ह्रस्वार्धतुल्यकालं (अर्धमात्राकालम्) व्यञ्जनं वेदितव्यम्। ङञणनमानां स्वस्वस्थानवर्तिनां कालाधिक्यं शिक्षायां स्मर्यते—

ह्रस्वात् परं तु नासिक्यं द्विमात्रं यत्तदुच्यते।
दीर्घात् प्लुताच्च तन्मात्रमेकमात्रमिति श्रुतिः॥

तथा च वैदिकाभरणे (१।३७) उद्धृतानि वाक्यानि (शिक्षायाम्)—

ह्रस्वात् परं तु नासिक्यं द्विमात्रं यत्तदुच्यते।
दीर्घात् प्लुताच्च तन्मात्रमेकमात्रमिति श्रुतिः॥
तत्रातिप्रसङ्गपरिहाराय श्लोकान्तरं कृतम्।
अवसाने विशेषोऽयमन्येषां च न विद्यते॥
संहितायां तु तन्मात्रः पदकालेऽधिको भवेत्।

ह्रस्वात् परोऽवसानस्थः पदाध्यायेऽनुनासिकः॥
द्विमात्रो मात्रिकस्त्वन्यः संहितायां तथाखिलम्।

नासिक्या ङ्ञ्णनमाः। उदाहरणानि यथा—

ईट्टङ्। च। अन्याट्टङ्। च। वृषण् वसू (सं० ४।१।३) ब्रह्मन्। विशम् (सं० २।३।३) इत्यादीनि प्रातिशाख्ये द्रष्टव्यानि। नासिक्या ङ्ञ्णनमा यदा ह्रस्वात् परा भवन्ति तदा द्विमात्रत्वं तेषाम्, दीर्घात् प्लुताच्च परेषां तेषामेकमात्रत्वम्।

अत्रायं निष्कर्षः—अवसाने ह्रस्वात् परं नासिक्यं द्विमात्रं भवति। ह्रस्वात् परस्यापि संहिताकाले मात्रिकत्वमेव। तथा च ह्रस्वात् परोऽवसानस्थोऽनुनासिकः पदाध्याये द्विमात्रः। दीर्घात् प्लुताच्च परस्य तस्यानुनासिकस्य संहितायां पदकाले वा मात्रिकत्वमेव। अर्धमात्राणि व्यञ्जनानीति "ह्रस्वार्धमात्रं व्यञ्जनम्" (तै० प्रा० अ० १ सू० ३७) इति सूत्रेण प्रतिपाद्यते। तत्र ये विशेषास्तेऽप्यधस्तादुक्ताः। अन्यदप्यवशिष्टं पुरः प्रदर्श्यते—

विषूचीनान् व्यस्यताम् (सं० १।१।१३), सत्यराजा३न् (सं० १।८।१६) लाजी३न् (सं० ७।४।२०) अत्र ह्रस्वात् परत्वाभावान् मात्रिकाणि। तथा अवसानस्थलकारस्य पादोनमात्रत्वमुक्तं शिक्षायाम्—"अवसाने लकारस्य त्रिपादत्वं सदा भवेत्" इति। अस्तु। बाल् (सं० ३।३।१०) इति दीर्घप्लुताभ्यां परस्य व्यञ्जनस्य स्वरपरस्य पादमात्रत्वमुक्तम्—

अचः परे विशेषोऽस्ति पादमात्रं विधीयते।
पूर्वकालो द्विमात्रश्चेदेकं व्यञ्जनमेव यत्॥ इति।

अत्र द्विमात्रग्रहणं त्रिमात्रस्यापि प्रदर्शनम्। तद्यथा (सं० आ वायो भूष) अग्मा३नग्नीदित्याहेत्यादि। द्विप्रभृतिव्यञ्जनसंयोगे मध्यमानां पादमात्रत्वमुक्तम्—

"अस्वरव्यञ्जनं नित्यमणुमात्रं प्रयुज्यते" इति।

तद् यथा 'अत्यन्यानगाम्' (सं० १।३।५) चतुरादिसंयोगे त्वन्त्यस्याप्यणुमात्रत्वमुक्तं बहुशः—

संयोगश्चतुरादीनां व्यञ्जनानां यदा भवेत्।
तदाऽन्त्यव्यञ्जनस्यापि अणुमात्रत्वमिष्यते ॥ इति।

तद् यथा उक्कूथ्यः (स० १।६।९) तार्क्ष्यः (स० ४।४।३)। स्वरितग्राहिणां व्यञ्जनानां कालाधिक्यमुक्तं शिक्षायाम्—

स्वराः कम्बाश्च रङ्गाश्च ये यत्कालाः स्वभावतः।
वर्धन्ते प्रोच्यमानास्ते क्षिप्रयत्नेऽपि वक्तरि ॥ इति।

अत्र स्वरितानां कालवृद्धिवचनं तद्ग्राहिव्यञ्जनार्थमेव। वक्ष्यति—"[1]आदिरस्योदात्तसमः शेषोऽनुदात्तसम इत्याचार्याः" (तै० प्रा० १।४६) इति। तदनुदात्तसमत्वं केषुचित् स्वरितपरेषु न भवति, किन्तु तदङ्गभूतेषु परव्यञ्जनेष्वेव। तानि स्वरितग्राहीणीत्युच्यन्ते। तेषां कालाधिक्यं विना उच्चारणं न घटते। येषु च स्वरितस्वरेष्वेवानुदात्तसमत्वं भवति, तत्र कालाधिक्याभावेऽप्युच्चारणमुपपद्यते। तत्रानुस्वारस्तावत् स्वरितग्राही उत्तमश्च पूर्वाङ्गभूतः। तयोर्द्वित्वे तु परो मात्रिक एव। यवलास्तु ह्रस्वपूर्वका अन्तःस्थापराः। ह्रस्वदीर्घाङ्गभूतास्तु रेफपूर्वका इति। तत्रायं विवेकः—

स्वरितग्राह्यनुस्वारो द्विमात्रो मात्रिकात् परः।
दीर्घादध्यर्धमात्रः स्याद् द्वैरूप्ये मात्रिकं परम् ॥
द्विमात्र उत्तमो ह्रस्वादध्यर्धो व्यञ्जनात् परः।
दीर्घादनन्तरस्तद्वन्मात्रिको व्यञ्जनान्तरः ॥
द्विमात्रा यवला ह्रस्वादध्यर्धा व्यञ्जनान्तराः।
दीर्घपूर्वात् परा रेफान्मात्रिका इति निर्णयः ॥

---

१. आदिरस्योदात्तसमः शेषोऽनुदात्तसम इत्याचार्याः (तै. प्रा. १।४६)

अनुस्वारो यथा–भरेष्विन्द ५ सुहव ५ हवामहे । (स० २।१।११) दीर्घादध्यर्धमात्रो यथा–(स० २।६।६) अग्नेस्त्रयो ज्याया ५ सः । द्वैरूप्ये यथा (स० ७।१।४) तेषा ५ हविष्माꣳश्च । अत्र परं मात्रिकं जानीयात् । ह्रस्वात् पर उत्तमो यथा त्वत्रङ् करोति (ब्रा० ३।२।५), अध्यर्धो व्यञ्जनात् परः कृष्णो रूपम् (सं० ३।२।५), दीर्घादनन्तरो व्यञ्जनान्तरो मात्रिको यथा निजल्किकेन शीर्ष्णा (ब्रा० ५।७।१३), यलवा, यथा लकार एभ्य एवैनं लोकेभ्यः (सं० २।६।५), वकारः शरव्ये ब्रह्म सं ५ शिता (सं० ४।६।४) । अत्र द्विमात्रौ लकारवकारौ । गोभिर्यज्ञं दाधार (सं०४।४।८) अत्राध्यर्धः । सवीर्यैरेव (सं० ३।३।७) अनयोर्लोकयोः (सं० ५।३।२) अत्र मात्रिका, दीर्घपूर्वाद् रेफात् परत्वात् ।

अथ कस्मादस्मिन् प्रातिशाख्ये शिक्षाव्याकरणेषु च मात्रिकद्विमात्रिकव्यञ्जनानां ह्रस्वदीर्घसंज्ञे न विधीयेते, वर्णान्यत्वाभावात् । स्वरेष्वेव हि कालभेदाद् वर्णान्यत्वं न व्यञ्जनेषु । न चैवं सति "परीमाणाच्च[1] पञ्चमात्" (तै० प्रा० २३।२) इत्यनेन विरोध इति वक्ष्यामः ।

स च[2] समानस्थाने मूर्ध्न आसन्ने उपरि भागे जातेन प्रयत्नेन उच्चार्यमाणः स्वर उदात्तगुणकत्वादुदात्तसंज्ञकोऽज् भवति । यो वै पवमानानाम् (सं० ३।२।१) ।

[3]समानस्थाने हृदयासन्ने अधोभागे जातेन प्रयत्नेन उच्चार्यमाणस्वरोऽनुदात्तगुणकत्वादनुदात्तसंज्ञको भवति । विप्रा अमृता ऋतज्ञाः (स० ४।७।१२) ।

---

१. परीमाणस्य पृथग् वचनं स्वराख्यवर्णमात्रविषयत्वख्यापनार्थमिति हि वक्ष्यति । (तै. प्रा. सू. २३।२)

२. उच्चैरुदात्तः (तै. प्रा. १।३८)

३. नीचैरनुदात्तः (तै. प्रा. १।३९)

[1]उभयोः संभेदात्मकयथोक्तभागद्वयजन्मा प्रयत्नेन कर्णमूलभागोच्चार्यमाणः स्वरः स्वरितगुणकत्वात् स्वरितसंज्ञको भवति। स्वर्यते पार्श्वत उपक्षिप्यत इति स्वरितः—नह्यग्नेरास्यं किञ्चन (२।६।८)। अत्र शिक्षा

[2]अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥

स्वरितस्वरूपं विविधभेदं निरूप्यते। उदात्तात् स्वरादनन्तरेऽव्यवहितपरे स्वरिते [3]तस्यादिरुच्चैस्तरामुदात्ततरमुच्चार्यते। क्रुष्टादिषु प्रथमाख्येन यमेन तुल्यमित्यर्थः। आदिरन्त्येन पूर्वांशोऽभिहितः, यावदर्धं ह्रस्वस्य तावन्मात्रमर्धमात्रासम्मितोंऽश इत्यर्थः (तै० प्रा० १।८८)।

उदात्तसमः शेषः (तै० प्रा० १।४२)।

योऽर्धमात्रात् परोंऽशः स तूदात्तसम एव। न पूर्ववदुदात्ततरः। य ईजानः (सं० ४।४।४)। प्र उगमुक्थम्। (सं० ४।४।२)

सव्यञ्जनोऽपि (तै० प्रा० १।४३।)। सव्यञ्जन इति व्यञ्जनपूर्वक उच्यते। तस्यैवालक्षितत्वेन लक्ष्यत्वात्। तेन पूर्वोक्तव्यतिरिक्तः सर्वस्वरितः परिगृह्यते। सोऽपि पूर्वोक्तलक्षणो भवति। देवस्य त्वा सवितुः प्रसवे···बाहुभ्याम्। तदेवं वाजसनेयिनां स्वरितो लक्षितः।

अथान्यशाखीयः स्वरितः प्रदर्श्यते—[4]स्वरितस्य ह्रस्वार्धकालाच्छेषोंऽशोऽनुदात्ततरो विकल्पेन भवति। अन्यस्वरापेक्षयात्रायमेव भेदो यत् स पार्श्वत उत्क्षेपणात् स्वरितात्मको भवति। तस्यांशस्य अनुदात्ततरत्वं त्वधोभागे दृढप्रयत्नमात्रेण बोध्यम्। तान्येव पूर्वं प्रदर्शितान्युदाहरणानि।

---

१. समाहारः स्वरितः (तै० प्रा० १।४०)।

२. तस्यादिरुच्चैस्तरामुदात्तादनन्तरे यावदर्धं ह्रस्वस्य (तै०प्रा०१।४१)।

३. उष्माणं वा घोषिणस्तत्प्रयत्नम् (ऋ० प्रा० १४।३५)। शुनश्शेषो निष्पपी शास्सि निष्प्याळ् विक्रमा ब्रह्मविष्णु स्म पृश्निः (ऋक्० प्रा० १४।३६)।

४. अनन्तरो वा नीचैस्तराम् (तै० प्रा० १।४४)।

अन्यशाखास्थोऽपि लक्ष्यते—स हि स्वरितस्य शेषोंऽशः, यो हि शाखान्तरेऽनुदात्ततरः कथितः, [1]अनुदात्तसमो वा भवति। अधोभाग-जातेनाद्दढप्रयत्नेन पार्श्वत उत्क्षेपणात् स्वरितात्मकश्च भवति। पूर्वो-क्तान्येवोदाहरणानि। इतः पूर्वं शाखान्तरमतानि प्रतिपादितानि। भिन्नानां मतानां प्रदर्शनमात्मपक्षस्य स्फुटत्वप्रतिपादनार्थं बोद्धव्यम्। एवमुत्तरत्राप्यनिष्टपक्षोपदेशानां प्रयोजनमनुसन्धेयम्।

इदानीं स्वमतं प्रदर्श्यते—[2]आदिस्थोदात्त इति। अत्र आदिपदेन अर्धमात्रा न ग्राह्या, किन्त्वङ्गभूतपूर्वोत्तरव्यञ्जनसहितस्य क्वचित् स्वरार्धपर्यन्तोंऽश उदात्तसमो भवति, क्वचित् स्वरार्धव्यञ्जनात्मकः, क्वचिद् व्यञ्जनात्मकः। शेषश्च क्वचित् स्वरार्धात्मकः, क्वचित् स्वरार्ध-व्यञ्जनात्मकः, क्वचिद् व्यञ्जनात्मक इति पूर्व इव त्रिविधः। सोऽनुदात्तप्रयत्नेन कर्णमूलभाजा स्वरितात्मको भवति। अयं पक्षः स्वशाखीयो ज्ञातव्यः।[3]

तत्र स्वरार्धपर्यन्त आदिर्यथा 'सं त्वा सिञ्चामि' (सं० १-६-१), विश्वरूपो वै (सं० २।५।१), अयं यः सोमो न्यधाय्यस्मै (स० २।२।१२), यथा व्याघ्रम् (स० ५।४।११) अत्र स्वरितग्राहिव्यञ्जनाभावादेवं भवति। स्वरपर्यन्त आदिर्यथा—श्रोत्रं सौव्वम् (सं० ४।३।२), प्रियमासधस्थम्

---

१. अनुदात्तसमो वा (तै० प्रा० १।४४)।

२. आदिरस्योदात्तसमः शेषोऽनुदात्तसम इत्याचार्याः (तै० प्रा० १।४६)।

३. अयमत्र संग्रह—

स्वरितग्राह्यनुस्वारस्तथा पूर्वाङ्गमुत्तमम्।
तयोर्द्वित्वे परस्याङ्गं पूर्वाङ्गं चेत्तदेव तु॥
तथा पूर्वाङ्गभूताश्च यलवा रेफपूर्वकाः।
ह्रस्वादनन्तरास्त्वेते यद्यन्तस्था परास्तथा॥

(५।११।११), यजान् व आज्यभागौ (स०२।६।३), कल्पाञ्जुहोति (स० ५।४।८), तेनैवैनं युनक्ति (स० ५।५।३), शरव्ये ब्रह्मसंशिता (स० ४।६।४,१) अत्र स्वरितादनन्तरस्य व्यञ्जनस्य स्वरितग्राहित्वादेवं भवति।

उपरितनैकव्यञ्जनपर्यन्त आदिर्यथा—अश्मꣳस्ते क्षुदमुन्ते शुक् (सं० ४।६।४,१) तस्माद्वदन् प्राणान् (सं० ५।२।१०) अहर्माꣳसेन (सं० ५।७।२०) होतर्यविष्ठ (सं० १।२।१४) यत् पूतीकैर्वा (सं० २।५।३) अत्र स्वरितग्राहिणो व्यञ्जनान्तर्हितत्वादेवं भवति।

[1]प्रवणः=स्वरितस्वरः। अयं सर्व एव स्वरितो भवति। न त्वादिरस्य कश्चिदंश उदात्तसमो भवतीत्येके आचार्या उपदिशन्ति। यस्माद्ध्रस्व-स्वरितात् परतः स्वरितग्राहिव्यञ्जनं नास्ति तद्विषयमेतत् सूत्रम्। यथा—वायवस्थो पायवस्थ (सं० १।१।१) स्वकृत इरिण उपदधाति (सं० ५।२।४) त्र्यतिरात्रो भवति (सं० ७।३।३)।

सपूर्वं स्वर्यते ह्रस्वो दीर्घोऽन्त्यांशे तदुत्तरौ।
नादानुस्वारकावेव स्वर्येते पूर्व उच्चवत्॥

इति शिक्षावचनमत्र मूलमनुसन्धेयम्।

इतः पूर्वं स्वरितविषये स्वीयोपयुक्तविषयसत्त्वात् प्रातिशाख्यांशः पुरः प्रख्यापितः। अन्योंऽशस्तु विशेषजिज्ञासुभिः प्रातिशाख्ये द्रष्टव्यः।

इतः पूर्वं वर्णानां ककारादीनामुच्चारणादिप्रक्रिया सम्यगुपपादिता। साम्प्रतं तदुपादानकारणीभूतध्वनेरुपलब्धिः प्रदर्श्यते 'अथ शब्दोत्पत्तिः' (तै० प्रा० अ० २ सू० १) इत्यादिभिः सूत्रसमूहैः। अथ शब्दोत्पत्तिः (तै० प्रा० अ० २ सू० १) इति सूत्रे वर्णनित्यत्ववादिनां मते उत्पत्ति-शब्दस्याभिव्यक्तिरर्थः। यथा भूमौ वर्तमानमेव जलं खननेन दृश्यते, न तु तत्र जलमुत्पद्यते; तथैव व्यापक एव शब्दस्तत्तदुपाध्यवच्छिन्नो वर्णत्वेन

---

१. सर्वं प्रणव इत्येके (तै० प्रा० अ० १।४७)।

व्यवह्रियते। तथा च द्विविधः शब्दो नित्यः कार्यश्च। तत्र नित्यः सर्वदेश-व्यापक एकः शब्दो ब्रह्मेत्यभिधीयते। तस्मात् कार्यशब्द उत्पद्यते। स व्यक्तः काचित्कोऽनन्तभेदश्च। तस्य वर्णात्मकस्योत्पत्तिरिह प्रतिपाद्यते—'वायुशरीरसमीरणात् कण्ठोरसोः सन्धाने' (तै० प्रा० अ० २ सू० २) इत्यादिना।

अत्र हि सर्ववर्णानुवर्तिनः सामान्यरूपस्य ध्वनेरुत्पत्तिरभिप्रेता। अत्र वायुशरीरसमीरणादित्येतद्घटकसमीरणशब्दस्य द्विविधा व्याख्या। अत्र संपूर्वादीर्त्ते ल्युट्प्रत्ययो णिजन्ताद्वा तस्मात्। यदा केवलाल्ल्युट-प्रत्ययस्तदा वक्त्रा प्रेर्यमाणस्य कोष्ठ्यस्य वायोः शरीरे यत् समुत्थानं प्रयोज्यव्यापारस्तस्मादित्यर्थः। णिजन्तपक्षे तु तस्य वायोः शरीरे यत्स-मुत्थापनं प्रयोजकव्यापारस्तस्मादित्यर्थः। कण्ठोरसोरित्यत्र छान्दसत्वा-देकवद्भावाभावः। यद्वा शरीरस्य वायुर्वायुशरीरमिति राजदन्तादित्वाद् वायुशब्दस्य पूर्वनिपातः। तयोः सन्धाने मध्याकाशे शब्दस्योत्पत्तिरित्य-न्वयः। तथा च वायुर्विविधः। अत्र हि शारीरो वायुरभिप्रेतः। अत्र हि—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।

इति शिक्षावचनमप्यनुसन्धेयम्। तथा च सर्ववर्णानुवर्तिनः सामान्यरूपस्य कण्ठोरोमध्यं स्थानम्, कोष्ठ्यो वायुः करणम्, तत्समीरणं यत्न इत्युक्तं भवति।

[1]तस्य विशेषरूपप्रापकाणि भवन्ति, [2]शिरःपदेन आस्यस्य उपरि

---

१. तस्य प्रातिश्रुत्कानि भवन्ति उरः कण्ठः शिरो मुखं नासिके इति (तै० प्रा० अ० २ सू० ३)। प्रतिनियततया श्रूयत इति प्रतिश्रुद् विशेषरूपम् (प्रतिध्वनिः), तदर्हन्तीति प्रातिश्रुत्कानि। प्राग्वतीयष्ठक्।

२. तथा उरः, कण्ठः, शिरः, उत्तरदन्ताः, उत्तरदन्तमूलम्, उत्तरोष्ठः,

प्रावरणमुच्यते। मुखपदेन उत्तरदन्ताः, तन्मूलम्, उत्तरोष्ठौः, हनुमूलम्, तालु च, नासिकापदेन नासिकाच्छिद्रयोः कण्ठासन्नप्रदेशो गृह्यते।

संवृत्ते कण्ठे नादः क्रियते (तै० प्रा० अ० २ सू० ४) एतदादिना सूत्रत्रयेण शब्दस्य त्रैविध्यमुच्यते। तत्र वर्णानां विशेषरूपोत्पत्तौ प्रथमकारणभूता अनुप्रदानाख्या नादादयो बाह्यप्रयत्नाः। संवरणं नाम कण्ठस्य संकोचः। स खलु संवारो नाम बाह्यप्रयत्नः। तस्मिन् संवारे जाते नादाख्यो बाह्यप्रयत्नो भवति। नादध्वनिसंसर्गाद् व्यञ्जनेषु घोषो नाम बाह्यः प्रयत्नो जायते। विवरणं[1] कण्ठस्य विस्तरणम्। स एव विवाराख्यो बाह्यः प्रयत्नः। तस्मिन् सति श्वासो नाम बाह्यः प्रयत्नो जायते। श्वासध्वनिसंसर्गादघोषो नाम बाह्यः प्रयत्नो भवति।

साम्प्रतिके प्रकृतिस्थे कण्ठे सति [2]हकारो नाम बाह्यः प्रयत्नो भवति। तेन व्यञ्जनेषु घोषो जायते। अर्थाद् यदा कण्ठस्य संवरणं मध्यावस्था वा तदा घोषः। कण्ठस्य विवरणे तु वायुः श्वासरूपेण परिणमते। यदा वंशीवेम्बादौ सङ्कुचिते छिद्रे वायुः प्रविशति, तदा घोषः शब्दो जायते। महति छिद्रे तु वायुप्रवेशेऽपि वायुः श्वासरूपेणाविर्भवति।

नादश्वासहकारा वर्णानां विशेषरूपौत्पत्तौ प्रथमकारणानि भवन्ति। कोष्ठ्यवायुसमुद्भवात् परं मूर्ध्नि प्रतिघातान्निवृत्ते तस्मिन् कण्ठस्य संवारादयो यथोक्तास्तिस्रोऽवस्था भवन्ति तदा [3]प्रदीयन्ते स्थानेषु

हनुमूलम्, तालु च, नासिकाच्छिद्रयोः कण्ठासन्नप्रदेश इति नव स्थानानि।

१. विवृते श्वासः (तै. प्रा. अ. २ सू. ५)।

२. मध्ये हकारः (तै. प्रा. अ. २ सू. ६)।

३. ता वर्णप्रकृतयः (तै. प्रा. अ. २ सू. ७)। प्रकृतय इत्यत्र आदिकर्मणि प्रशब्दः। करणे क्तिन्। कर्तुमारभ्यन्त आभिर्णा इति प्रकृतयः। प्रकृतिशब्दस्य स्त्रीविषयत्वात्ता इति विशेषणम्। "निर्दिश्य-

निवेश्यन्ते एभिर्वर्णा इत्यनुप्रदानानि। तथा च स्वरेषु घोषवत्सु च व्युत्पाद्येषु नादोऽनुप्रदानं भवतीत्यर्थः सम्पन्नः। हश्च चतुर्थाश्च हश्चतुर्थास्तेषु हकाराख्यः प्रयत्नोऽनुप्रदानं भवति। अयं हकारः प्रयत्नस्तृतीयतया प्रागुक्तोऽपि पूर्वसूत्रापवादतया तदनन्तरमेव विनियुज्यते। पूर्वत्र तु तृतीयतयाऽभिधानं तत्कारणभूताया मध्यावस्थाया इतरावस्थाद्वयनिरूप्यत्वादित्यनुसन्धेयम्। तथा च घोषवत्सु हकारश्च चतुर्थाश्च महाप्राणा इतरेऽल्पप्राणाः।

[1]अघोषेषु श्वासोऽनुप्रदानं भवति। [2]प्रथमेभ्योऽन्येष्वघोषेषु प्रकृष्टः श्वासोऽनुप्रदानं भवति। ततश्च प्रथमा अल्पप्राण अघोषेषु। इतरे द्वितीयाः शषसाश्च महाप्राणा अयोगवाहाश्च। यद्यप्ययोगवाहाः कण्ठरवेण नोक्तास्तथापि इतरपदवाच्यत्वेन तेऽवगन्तव्याः।

अथाधुना स्थानकरणाभ्यन्तरप्रयत्ना उच्यन्ते। अवर्णे उच्चार्ये ओष्ठ्ययोरीषदसमाप्तः परस्परोपश्लेषः कार्यः, एवं [3]हन्वोश्च। तथा

मानप्रतिनिर्दिश्यमानयोरेकतामापादयन्ति सर्वनामानि कामचारेण तल्लिङ्गतामुपाददते" इति महाभाष्यवचनात् प्रयोगसाधुत्वम्।

नादोऽनुप्रदानं स्वरघोषवत्सु (तै प्रा. अ. २ सू. ८)। अनुप्रदीयते जन्यतेऽनेन वर्ण इत्यनुप्रदानं मूलकारणम्। हकारो हश्चतुर्थेषु (तै. प्रा. अ. २ सू. ९)।

१. अघोषेषु श्वासः (तै. प्रा. अ. २ सू. १०)।

२. भूयान् प्रथमेभ्योऽन्येषु (तै. प्रा. अ. २ सू. ११)।

३. अवर्णेनात्युपसंहृतमोष्ठहनुनातिव्यस्तम् (तै. प्रा. अ. २ सू १२)। उपसंहार उपश्लेषणं समीपानयनमिति यावत्। हनुशब्द आस्यपार्श्वभागयोर्वर्तते। व्यस्तं विश्लिष्टम्। ओष्ठौ च हनू च ओष्ठहनू। ओकारे च (तै. प्रा. अ. २ सू. १३)। ओष्ठौ तूपसंहृततरौ (तै. प्रा. अ. २ सू. १४)।

ईषदसमाप्तः परस्परविश्लेष ओष्ठयोः कार्यः, एवं हन्वोश्च। तथा च ह्रस्वेऽवर्णे उपश्लेषभूयस्त्वम्। एवं सति अवर्णस्य हनूस्थानम्। ओष्ठौ करणम्। ओकारे उच्चार्ये हनू अतिव्यस्ते न भवतः। ओष्ठौ हन्वोः परस्परं च उपश्लेषिततरौ कार्यौ। तथा च ओकारस्य हनू उत्तरोष्ठश्च स्थानम्, अधरोष्ठः करणम्।

एकारे उच्चार्ये ओष्ठौ परस्परम् [1]ईषत्प्रकृष्टौ भवतः। एतेनास्य विवृतप्रयत्नत्वम्। हनू तु परस्परमुपश्लेषिततरे भवतः। प्रयत्नान्तरं चास्य वक्ष्यति—'तालौ जिह्वामध्यमिवर्णे एकारे च' (तै० प्रा० २, २२, २३) इति। तेनास्य हनू तालु च स्थानम्, औष्ठौ जिह्वामध्यं च करणम्।

[2]अव्यञ्जनपूर्वके एकारे, जिह्वामध्यस्य यौ अन्तौ (पार्श्वभागौ) ताभ्याम् उत्तरजम्भ्यान् हनुमूलयोरुपरि प्रदेशान् स्पर्शयति। व्यञ्जनपूर्वके तु न स्पर्शनम्।

[3]ऋकारादिषु त्रिषूच्चारणीयेषु हन्वोः परस्परोपश्लेषः, जिह्वाग्रस्य वर्त्सेषूपसंहारश्च कार्यः। एतेषां वर्त्सोः स्थानम्। जिह्वा हनू च करणम्। रेफटवर्गस्थानयोर्मध्यप्रदेश इति यावत्, एवं च ऋकारे ॠकारे ऌकारे च उच्चार्ये जिह्वाग्रस्य वर्त्सेषु उपसंहारः, हन्वोः परस्परोपश्लेषश्च कार्यः। एतेषां वर्त्सोः स्थानम्, जिह्वा हनू च करणम्।

---

१. ईषत्प्रकृष्टावेकारे (तै. प्रा. अ. २ सू. १५)। ओष्ठावित्यन्वादिश्येते। उपसंहृततरे हनू (तै. प्रा. अ. २ सू. १६)।

२. जिह्वामध्यान्ताभ्यां चोत्तराञ् जम्भ्यान्त्स्पर्शयति (तै० प्रा० अ० २ सू० १७)।

३. उपसंहृततरे च जिह्वाग्रमृकारर्कारल्कारेषु वर्त्सेषूपसंहरति (तै० प्रा० अ० २ सू० १८)। उपसंहृततरे इति हन्वोर्विशेषणम्। वर्त्सा नाम रेफटवर्गस्थानयोर्मध्यप्रदेशः।

'एकेषामनुस्वारस्वरभक्त्योश्च' (२।१९) एकेषामन्येषां मतेनानुस्वारे हनूपसंहारः कार्यः। स्वरभक्तौ जिह्वाग्रस्य वर्त्स्वेषूपसंहार इति यथाक्रमं विनिवेशः। तेषामनुस्वारस्तावन्नासिक्यः, स्वरभक्तिरप्यकारार्धरूपा।

स्वमते त्वनुस्वारस्य आनुनासिक्यमात्रत्वम्। नासिकाविवरणादानुनासिक्यम् (२।३०)। स्वरभक्तेस्तु रेफस्थानादिकं भवति 'रेफः स्वरभक्तिः' (२१।१५) इति च वक्ष्यति। अनादेशे प्रण्यस्ता जिह्वा (२०)।

अनुपदेशे जिह्वा प्रसारितैव तिष्ठति। अकारवदोष्ठौ (२१) ओष्ठावपि व्यापारानादेशे अकारवद्भवतः। अकारे यथा नात्युपसंहृतौ तथा स्यातामृकारादिषु। तदनेन सूत्रद्वयेन जिह्वाया अनादेशविषयेऽकरणत्वम्, ओष्ठयोस्तु तस्मिन् विषयेऽकरणत्वं चोक्तं भवति। अनात्युपसंहृततरावित्यर्थः।

तालौ जिह्वामध्यमिवर्णे (२२) इकारे कार्ये जिह्वाया अधस्तनप्रदेशे जिह्वामध्यमुपसंहरेत्। तथा च जिह्वाया अधस्तनप्रदेश इवर्णस्य स्थानम्, जिह्वामध्यं करणम्।

एकारे च (२३) एकारे कार्ये जिह्वामध्यं तालौ उपसंहरतव्यम्। इवर्णे यथा जिह्वामध्योपसंहारः, न खल्वेवमेकारे, किन्तु ततो न्यूनः। कुतः? अकारमिश्रितत्वादेकारस्य, अकारस्य च तदेकदेशत्वाद् जिह्वामध्यनिष्पाद्यत्वं न तु स्वतः।

अत एव सोपाधिकत्वान्न्यूनत्वोपपत्तिः।

ईषत्प्रकृष्टौ (२।१५) इत्यादिसूत्रत्रयेण अव्यञ्जनस्य एकारस्य स्थानकरणे निर्दिष्टे। अत्र तु सव्यञ्जनस्य एकारस्य स्थानकरणे निर्दिश्येते। तथा च सव्यञ्जनस्य एकारस्य तालुस्थानं जिह्वामध्यं तु करणम्।

ओष्ठोपसंहार उवर्णे (२४) उवर्णे कार्ये ओष्ठोपसंहारः कार्यः। अत्रोपसंहारः पूर्ववन्न सन्निकृष्टतामात्रम्, किन्तु सन्निकृष्टौ ओष्ठौ दीर्घौ च स्याताम्। एवम् ओकारे उच्चार्ये ओष्ठौ तूपसंहृततरौ (२।१४) इत्य-

त्रापि सन्निकृष्टौ ओष्ठौ दीर्घौ च स्याताम्। तथा च उकारस्य उत्तरोष्ठः स्थानम्, अधरोष्ठः करणम्।

एकान्तरस्तु सर्वत्र प्रकृतात् (२५)। सर्वत्र ओष्ठ्यस्वरेषु प्रकृतात् प्रथमकृताद् ओष्ठ्योपसंहारात् पृथगोष्ठोपसंहारः कर्तव्यः। स चेत् एकान्तरः, मात्राकालव्यवेत इत्यर्थः। एकमात्रा अन्तरं व्यवधानं यस्यासौ एकान्तरः, मात्राशब्दस्यात्र लोपः। तुशब्द ओकारपरत्वे एकान्तरत्वनियमं निवर्तयति। उदाहरणानि उत्पूतशुष्मम्। सुन्नीयमित्ति सु उन्नीयम्। अथो ओषधीषु इत्यादि। अध्यर्धमात्राव्यवायेऽप्येकान्तरत्वं शते पञ्चाशन्न्यायात्। शिक्षायां तु—

ओष्ठ्ययोः स्वरयोर्मध्ये दृश्येते तु तपौ यदि।
पृथग्भावस्तयोर्न स्यात् त्रुटिमात्रं तयोर्भवेत्॥
ओष्ठ्यस्वरेषु कार्येषु प्रथमेनाक्षरद्वये।

इति श्लोकाभ्यां क्वचिदेकान्तरत्वसम्भवेऽपि पृथगोष्ठोपसंहारः प्रतिषिध्यते। देवो वः सवितोत्पुनाति। (सं० १।१।५) तन्निरासार्थमिह सर्वत्रेति यत्नः क्रियते। एकान्तरत्वसम्भवे सर्वत्र भवत्येव पृथगोष्ठोपसंहारः। तदयमत्र संग्रहः—

पृथगोष्ठोपसंहारो नार्धमात्रान्तरे भवेत्।
एकमात्रान्तरत्वस्य स्यात्तु सर्वत्र सम्भवे॥ (२५)

अकारार्धमैकारौकारयोरादिः (२६)। ऐकारस्य औकारस्य च आदिरकारार्धं भवति, तेन तदीयाः स्थानकरणप्रयत्नास्तस्मिन्नंशे भवन्ति।

संवृतकरणतरमेकेषाम् (२७)। (संवृतानि करणानि यस्य तत् संवृतकरणम्) एकेषामाचार्याणां मतेऽतिशयेन संवृतानि करणानि तस्याऽकारार्धस्य भवन्ति। स्वमते तु संवृतकरणमेव।

इकारोऽध्यर्धः पूर्वस्य शेषः (२८)। अध्यर्धमात्र इकारः पूर्वस्य ऐकारस्य शेषो भवति। तेन तदीयाः स्थानकरणप्रयत्नास्तस्मिन्नंशे भवन्ति।

उकारस्तूत्तरस्य (२९)। उकारोऽध्यर्धमात्र औकारस्य शेषः। तेन तदीयाः स्थानकरणप्रयत्नास्तस्मिन्नंशे भवन्ति। यद्यप्येकारादीनां चतुर्णामपि सन्ध्यक्षराणामेवं द्विस्वरात्मकत्वं समानम्, तथापि एदोतोः प्रश्लिष्टावयवत्वात् प्रकारान्तरमेवोक्तम्।

अनुस्वारोत्तमा अनुनासिकाः (३०)। अनुस्वाराश्च उत्तमाश्च ङकारादय आनुनासिक्यगुणयुक्ता भवन्ति। 'अनुस्वारो व्यञ्जनं वा स्वरो वा' इति परमतम्। तन्निरासार्थमिदं सूत्रम्। अनुस्वारोऽपि उत्तमवद् व्यञ्जनमेवास्मच्छाखायाम्, अर्धगकाररूपत्वात्।

[1]स्वराणां यत्रोपसंहारस्तत्स्थानम् (३१)। उक्ताः स्वराणां प्रयत्नाः, व्यञ्जनानां च वक्ष्यन्ते। अत्रावसरे स्थानकरणविवेक उच्यते। स्वराणां तत् स्थानं यस्मिन्नवयवेऽवयवान्तरस्य उपश्लेषः क्रियते। यथा हनू अवर्णस्य। तत्र हि विचाल्यतरौ ओष्ठौ उपसंह्रियेते। तालिवर्णस्य। उत्तरोष्ठ उवर्णस्य। तत्र हि विचाल्यतरोऽधरोष्ठ उपसंह्रियते। वर्स्वाम् ऋकारादीनाम्। एकारैकारयोः हनू तालु च। ओकारौकारयोः हनू उत्तरोष्ठश्च।

[2]यदुपसंहरति तत् करणम् (३२)। यदङ्गम् अङ्गान्तरे वक्त्रा

---

१. तत्र हि द्वितीयाध्याये सू० ३१ स्वराणां 'यत्रोपसंहारस्तत् स्थानम्' (तै० २।३१)। अन्यप्रातिशाख्यापेक्षया तैत्तिरीयं प्रातिशाख्यं विज्ञानमनुसरति। स्वराणां तत् स्थानं भवति, यत्र हि वक्ता वर्णमुच्चारयितुं यस्मिन् मुखस्यावयवेऽवयवान्तरं करणमुपश्लेषयति तत् स्वराणां स्थानं भवति। यथा अवर्णे उच्चारणीये हन्वोः विचाल्यतरौ ओष्ठौ उपसंहरति, तदा हनू अवर्णस्य स्थानं भवति।

२. यदुपसंहरति तत् करणम् (तै० प्रा० २।३२)। अर्थाद् वक्ता यदा वर्णमुच्चारयितुं यदङ्गम् अङ्गान्तरं (स्वस्थानम्) प्रापयति, तदा तदङ्गं

उपसंह्रियते तत् स्वराणां करणम्। यथा ओष्ठौ अवर्णस्य। तालु च जिह्वा च इवर्णस्य। अधरोष्ठ उवर्णस्य। ओष्ठौ हनू च जिह्वा च ऋकारादीनाम्। ओष्ठौ जिह्वाप्येदैतोः। ओष्ठौ ओदौतोः।

अन्येषां तु यत्र स्पर्शनं तत् स्थानम् (३३)। स्वरेभ्योऽन्येषां व्यञ्जनानां तत् स्थानं यत्र स्पर्शनं क्रियते। यथा हनुमूलं कवर्गस्य। तालु चवर्गस्य। मूर्धा टवर्गस्य। दन्तमूलानि तवर्गस्य। उत्तरोष्ठः पवर्गस्य। तालु यकारस्य। दन्तमूलानि रेफलकारयोः। दन्ता वकारस्य। ऊष्मादिषु तु स्पर्शनाभावादतिदेशादिना स्थानावगतिर्भवति। "उपसंहारस्पर्शनयोः शब्दशक्त्या विशेषो विदुषैव विज्ञेयः। तुशब्दः स्वरनिवृत्त्यर्थः। अथवा

करणं भवति। यथा अवर्णं स्वस्थानं हनू ओष्ठौ प्रापयति, तदा ओष्ठौ करणम् हनू तु स्थानं भवति।

अयं भावः—अत्र हि द्विविधा वर्णाः, स्वरा व्यञ्जनानि च। तत्र स्वरेषु स्पर्शनाभावाद् उपसंहारः क्रियते। तथा च उपसंहारस्य साधकं करणं भवति। यत्र च उपसंहारो भवति तदा तत् स्थानं भवति। व्यञ्जनेषु तु स्पर्शनस्य सत्त्वात् यत्र स्पर्शनं भवति तत् स्थानं कथ्यते। येन च स्पर्शनं क्रियते तत् करणं सम्पद्यते। यथा कवर्गे उच्चारणीये हनुमूलं जिह्वामूलेन स्पर्शयति, तदा हनुमूलं स्थानं भवति, जिह्वामूलं च करणं भवति। परमूष्मादिषु स्पर्शनाभावाद् आतिदेशिकं स्थानं मन्तव्यम्, यथा स्पर्शस्थानेषूष्माण आनुपूर्व्येण (तै० प्रा० २।४४)। अत्र हि सप्त ऊष्माणः सन्ति—जिह्वामूलीयशकारषकारसकारोपध्मानीयहकारविसर्जनीयाः। तत्रानेन सूत्रेण आतिदेशिकानि स्थानानि जिह्वामूलीयादीनां पञ्चानां क्रमेण कवर्गादीनामेव पूर्वोक्तेन सूत्रेण निर्दिश्यन्ते। कण्ठस्थानौ हकारविसर्जनीयौ (तै० प्रा० २।२६) इति सूत्रेण हकारविसर्जनीययोः कण्ठः स्थानम्

अनुस्वारस्वरभक्त्योर्व्यञ्जनवत् स्पर्शमात्रनिवर्तक इति माहिषेय-भाषितम्" इति त्रिभाष्यरत्नकृत्।

येन स्पर्शयति तत् करणम् (३४)। व्यञ्जनानां तत् करणं येनाङ्गेन स्थानं स्पर्शयति। यथा जिह्वा कवर्गादीनां चतुर्णां वर्गाणाम्, यरलवानां च। अधरोष्ठः पवर्गवकारयोः। ऊष्मादीनां तु करणावगतिर्वक्ष्यते।

हनुमूले जिह्वामूलेन कवर्गे स्पर्शयति (३५)। कवर्गे उच्चार्ये हनुमूलं जिह्वामूलेन स्पर्शयति।

तालौ जिह्वामध्येन चवर्गे (३६)। चवर्गे उच्चार्ये तालु जिह्वामध्येन स्पर्शयति।

जिह्वाग्रेण प्रतिवेष्ट्य मूर्धनि टवर्गे (३७)। टवर्गे कार्ये प्रतिवेष्टितेन जिह्वाग्रेण मूर्धानं स्पशयति। मूर्धशब्देन वक्त्रविवरोपरिभागो विवक्ष्यते।

जिह्वाग्रेण तवर्गे दन्तमूलेषु (३८)। जिह्वाग्रेण यथावस्थितेन उत्तर-दन्तमूलेष्वधोभागे स्पर्शयति। कर्मत्वाविवक्षया दन्तमूलेष्वित्यधि-करणे सप्तमी। शिक्षायां तु तवर्गं दन्त्यं तकारं तु दन्तमूलीयं चोक्त्वा नकारस्यापि क्वचिद् दन्त्यत्वमुच्यते। तदस्माभिर्नाश्रयितव्यम्, प्राति-शाख्यविप्रतिषिद्धत्वात्। तस्मान्नकारोऽपि सर्वत्र दन्तमूलीयः।

ओष्ठाभ्यां पवर्गे (३९)। पवर्गे कार्ये ओष्ठाभ्यामन्योन्यं स्पर्शयेत्। अत्रोत्तरोष्ठः स्थानम्, उत्तरत्वसाम्यादेषां स्थानानाम्। अधरोष्ठः करणम्। तत्राधरेण तु विचाल्यतरेणोत्तरं स्पर्शयति।

तालौ जिह्वामध्यान्ताभ्यां यकारे (४०)। जिह्वाया मध्यं तस्य अन्तौ ताभ्यां तालुं स्पर्शयेद्।

रेफे जिह्वाग्रमध्येन प्रत्यग् दन्तमूलेभ्यः (४१)। रेफे कार्ये जिह्वा-ग्रस्य मध्यस्थो यः प्रदेशस्तेन दन्तमूलेभ्यः प्रत्यग् अभ्यन्तरमुपरिभाग इत्यर्थः। यथा प्रत्यगात्मेति, अन्तरात्मेत्यर्थः।

दन्तमूलेषु च लकारे (४२)। चकारेण जिह्वाग्रमध्यं प्रत्यक्त्वं चाकर्षति। लकारे कार्ये जिह्वाग्रमध्येन दन्तमूलेषु प्रत्यक् स्पर्शयति। अयमर्थः—लकारस्य दन्तमूलप्रत्यासन्नप्रत्यक्प्रदेशः स्थानमिति विज्ञेयम्।

ओष्ठान्ताभ्यां दन्तैर्वकारे (४३)। ओष्ठशब्देनात्राधरोष्ठ उच्यते, तदन्ताभ्याम्। ओष्ठस्य बाह्यान्तरभागभिन्नतया द्विवचनं प्रयुज्यते। दन्तैरिति सप्तम्यर्थे तृतीया। उत्तरदन्तेष्वित्यर्थः। वकारोत्पत्तौ स्वभावतोऽधरोष्ठस्याभ्यन्तरोऽन्तःकरणं भवति। यत्र त्वसौ ओष्ठोपसंहारोष्ठ्यस्वरयोर्मध्यवर्ती भवति, तत्र सामर्थ्याद् बाह्योऽन्तःकरणम्। यथा ध्रुवोऽसि (सं० ६।२) इत्यादि। एवं यकारादीनां चतुर्णां करणान्तव्यापारनिष्पाद्यत्वाद् अन्तस्था इत्याख्या।

स्पर्शस्थानेषूष्माण आनुपूर्व्येण (४४)। हकारस्य स्थानं पृथक् वक्ष्यति। ततोऽन्येषां पञ्चानामयं स्थानविधिः। जिह्वामूलीयादयः पञ्च ऊष्माण आनुपूर्व्येण कवर्गादीनां पञ्चानां वर्गाणां स्थानेषूत्पद्यन्ते। जिह्वामूलीयशषसोपध्मानीयाः पञ्च।

करणमध्यं तु विवृतम् (४५)। तेषामूष्मणां करणमध्यं तु विवृतं भवति। तेनैतेषां विवृतप्रयत्नता। तेन प्रथमस्योष्मणो हनुमूलोत्पादिनो जिह्वामूलोपलम्भाद् जिह्वामूलीय इत्याख्याऽवकल्प्यते।

कण्ठस्थानौ हकारविसर्जनीयौ (४६)। [1]हकारस्य तूत्तमान्तस्थापरस्य उरस्यत्वं वेदितव्यम्। शिक्षा चैवमाह—

---

१. यद्यपि हकारस्य उरःस्थानं प्रातिशाख्ये नोक्तम्, तथापि तस्य प्रातिश्रुत्कानि भवन्त्युरः कण्ठः शिरो मुखं नासिकेति (तै० प्रा० २।३) सूत्रबलादुरसो वर्णस्थानत्वोक्त्या वक्ष्यमाणशिक्षासाहाय्यात् शिक्षोक्तविशेषणस्य हकारस्योरःस्थानं बोध्यम्, तथा च शिक्षायां स्मर्यते—

हकारं पञ्चभिर्युक्तमन्तस्थाभिश्च संयुतम्।
उरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्॥ इति।

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्।
उरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्॥ इति।

करणानुक्तौ तु स्थानमेव करणं च वेदितव्यम्, "शेषाः स्थानकरणाः" इत्यापिशलिशिक्षावचनम्।

[1]उदयस्वरादिसस्थानो हकार एकेषाम् (४।७)। एकेषां मतेन हकार उदयस्य परस्य स्वरस्य आदिना समानस्थानो भवति। यथा हिरण्यपाणि-

---

१. उदयस्वरादिसस्थानो हकार एकेषाम् (तै० प्रा० २।४७) इति सूत्रेण एकीयमते हकारात् परस्य स्वरस्य यत् स्थानं तदेव स्थानं बोद्धव्यम्। उदयस्वरादिसस्थान इत्यादि पूर्वान्तसस्थान इत्यादि सूत्रद्वयं नेष्टमिति पूर्वान्तसूत्रे वैदिकाभरणकारः।

उदात्तानुदात्तस्वरितानां कस्मिंश्चिदिति शौत्यायनः (तै० प्रा० १८। सू० २)। धृतः प्रचयः कौण्डिन्यस्य (प्रा० १८।३)। स्वरितः प्लाक्षि-प्लाक्षायण्योः (१८।५)। मध्यमेन वाक्प्रयोगः (१८।४)।

कौण्डिन्यस्य मते ओकारस्य धृतापरपर्यायः प्रचयो नाम स्वरो भवति। उत्क्षेपणरहित उदात्तगुण एव प्रचयः। क्रुष्टादीनां सप्तानां स्वराणां मध्ये तृतीयाख्यो यो मध्यमः स्वरस्तस्य धृत इत्याख्या क्रुष्टप्रथम-द्वितीया उत्क्षेपिणः, चतुर्थमन्द्रतिरवार्या ऊषक्षेपिणः। तृतीयस्तु उभय-रहितो मध्ये लीयमानत्वाद् धृतसंज्ञः। उदात्तस्तु किञ्चिदुत्क्षिप्यत इति धृतोदात्तयोरीषद्विशेषः। अत एव 'स्वरितात् संहितायामनुदात्तानां प्रचय उदात्तश्रुतिः' (तै० प्रा० अ० २१ सू० १०)। संहितायां स्वरितात् परेषा-मेकस्य द्वयोर्बहूनां वा अनुदात्तानां व्यञ्जनान्तर्हितानां व्यञ्जनानन्तर्हि-तानां च प्रचयस्वरात्मको गुणो भवतीत्यर्थकेन पूर्वोक्तसूत्रेण उत्क्षेपणरहित उदात्तच्छ्रूयमाणः प्रचयः स्वरो भवतीति विधीयते। उदाहरणानि

मूतये (सं० १।४।५५) इति तालव्यः। ऐकारौकारयोरंशद्वयं भिन्नस्थानमिष्यते, ताभ्यां पूर्वे हकारे स्थानसंशयो मा भूदित्यादिशब्दः प्रयुज्यते। अकुहविसर्जनीयानां कण्ठ इत्यनेन अकारस्य कण्ठस्थानत्वम्। परं केवलस्य अकारस्य करणम् ओष्ठहनु नातिव्यस्तं नात्युपसंहृतं च। सन्ध्यक्षरादौ वर्तमानस्य तु संवृतकरणतरम्। तस्मात् स्थानकरणयोः सहचरितत्वाद् आदिसस्थान इत्युक्ते आदिना समानस्थानकरण इति विज्ञेयम्।

पूर्वान्तसस्थानो विसर्जनीयः (४८)। विसर्जनीयः पूर्वस्वरस्यान्तेन समानस्थानो भवत्येकेषां मतेन। अन्तग्रहणफलं सन्ध्यक्षरेषु।

नासिक्या नासिकास्थानाः (४९)। नासिक्यसंज्ञा वर्णा नासिकास्थाना वेदितव्याः। मुखनासिक्या वा (५०)। त एव नासिक्या मुखेन नासिकाभ्यां चोच्चारणीयाः। एवमुक्तस्य पक्षद्वयस्य योग्यतया व्यवस्थाश्रयणीया। स्पर्शेभ्यः परे प्रथमादिव्यपदेशभाजो मुखनासिक्याः। हकारात् परस्तु नासिकामात्रस्थानः।

वर्गवच्चैषु (५१)। अत्र ये मुखनासिक्या अनन्तरोक्ताश्च शब्दान्वा-

---

यथा—वायवस्थ (सं० १।१।१), हव्य ꣳ रक्षस्व (सं० १।१।३), त ऊषा अभवन् (सं० ५।२।३) इत्यादीनि संहितायां द्रष्टव्यानि। उदात्तपरः स्वरितपरो वा अनुदात्तः प्रचयो न भवति। यथा—तया देवतया (सं० ४।२।९), भवं यक्ना (सं० १।४।३६), सोमेन त्वातनच्मि (सं० १।१।३) इति प्रथमो यमः। ग्रन्थि ग्रथ्नातु (सं० १।१।२) इति द्वितीयः। अग्ने महान् (सं० २।५।९) इति तृतीयः। इध्मो वेदिरिति चतुर्थः। अत्राभिधानादुत्तमपरात् परतो नासिक्यागमो न भवति। तस्य कार्यान्तरविधावविद्यमानवद्भावात्। प्रजापतिं प्रश्नमैतम् (सं० २।५।११)।

दिष्टाः, तेषु वर्गवत् स्थानयोगो भवति। एतदुक्तं भवति—मुखशब्देनात्र पञ्चापि वर्गस्थानानि संगृहीतानि। तत्र कवर्गीयात् परस्य नासिक्यस्य हनुमूलं तावद् द्वितीयं स्थानं भवति। चवर्गीयात् परस्य तालु। एवं तत्तद्वर्गीयात् परस्य तत्तद्वर्गस्थानं द्वितीयस्थानमित्यवगन्तव्यम्।

नासिकाविवरणादानुनासिक्यम् (५२)। अनुनासिका ये वर्णा अनुस्वारोत्तमादयस्तेषामानुनासिक्यं नासारन्ध्रस्य विस्तरणाद् भवति। नासिक्येषु नासिका संवृतैव भवति। ळकारस्य तु स्थानादिकमत्र नोच्यते। कुतः? संहितायामभावात्।

[1]सर्वमेकयमं पूर्वेषाम् (अ० १५ सू० ९)। सर्वमक्षरजातम् एकयमम् एकस्वरम्, एकश्रुतिस्वरेण प्रयोक्तव्यमिति पूर्वेषां मतम्। पूर्वे वैयाकरणाः। एतच्छास्त्रस्य मूलभूतं व्याकरणं कृतवन्तो हि ते। अथ पूर्वे विद्वांस इति विद्वदपेक्षं प्राथम्यं तेषाम्। प्रथमे हि वैयाकरणा इति प्रसिद्धेः।

---

१. नासिक्येषु नासिका संवृतैव भवति। ळकारस्य तु स्थानादिकमत्र नोच्यते, अस्मत्संहितायां तदभावात्। सर्वमेकयमं पूर्वेषाम् (अ० १५ सू० ९)। सर्वमक्षरजातम् एकश्रुतिस्वरेण प्रयोक्तव्यमिति पूर्वेषां मतम्। पूर्वे हि वैयाकरणाः, एतच्छास्त्रस्य मूलभूतं व्याकरणं कृतवन्तो हि ते। अथ पूर्वे विद्वांस इति विद्वदपेक्षं प्राथम्यं तेषाम्। प्रथमे हि वैयाकरणा इति प्रसिद्धेः। ते हि वेदाध्ययने ऐकश्रुत्यं विकल्पयन्ति—'विभाषा छन्दसि' इति। एतेन प्रातिशाख्यात् पूर्वं व्याकरणान्यासन् इति प्रतीयते। 'उदात्तो वाल्मीकेः' (तै० १८।६) वाल्मीकेर्मते प्रणव उदात्तः प्रयोक्तव्यः। 'ओकारं तु प्रणव एकेऽर्ध-तृतीयमात्रं ब्रुवते' (तै० प्रा० १८ सू० १) अध्ययनारम्भे ओङ्कार-प्रयोगात् तत्र य ओकारः सोऽर्धतृतीयमात्रः। अत्र 'ब्रुवते' इत्यात्मने-पदसत्त्वात् तेषामेकेषामेवार्धतृतीयमात्रतोपकरोति, नान्येषाम्। स्वमते तु त्रिमात्रः। वेदारम्भार्थे ओङ्कारघटक ओकार उदात्तानुदात्त-

ते हि वेदाध्ययने ऐकश्र्त्यं विकल्पयन्ति "विभाषाच्छन्दसि" इति। एतेन प्रातिशाख्यात् पूर्वं व्याकरणान्यासन्।

उदात्तो वाल्मीकेः (अ० १८।सू० ७६)। प्रणव उदात्तः, ओकारं तु प्रणव एकेऽर्धतृतीयमात्रं ब्रुवते (तै० प्रा० अ० १८। सू० १)। अध्ययनारम्भ ओङ्कारप्रयोगात् तत्र य ओकारः सोऽर्धतृतीयमात्रः। अत्र ब्रुवते इत्यत्रात्मनेपदसत्त्वात्तेषामेकेषामेवार्धतृतीयमात्रता उपकरोति नान्येषाम्। स्वमते तु त्रिमात्रः। वेदारम्भार्थे ओङ्कारघटक ओकार उदात्तानुदात्तस्वरितानामन्यतमे स्वरे प्रयोक्तव्य इति स्वरविकल्पं शैत्यायनो मन्यते। स्पर्शादनुत्तमादुत्तमपरादानुपूर्व्यान्नासिक्याः (तै० प्रा० अ० २१ सू० १२)। उत्तमव्यतिरिक्तेभ्यः प्रथमादिभ्यः स्पर्शेभ्य उत्तमपरेभ्यः परत आनुपूर्व्यात् प्रथमादयो नासिक्याश्चागमा भवन्ति। अत्राभिविधानादुत्तमपरात् परतो नासिक्यागमो न भवति, तस्य कार्यान्तरविधावविद्यमानवद्भावात्।

[1]तान् यमानेके (२१।१३)। तान् स्पर्शेभ्यः परान् नासिक्यान् एके आचार्याः शिक्षाकारा यमसंज्ञान् प्राहुः।

वर्गान्तं शषसैः सार्धमन्तस्थाभिश्च संयुतम्।
दृष्ट्वा यमा निवर्तन्ते सिंहं दृष्ट्वा यथा गजाः॥

(अत्यन्तं सूक्ष्ममुच्यते।)

स्वरितानामन्यतमे स्वरे प्रयोक्तव्य इति स्वरविकल्पं शैत्यायनो मन्यते। तथा च सूत्राणि–'उदात्तानुदात्तस्वरितानां कस्मिंश्चिदिति शैत्यायनः (तै० प्रा० अ० १८।५)। 'घृतः प्रचयः कौण्डिन्यस्य' (तै० १८।३) 'मध्यमेन वाक्प्रयोगः' (तै० १८।४)। 'स्वरितः प्लाक्षिप्लाक्षायण्योः' (तै० १८।५)।

१. यममेदाः = स्वरभेदाः। 'तत्रैकविंशतिर्यमाः' (२२।१२)।

ऊष्मप्रकृतिकात् स्पर्शात् पञ्चमः परतो यदि।
तत्र नैव यमापत्तिरिष्यते नात्र संशयः॥

वर्गान्तं शषसैः सार्धमित्यभिनिधानप्रयुक्तनासिक्यागमो निवर्त्यते। वर्गान्तमन्तस्थाभिश्च संयुतम् इत्यनेन अन्तस्थापरादुत्तमात् प्राङ् नासिक्यागमो निवर्त्यते। ऊष्मप्रकृतिकः स्पर्शः पूर्वस्य शकारस्य आदेशभूतः छकारः 'यच्छ्मश्रुणः' (स० २।१।१) इत्यत्रास्तीत्यत्रापि यमो निषिध्यते।

हकारान्नणमपरान्नासिक्यम् (२।१।१४)। हकारात् खलु नकारणकारमकारपरात् परतो नासिक्यागममेकेके आचार्या उपदिशन्ति। यमसंज्ञावादिभ्योऽन्ये वयमेवेति भावः। शिक्षाकारास्त्वेनं नासिक्यं नेच्छन्तीत्यनेन ध्वन्यते। नकारे परतो यथा 'अपह्नुत एवास्यै'। णकारे यथा प्रतिगृह्णातु। मकारे 'ब्रह्मवादिनः'। नन्वागमविधिर्नोपपद्यते प्रथमानिर्देशाभावात्। नैतदस्ति। अस्ति ह्यत्र प्रथमानिर्देशः 'आनुपूर्व्यान्नासिक्याः' (२।१।१२)। तेनास्मिन् प्रकरणे प्रथमाविधानमुपपद्यते। हकारादिति पञ्चमीनिर्देशश्चागमविधावेवोपपद्यते। यथा अघोषादूष्मणः परः (१४।९), स्पर्शादनुत्तमात् (२।१।१२)। अस्मिंस्तु सूत्रे द्वितीयानिर्देश एकशब्दान्वयार्थः। न त्वयं शब्दान्तरादेशः किन्न स्यात्? विकारिणोऽनुपदेशात्। सतो हि कार्यिणः कार्येण भवितव्यम्। असति तस्मिन् कस्यादेशः स्यात्। गुणविधिस्तु नैव घटते। गुणविकारिणो गुणशब्दस्य च प्रथमानिर्देशे हि गुणविधिर्भवति। यथा–पूर्वस्वरोऽनुनासिकः। (१५।१), समानाक्षराण्यनुनासिकानि (तै० प्रा० १५।६)। प्रकरणविरुद्धश्च। अत्र गुणविधिरागमाधिकारात्। न च स्वरितात् संहितायाम् (२।१।१०) इतिवद् गुणमात्रपर्यवसायिना शब्देन गुणविधिरिहाश्रयितव्यः, नासिक्यशब्दस्य गुणपर्यवसायितायोगात्। नासिकायां भवो वर्णो नासिक्यः। भावप्रत्ययान्तत्वे तु न रूपसिद्धिः। 'योपधाद् गुरुपोत्तमात्' इति वुञ्विधानात्। प्रज्ञादित्वकल्पनायामपि नात्र गुणविधिर्घटते, गुण-

विकारिणः षष्ठीनिर्देशाभावात् । तस्मादिह सूत्रशक्त्या वर्णान्तरागम-विधिनिश्चयाच्छिक्षायामनुक्तोऽपि पञ्चमो नासिक्योऽवश्याभ्युपगन्तव्यः। हकारस्य मकारान्तस्थापरस्योच्चारणे विशेषः शिक्षायां स्मर्यते—

न वायुं हमसंयोगे नासिकाभ्यां समुत्सृजेत्।
न वदेदुरसाऽत्यन्तं तथा यरलवेषु च॥

स्वरभक्तिरधुना प्रदर्श्यते–'रेफोष्मसंयोगे रेफः स्वरभक्तिः' (२।१।५)। गुणविधिरयम् , 'पूर्वस्वरोऽनुनासिकः' इत्यादिवत् प्रथमानिर्देशात्। न तु वर्णान्तरविधिः, द्वितीयानिर्देशाभावात्। रेफस्य ऊष्मणश्च निर्देशक्रमेण संयोगे सति रेफः स्वरभक्तिर्भवति। भज्यत इति भक्तिर्धर्मः। स्वरस्येव भक्तिर्यस्य स तथोक्तः। स्वरधर्मो भवतीति यावत्। केनाऽस्य स्वरेण साधर्म्यं विधीयते। योऽस्य सदृशतर ऋकारः। किमस्य तत्साधर्म्यम्? मात्रिकत्वं प्रधानता च। 'वैश्वव्यचसं वर्षाणि' (स० ४।३।२) 'वर्सं नह्यति' (२।५।७) इत्यादि। असंक्लिष्टोऽत्र रेफ उष्मणेति ह्रस्वकालादल्पतरेण कालेन न शक्यते प्रयोक्तुम्। न च व्यञ्जनयोर्मध्ये विरामोऽस्ति, अतोऽत्र रेफस्य मात्रिकत्वमवश्याभ्युपगन्तव्यम्। स्वप्रधानता तु क्वचिदवेष्यते, पूर्वाङ्गत्वविधानसामर्थ्यात्। न च स्वरसाधर्म्य-विधिर्मात्रिकत्वमात्रेण कृतार्थो भवति। तथात्वे हि मात्रिकत्वमेव साक्षाद् विधेयमिति स्वरसाधर्म्यमविधेयं स्यात्। तस्मात् स्वरभक्ते रेफस्य क्वचित् पूर्वाङ्गत्वं क्वचित् स्वप्रधानतेति द्वयं व्यवस्थितमाश्रीयते। तद्यथा—

स्वरात् परा स्वरभक्तिः स्वप्रधाना प्रकीर्तिता।
ऋतस्य धूर्षदं चेति स्वतन्त्रा भक्तिरिष्यते॥

अत्र पूर्वार्धेन पूर्वस्वरितनिमित्तं स्वरभक्तेः स्वातन्त्र्यमुच्यते। यत्र तु यद्दर्शपूर्णमासौ (स० १।६।७), दशरात्रमालभेत (२।१।४), धीतिभिर्हितः (सं० ४।२।७), यद्बार्हस्पत्यश्चरुः (सं० ५।६।५), यत्र तु

स्वरितः प्रतिषिध्यते नोदात्तस्वरितपरः (तै० १४।३१) इति, तत्र निमित्ताभावान्नैमित्तिकं स्वातन्त्र्यं न भवति। अन्नमिव खलु वै वर्षम् (सं० ५।४।९) इत्यादौ वनिमित्तं स्वातन्त्र्यमुच्यते। क्वचित् स्वरित-पूर्वकत्वेऽपि स्वातन्त्र्याभावः शिक्षायां स्मर्यते। (त्रिभा० रत्नम्, पृ० १५९) स्वरभक्तिस्वरूपं तु विशिष्टं व्याचष्टे वररुचिः—ऋकारादिरणु-मात्रा रेफोऽर्धमात्रा मध्ये शेषा स्वरभक्तिरणुमात्रा। अस्यायमर्थः—

इन्द्रियाविषयो योऽसावणुरित्युच्यते बुधैः।
चतुर्भिरणुभिर्मात्रा परिमाणमिति स्मृतम्॥

मात्रिकस्य ऋकारस्यादिरणुमात्रः स्वरभाग एतदकारस्वरूपम्।

अत्र ऋकारमध्यवर्तिनि रेफेऽर्धमात्रे विभज्यमाने सति तौ भागौ पूर्वोत्तराणुसहितौ प्रत्येकं स्वरभक्तिनामधेयौ। सा च स्वरभक्तिरर्धमात्रा।

वररुचिः—स्वरस्तावत् किं विशिष्ट इति चेत्? षोडशादितः स्वरा इति स्वरसंज्ञोक्ताः। तेषु स्वरेषु ऋकारेफयोः समानस्थानकरणत्वाद् ऋकारस्वरस्यैव भक्तिः। ऋकारस्तावत् किं विशिष्ट इति चेत्? 'ऋकार-ऌकारौ ह्रस्वौ' इति ह्रस्वत्वात् 'एकमात्रो भवेद्ध्रस्वः' इति एकमात्रिक ऋकारः। क्व का स्वरभक्तिरित्याशङ्क्य शिक्षाकारैरुक्तम्—

शषसेषु स्वरोदयां हकारे व्यञ्जनोदयाम्।
शषसेषु तु विवृतां हकारे संवृतां विदुः॥

यो वै श्रद्धामित्यादौ सूत्रोक्तक्रमाभावाद् न स्वरभक्तिः। स्वर-भक्त्यन्तरमपि शिक्षायामुक्तम्—

करेणुः कर्विणी चैव हरिणी हारितेति च।
हंसपदेति विज्ञेयाः पञ्चैताः स्वरभक्तयः॥

कीदृश्य एता इति चेत्—

करेणू रहयोर्योगे कर्विणी लहकारयोः।
हारिणी रशसानां च हारिता लशकारयोः॥

या तु हंसपदा नाम सा तु रेफषकारयोः।
एवं पञ्चविधां भक्तिमुच्चरेत् स्वर्गकामुकः॥

यथा करेणुः बर्हिः, कर्विणी 'मल्हाः', हारिणी 'दर्शपूर्णमासौ, हारिता 'शतवल्शाः', हंसपदा 'वर्षाभ्यः' इत्यादि।

शब्दः प्रकृतिः सर्ववर्णानाम् (२२।१)। अनेन वर्णात्मकानां शब्दानामुपादानकारणमुच्यते। अनादिनिधनो विभुरेकः शब्दो ब्रह्मव्यपदेशभाक् सर्वेषां वर्णानां प्रकृतिरुपादानकारणं भवति, स्तिमितवायुरिव तालवृन्तपवनानाम्। तेन वायुशरीरसमीरणादीनि पूर्वोक्तानि सर्वाणि कारणानि निमित्तान्येव भवन्ति।

तस्य रूपान्यत्वे वर्णान्यत्वम् (२२।२)। तस्य शब्दस्य अनुप्रदानादिभिः कारणैं रूपभेदे वर्णभेदः सम्पद्यते। तस्माच्छब्दं प्रयुञ्जानस्तत्सामान्यविशेषकारणैः पूर्वोक्तैः प्रयुञ्जीत।

आयामो दारुण्यमणुता रवस्येत्युच्चैः कराणि शब्दस्य (२२।९)। आयामो गात्राणामाकर्षणम्। दारुण्यं परुषता ध्वनेः। अणुता संवृतता कण्ठस्य। एतानि कारणानि शब्दमुच्चैः कुर्वन्ति=उत्क्षेपणं कुर्वन्ति। तत्रैषामुत्क्षिप्तो द्वितीयाख्यः स्वरः। उत्क्षिप्ततरः प्रथमाख्यः। उत्क्षिप्ततमः क्रुष्टाख्यः। एवमेते मूर्धप्रदेशे जायन्त इत्युच्चैःशब्दवाच्या भवन्ति। अत एवोक्तम् 'उच्चैरुदात्तः' (१।३८) इति।

अन्ववसर्गो मार्दवमुरुता रवस्येति नीचैः कराणि (२२।१०)। अन्ववसर्गो गात्राणां स्रंसनम्। मार्दवं ध्वनेः, उरुता विस्तीर्णता कण्ठस्येति। एतानि करणानि शब्दं नीचैः कुर्वन्तिः=अवक्षिप्तं कुर्वन्ति। अत्रेषदवक्षिप्तश्चतुर्थाख्यः स्वरः। अवक्षिप्ततरो मन्द्राख्यः। अवक्षिप्ततमोऽतिस्वर्यसंज्ञः। एवमेते हृदयप्रदेशे जायन्त इति नीचैःशब्दवाच्या भवन्ति। अत एवोक्तं 'नीचैरनुदात्तः' (१।३९)।

मन्द्रमध्यमतारणि स्थानानि भवन्ति (२२।११)। घृतादीनां स्वराणां त्रीणि स्थानानि भवन्ति मन्द्रमध्यमतारणीति। एतेषु स्थानेषु एकविंशतिर्यमभेदा भवन्ति। ब्रह्मयज्ञार्थम् आयामो दारुण्यम् (२२।९) इत्यादिलक्षणोपयोगार्थम्। ब्रह्मयज्ञस्य वाचकप्रयोगविषये उच्चैस्त्वमेवेष्यते, न तूपांशुत्वादिरन्तःकरणः। अहो मध्यमभागे तारस्थानेन ब्रह्मयज्ञः प्रयुज्यते।

स्वराद् दीर्घात् पदान्तस्थात् स्वरभक्तिस्तु या भवेत्।
साऽपि पूर्वस्वराङ्गं स्याद् दोषावस्तोर्हविष्मती॥ इति।

एतेन लकारस्याप्यूष्मपरस्यैवं स्वरभक्तित्वं प्रदर्शितं वेदितव्यम्, अध्ययनानुरोधात्, 'हारिता लशकारयोः', 'कर्तिणी लहकारयोः' इति शिक्षावचनाच्च। शतवल्शं वि शेह (सं १।१।२) इति। स्वधा नः सहस्रवल्शा वि वय ५ रुहेम (सं १।१।२), आदित्यां मल्हाम् (स० १।८।१९) इति पूर्वाङ्कता। मात्रिकत्वं तु समानम्। ये तु रेफलकारयोरत्र ऋकारार्धम् लकारार्धं चादेशमिच्छन्ति, तेषां विवृत्तिविरामः स्यात्। न च तत्तुल्यतागुणो विधीयत इति युक्तम्, तद्वाचकशब्दाभावात्, मात्राहान्योच्चारणेऽनुपपत्तिप्रसङ्गाच्च। प्रथमोत्तमयोस्तु भागयोर्मध्यं विनासन्नयोरर्धयोर्मध्यमस्थानेन तद्विप्रकृष्टयोर्मन्द्रस्थानेनेति विवेकोऽनुसन्धेयः।

ऋग्विरामस्त्रिमात्रः, पदविरामो द्विमात्रः, विवृत्तिविराम एकमात्रः, समानपदविवृत्तिविरामोऽर्धमात्रः इति। उदाहरणानि प्रातिशाख्यभाष्यतोऽवगन्तव्यानि (तै० प्रा० अ० २२ सू० १३)।

अथ वर्णविशेषोत्पत्तिः (तै० प्रा० अ० २३ सू० १)। यद्यपि पूर्वमेव वर्णविशेषोत्पत्तिक्रमः साधूपपादितोऽस्ति तथापि तेषां वर्णानां भेदः कया रीत्या भवतीति, बोधयितुमयमुद्यमः। तथाहि—

अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात्।
जायते वर्णवैशेष्यं परीमाणाच्च पञ्चमात्॥
(तै० प्रा० अ० २३सू० २)

अनुप्रदानं नादादि। संसर्गो वायुस्थानसंसर्गोऽभिघातात्मकः। स त्रिविधः—अयःपिण्डवत्, दारुपिण्डवत्, ऊर्णापिण्डवदिति। तदुक्तमापिशलशिक्षायाम्—स्पर्शयमवर्णकरो वायुरयःपिण्डवत् स्थानमापीडयति। अन्तस्थावर्णकरो वायुर्दारुपिण्डवत्। ऊष्मस्वरवर्णकरो वायुरूर्णापिण्डवदिति। स्थानं हनुमूलादि। करणम् ओष्ठादि। तस्य विन्ययो विविधस्पर्शनं स्पृष्टादि। एतेभ्यश्चतुर्भ्यो निमित्तेभ्यो वर्णस्य वैशेष्यम् असाधारणरूपं जायते। विशेष्यत इति विशेषस्तस्य भावो वैशेष्यम्। तथा परिमाणरूपात् पञ्चमाच्च कारणाद् वर्णवैशेष्यं जायते। परिमाणस्य पृथग्वचनं स्वराख्यवर्णमात्रविषयत्वख्यापनार्थम्। तेन व्यञ्जनानां ङकारानुस्वारादीनां कालभेदे वर्णान्यत्वं न भवति। एतेन द्वितीयाध्यायोक्तानामनुप्रदानादीनां द्वाविंशाध्यायोक्तं रूपान्यत्वं प्रति कारणत्वमुपदिशता 'तस्य रूपान्यत्वे वर्णान्यत्वम्' (तै० प्रा० अ० सू० २) इति साधु विवेचितम्। अनया रीत्या वर्णोत्पत्तिरुक्ता। वाक्योत्पत्तिरिदानीं प्रोच्यते।

वर्णपृक्तः शब्दो वाच उत्पत्तिः (तै० प्रा० अ० २१ सू० ३)। उच्चरितप्रध्वंसिभिः पूर्ववर्णैः पृक्तः संयुक्तोऽन्त्यवर्णात्मकः शब्दः पदवाक्यरूपाया वाच उत्पत्तिः। अयमत्र क्रमः—वर्णाः खलु पदवाक्यरूपस्य शब्दस्य कारणम्। तेषां तूच्चरितप्रध्वंसिनां तन्त्वादिवत् सहावस्थानायोगात् स्मृत्यारूढैः पूर्ववर्णैः संपृक्तोऽन्त्यवर्णः पदं वाक्यं च भवति। यैर्वाक प्रयुज्यते यस्मिंश्च तिष्ठति तत् स्थानम्, तानि च सप्त सन्ति। उपांशु इति प्रथमं वाचःस्थानम्, ध्वान इति द्वितीयम्, निमद इति तृतीयम्, उपब्दिमद् इति चतुर्थम्, मन्द्रम् इति पञ्चमम्, मध्यमम् इति षष्ठम्, तारम् इति सप्तमम्।

इदानीं प्रत्येकं लक्षणमुच्यते। प्रयत्नवद् नास्ति शब्दो ध्वनिरस्मिन् इत्यशब्दम्, नास्ति मनःप्रयोगोऽस्मिन्निति अमनःप्रयोगम्। वाचः स्थानमीदृशम् 'उपांशु' इत्युच्यते। अत्र मनःसद्भावेऽपि तस्य प्रयोगाभावात् कायाग्नेरभिघाताभावेन वायुसंसर्गाभावाच्छब्दो नोत्पद्यत इत्यशब्दत्वमुपपद्यते। परमशब्दमित्यनेन किं परग्राह्यस्य शब्दस्याभाव आहोस्वित् स्वग्राह्यस्यापि ? इति संशयस्य निरासार्थममनःप्रयोगमित्युच्यते। तत्र नञिव युक्तन्यायेन मनःप्रयोगसादृश्यावगमात् स्वयं ग्राह्यस्यापि शब्दस्याभाव इहाभिमत इति गम्यते। अमनःप्रयोगम् इत्यत्र प्रयोगशब्दस्वारस्याद् मनसा कायाग्निर्न हन्यत इत्यायाति।

करणवदशब्दं मनःप्रयोगमुपाँशु (तै० प्रा० अ० २३ सू० ६)। करणवदित्यनेन मनःप्रयोगो व्यावर्त्यते। अशब्दमित्यनेन ध्वानादेर्व्यावृत्तिः।

यत्राक्षराणां स्वराणां व्यञ्जनानां च अनुपलब्धिः केवलं शब्दोपलब्धिरेव न तु तत्र स्वरव्यञ्जनविवेकस्तत् खलु ध्वानसंज्ञम्।

यत्र स्थाने शब्दं प्रयुञ्जानोंऽक्षराणां स्वराणां व्यञ्जनानां च विवेकमुपलभते, तत् स्थानं निमदसंज्ञं भवति।

अक्षरव्यञ्जनानामनुपलब्धिध्वनिः (तै० प्रा० अ० २३ सू० ७)। यत्र प्रयुज्यमानः शब्दः परैरक्षरव्यञ्जनविवेकवर्जं श्रूयते तदुपब्दिमत्संज्ञं भवति।

यत्र स्थाने प्रयुज्यमानः शब्दः प्रयोक्तुरुरसि तिष्ठन्निव परैरुपलभ्यतेऽक्षरव्यञ्जनविवेकसंयुक्तं तन्मन्द्रसंज्ञं भवति। यत्र कण्ठे स्थाने प्रयोग उपलभ्यते तन्मध्यमं नाम षष्ठं वाचः स्थानम्। यत्र शिरसि स्थाने प्रयोग उपलभ्यते तत् तारं नाम वाचः स्थानम्। एतेष्वादितश्चतुर्णां यज्ञादिषु प्रयोगः। मन्द्रं प्रातःसवने प्रयुज्यते। मध्यमं माध्यन्दिने सवने। तारं तृतीयसवने।

उपलब्धिर्निमदः (तै० प्रा० २३।८), सशब्दमुपब्दिमत् (२३।९), उरसि मन्द्रम् (२३।१०), कण्ठे मध्यमम् । (२३।११), शिरसि तारम् (२३।१२) । उक्तं च शिक्षायाम्—

प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ।
माध्यन्दिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥
तारं तु विद्यात् सवने तृतीये शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वनानां तुल्येन नादेन शिरःस्थितेन ॥

ग्रन्थसमाप्तौ चतुर्विंशेऽध्याये चतसृणां संहितानां लक्षणानि प्रतिपादितानि । ताश्च संहिताः पञ्चमाध्यायमारभ्य षोडशाध्यायपर्यन्तं प्रतिपादिताः । तासां विशेषानुपयोगादत्र विचारः परित्यक्तः । समाप्तौ वैदिकाभरणकारो लिखति–"एतद्ग्रन्थनिष्णातैर्हि कृत्स्नस्य व्याकरणस्यार्थः सुगृहीतो भवति ।.....व्याकरणप्रधानत्वात् प्रातिशाख्यस्य" इति ।

अथ सामवेदानुसारं वर्णा निरूप्यन्ते ।

तत्र आचार्यः शाकटायन ऋक्तन्त्रव्याकरणाभिधं सामप्रातिशाख्यं प्रणिनाय । तद्दीत्या वाचां स्वरूपं वर्णांश्च प्रदर्शये । अधुना सहस्रवर्त्मनः सामवेदस्य सर्वाः शाखा नोपलभ्यन्तेऽतः प्रातिशाख्यान्यपि तानि नहि दृग्गोचरीभवन्ति । स एवायं शाकटायनो यो हि निरुक्ते यास्केन पाणिनिना वा गृहीतनामधेयः, अन्यो वेति विचारं परिहाय आत्मनोऽभीष्टं संस्कृतस्वनविज्ञानमेव प्रधानतया गृह्यते । अत्र सूत्रोपरि छाया भाष्यं टीका वा नावलम्ब्यते, तत्प्राप्त्यभावात् । नापि तदर्थो यत्नो विधातुमिष्यते, वैशिष्ट्यस्याभावात् । अतः केवलया सूत्ररीत्यैव व्यवहरिष्यते मया ।

अथ वाचो वृत्तिं व्याख्यास्यामः । वायुं प्रकृतिमाचार्याः । वायुमूछब्द्धासी भवन्ति । स्वासो नाद इति शाकटायनः । वायुरस्मिन् काये

मूर्च्छेत्यटतीत्येषोऽर्थः। स खलु रवविशेषं प्रतिपन्नः कण्ठं प्रतिपन्नः श्वसितिर्भवति। स श्वसितिः शिरः प्रतिपन्न आकाशमद्वारकं नदतिर्भवति। तस्येदानीं नदतेर्जिह्वाग्रेणेर्यमाणस्य व्यक्तयः प्रादुर्भवन्ति वर्णानामोष्ठ्याः कण्ठ्यास्तालव्या मूर्धन्या दन्त्या नासिक्या जिह्वामूलीया इति। तद्यथा त्रपुकारस्त्रपु विलाप्य बिम्बे निषिञ्चेद् यं यं बिम्बदेशं तत् त्रपु निषिच्यते ततस्ततो द्रव्याणां व्यक्तिर्भवति काञ्चिमणिके रुचकः स्वस्तिक इत्येवं यं यमयं रवविशेषं जिह्वाग्रेण स्पृशति ततस्ततो वर्णानां व्यक्तिर्भवत्योष्ठ्यानां कण्ठ्यानां तालव्यानां मूर्धन्यानां दन्त्यानां नासिक्यानां जिह्वामूलीयानामिति। [1]एवमुत्पन्नानां वर्णानामुपदेशोद्देशाः। उद्देशे संज्ञाकरणम्। उपदेशे प्रत्याहारः सिद्धस्तद्यथाऽध्वर्योरुपदेशं वक्ष्यामः। अथ वर्णाः संज्ञाप्रत्याहारसमाः।

अस्मिन् प्रथमे प्रपाठके किञ्चिद् वैचित्र्यं मे प्रतिभाति। यथा सू० 'अथ वाचो वृत्तिं व्याख्यास्यामः' (सू० १।१) इदमाद्यं सूत्रं प्रतीयते। तत्रादौ अथशब्दो मङ्गलप्रयोजनः प्रारम्भार्थकश्च। वाचो वृत्तिं व्याख्यास्याम इति वाक्यस्यायमर्थो मे प्रतिभाति—वाचो वृत्तिर्नाम वाचामुत्पत्तिः, कथं वागुत्पद्यत इत्यादि तदर्थः। वाचामुपादाननिमित्तकारणे व्याख्यास्याम इति तद्भावः। (सू० २) 'वायुं प्रकृतिमाचार्याः' इत्युक्तिवायुं साक्षात् शब्दानां प्रकृतिमभिधत्ते। एतदेव मतं वायुः खात् (य० १।६) शब्दस्तत् (य० १।७) सङ्करोप (य० १।८) स सङ्घातादीन् वाक् (य० १।९) इति सूत्रैर्यजुःप्रातिशाख्ये प्रतिपाद्यते। वायुरेव सम्यक् करणैरुपहितो हृदि वेणुशङ्खादिभिः शब्दीभवति। ऋक्प्रातिशाख्ये तु-वायुः प्राण ओष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा। आपद्यते श्वासतां

१. एवमुत्पन्नानां वर्णानामुपदेशोद्देशाः (सू० ८)। उद्देशे संज्ञाकरणम् (सू० ९)। उपदेशे प्रत्याहारः सिद्धः (सू० १०)। अथ वर्णाः संज्ञाप्रत्याहारसमाः (सू० ११)।

नादतां वा वक्त्रीहायाम् (ऋक् प्रा० १३।१), उभयं वान्तरोभौ (ऋक् प्रा० १३।२), ता वर्णानां प्रकृतयो भवन्ति (ऋक् प्रा० १३।३) एभिः सूत्रैः कण्ठविले विवृते श्वासत्वं संवृते नादत्वम् आपद्यते। स एव वायुः कण्ठविले नापि विवृते नापि संवृते किन्तु समे सति उभयं श्वासं नादं चापद्यते। ता एव श्वासनादोभयात्मिकास्तिस्रो वर्णानां प्रकृतयो भवन्ति। तथा च केचन श्वासप्रकृतयः, केचन नादप्रकृतयः, केचन तु उभयप्रकृतयः। इत्यादिभिर्ग्रन्थैः साक्षात् परम्परया वायुरेव शब्द इत्यायाति। तैत्तिरीयप्रातिशाख्यमते तु सूत्रे 'ता वर्णप्रकृतयः' (तै० २।७) इत्यनेनापि ता एव ऋक्प्रातिशाख्योक्ता वर्णानां प्रकृतयः। परं तैत्तिरीयप्रातिशाख्यभाष्यकृता तु शब्दस्य नित्यत्वमभ्युपगम्य वायोर्निमित्तकारणत्वमेव स्थिरीकृतम्। (सू० ३) 'वायुर्मूर्च्छन् श्वासीभवति' इति सूत्रयन् सूत्रकारः श्वासं नादं च वाचां प्रकृतिं मन्यते। अत एव 'श्वासो नाद इति शाकटायनः' (सू० ४) इत्यनेन शाकटायनस्यैव प्रातिशाख्यकारस्य मतेन श्वासं नादं च प्रकृतिं मन्यते। वायुरस्मिन् काये मूर्च्छति अटतीत्येषोऽर्थः। अयमंशस्तु वायुर्मूर्च्छन् श्वासीभवतीत्यस्यैव व्याख्यानम्। केनचिदयं भागः सूत्रेषु प्रक्षिप्त इति प्रतीयते। प्रातिशाख्यमते वायुः शब्द इति प्रसिद्धिः। अत एव "वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते। कैश्चिद् दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः॥" (वा० का० १ श्लो० १०८) इति वाक्यपदीये प्रातिशाख्यमतं संगृहीतम्। (सू० ५) 'स खलु खविशेषं प्रतिपन्नः कण्ठं प्रतिपन्नः श्वसितिर्भवति' अस्मिन्नपि सूत्रे (सू० ५) 'खविशेषं प्रतिपन्नः' इत्यस्य व्याख्यानं कण्ठं प्रतिपन्न इति सूत्रेषु कैश्चित् प्रक्षिप्तम्। स खलु वायुरटन् सन् श्वासरूपं धत्ते। श्वसितिर्भवतीत्यस्यायमेवार्थः। खविशेषं कण्ठमित्यनेन कण्ठस्य विवृतत्वं सूच्यते। स एव श्वासो यदा द्वारं प्राप्य अग्रे गच्छति, गत्वा च पुनरग्रे गमनेऽवकाशं नासादयति

तदा नादतां समश्नुते। अत एव 'स श्वसितिः शिरःप्रतिपन्न आकाशमद्वारकं नदतिर्भवति' इत्यस्मिन् सूत्रे (सू० ६) 'अद्वारकम्' इति विशेषणेन स्थानस्य संवरणं सूच्यते। आकाशमद्वारकम् इत्यस्य व्याख्यानं शिर इत्यासीत्। तदपि सूत्रेषु कैश्चित् प्रक्षिप्तम्। अद्वारकं नाम वायोर्निर्गमनद्वाररहितमिति तदर्थः। जिह्वाया अग्रभागेन प्रेर्य्यमाणो नादस्तत्तत्स्थानान्यभिहन्ति तत्र च स्थानगुणं लब्ध्वा ओष्ठ्यान् कण्ठ्यान् तालव्यान् मूर्धन्यान् दन्त्यान् नासिक्यान् जिह्वामूलीयांश्च वर्णाञ्जनयति, जिह्वाग्रेत्यत्राग्रशब्दो मध्यमूलादीनामप्युपलक्षकः। (सू० ७) 'तस्येदानीं नदतेर्जिह्वाग्रेणेर्यमाणस्य व्यक्तयः प्रादुर्भवन्ति वर्णानाम्' ओष्ठ्याः कण्ठ्यास्तालव्या मूर्धन्या दन्त्या नासिक्या जिह्वामूलीया इति। एतावदेव सूत्रम् 'तद् यथा' इत्यारभ्य जिह्वामूलीयानामितीत्यन्तो भागः सूत्रव्याख्यानभूतः सूत्रेषु प्रक्षिप्तः।

यथा त्रपुकारो मूषायां त्रपु विद्रुतं कृत्वा यस्मिन् बिम्बे प्रक्षिपति तस्य बिम्बदेशस्य यादृश आकारो भवति तादृशस्यैव द्रव्यस्य ततः प्रादुर्भावो भवति काञ्च्या मणिकस्य स्वस्तिकस्य रुचकस्येत्यादीनाम्। तथैवायं वक्त्रा यं यं कण्ठादीनामंशं जिह्वाया अग्रोपाग्रमध्यमूलादिभिः स्पृशति ततस्ततो वर्णानाम् ओष्ठ्यानां कण्ठ्यानां तालव्यानां मूर्धन्यानां दन्त्यानां नासिक्यानां जिह्वामूलीयानां चाभिव्यक्तिर्भवति। एवमुत्पन्नानां वर्णानामुपदेशोद्देशाः।

उद्देशे संज्ञाकरणम्। यथा—अ आ इ–इति समानानि, ए–औ इति सन्ध्यक्षराणि। अनया रीत्या तत्तद्वर्णसमूहानां संज्ञाः प्रदर्शयिष्यन्ते। सूत्रोपदेशे प्रत्याहारः सिद्धः (सू०१०)। वर्णानामुपदेशानन्तरं तत्रानुबन्धान् निक्षिप्य यावतां ग्रहणमपेक्ष्यते तदादिं वर्णमादीकृत्यानुबन्धं च तदन्ते संस्थाप्य प्रत्याहारः कल्पनीयः। तथा च वक्ष्यति 'प्रत्याहारार्थोऽनुबन्धो व्यञ्जनं यावतिथस्तावतां तदादीनां ततः पराणाम्' इति।

तद् यथाऽध्वर्योरुपदेशं वक्ष्यामः (सू० ११)। तथा च अध्वर्यो-र्वर्णानामुपदेशोऽग्रे प्रदर्शयिष्यते।

अथ वर्णाः संज्ञाप्रत्याहारसमाः (सू० १२)। एवं च उपदेक्ष्य-माणेषु वर्णेषु केषाञ्चिद् वर्णानां संज्ञाः करिष्यन्ते। केचन च वर्णा अनुबन्धैः सहिताः प्रत्याहाररूपमापन्ना अभीष्टान् वर्णान् बोधयेयुः। अपरे च यथावस्थिताः स्वरूपं समत्वेन बोधयिष्यन्ते। तत्रादौ वर्णान् उद्दिशति—

अ इति, आ इति, इ इति, ई इति, उ इति, ऊ इति, ऋ इति, ॠ इति, ऌ इति, ॡ इति, समानानि (सू० २।१) एते दश वर्णाः समानसंज्ञा वेदितव्याः।

ए इति, ऐ इति, ओ इति, औ इति सन्ध्यक्षराणि (वर्ग २ सू० २)। इमानि चत्वारि संध्यक्षरसंज्ञकानि भवन्ति, आपाहीवोयीनाम् गतिरन्त इति स्वराः (वर्ग० २ सू० ३)। अस्य सूत्रस्यार्थो बोद्धुं न शक्यते।

अथ व्यञ्जनानि—(वर्ग २ सू० ४)

किति, खिति, गिति, घिति, ङिति कवर्गः। (वर्ग २ सू० ५)
चिति, छिति, जिति, झिति, ञिति चवर्गः। (वर्ग २ सू० ६)
टिति, ठिति, डिति, ढिति, णिति टवर्गः। (वर्ग २ सू० ७)
तिति, थिति, दिति, धिति, निति तवर्गः। (वर्ग २ सू० ८)
पिति, फिति, बिति, भिति, मिति पवर्गः। (वर्ग २ सू० ९)
इति स्पर्शाः। (वर्ग २ सू० १०)

अथान्तस्था (वर्ग २ सू० ११)।

यिति, रिति, लिति, विति, इत्यन्तस्थाः (वर्ग २ सू० १२)।

अथोष्माणः (वर्ग २ सू० १३)।

हिति, शिति, षिति, सिति योगवाहाः। (वर्ग सू० १४)

अकारादयः सान्ता योगवाहा भवन्ति। वर्णसाम्नाये एषां योगसत्त्वादेते योगवाहा भवन्ति।

अथायोगवाहाः। (वर्ग २ सू० १२)

अः इति विसर्जनीयः। (वर्ग २ सू० १३)

× क इति जिह्वामूलीयः। (वर्ग २ सू० १४)

× प इत्युपध्मानीयः। (वर्ग २ सू० १५)

'हुँ' इत्यनुनासिकः (वर्ग २ सू० १६)। अत्र हुँ इति नासिक्य इत्ययं पाठः साधुर्भवेत्।

अथ यमाः। (वर्ग २ सू० १७)

कुँ इति, खुँ इति, गुँ इति, घुँ इति, इति यमाः। (वर्ग २ सू० १८)

अनन्त्यानन्त्यसंयोगे मध्ये यमः पूर्वगुणः (वर्ग० २ सू० १९)।

अनन्त्यानां विंशतेः स्पर्शानाम् अन्त्यैः पञ्चभिः स्पर्शैर्योगे मध्ये पूर्ववर्णसदृशो वर्णो यमसंज्ञो वेदितव्यः। एतद्विषयको विचारस्तत्तत्प्रातिशाख्यप्रकरणे कृतः। विशेषतस्तु यमविचारः पृथगेव मया लिखितः। तथा च नारदः—

अनन्त्यश्च भवेत् पूर्वोऽन्त्यश्चापि परतो यदि।
तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः॥ (२।१ श्लो०८)

द्विरुक्तत्वापेक्षया पूर्ववर्णयोरिति ज्ञेयम्, यत्र द्विरुक्तिर्नास्ति तत्र तु एकस्यैव सवर्णः।

अथानुस्वारौ। (वर्ग० २ सू० २०)

अं, आँ इत्यनुस्वारौ। (वर्ग ३ सू० २१)

अनुस्वारविषयेऽपि वर्तते महान् विवादः। अनुस्वारं केचनागमं मन्यन्ते, केचन तु आदेशम्। तैत्तिरीयप्रातिशाख्यमते त्वनुस्वारो व्यञ्जनमेव "अनुस्वारोऽप्युत्तमवद् व्यञ्जनमेव अस्मच्छाखायाम्,

अर्धगकाररूपत्वात्। एवं चैतन्मते अनुस्वारश्च (तै० प्रा० १।३५) इति सूत्रबलादेकमात्रोऽनुस्वारः।

अनुस्वारो व्यञ्जनं वा स्वरो वा (ऋक् प्रा० प० १।१।५) इति शौनकप्रातिशाख्यमतेन, "सत्यमेतद् यदि नामानुस्वारस्य स्वरूपं न कथितं स्यात्। तस्मात् स्वरव्यञ्जनातिरिक्तमन्यद् वर्णान्तरमेतदित्येतत् ख्यापनपरमेवैतत्सूत्रमिति सिद्धान्तितम्" इति तद्भाष्योक्त्या च अनुस्वारो वर्णान्तरमेव। 'अं आं इत्यनुस्वारौ' इति सूत्रानन्तरं ह्रस्वादीर्घो दीर्घाद्ध्रस्व इति सूत्रेण एकमात्रो द्विमात्रश्च अनुस्वार इति सिद्ध्यति।

ह्रस्वादीर्घो दीर्घाद्ध्रस्वः। (वर्ग ३ सू० १)

अस्यार्थः पूर्वमेव स्फोरितः।

वर्ण इति पूर्वः कारादाख्यायाम्। (वर्ग ३ सू० २)

वर्णा अत्र स्वरा एष्टव्याः, कारात् पूर्वो वर्णस्तस्य वर्णस्य आख्याने समर्थो भवति यथा अकारः, इकार इत्यादि।

व्यञ्जनमकारपूर्वात् (वर्ग ३ सू० ३)। अकारपूर्वात् काराद् व्यञ्जनं प्रत्येतव्यम्। ककारो गकार इति यथा।

रिति रेफात्। (वर्ग ३ सू० ४)

अत्र एफादिति पाठः क्वचित्। वस्तुतस्तु रेफात् 'र्' इति प्रतीयात्। अर्थाद् अपूर्वात् काराद् व्यञ्जनं प्रत्येतव्यमिति रकार इति प्राप्तः प्रयोगो रिति रेफादित्यनेन निषिध्य रेफशब्दाद् 'र्' इति प्रतीयादित्यर्थः।

इदानीं वर्णानां करणं निर्दिश्यते।

स्पृष्टं करणं स्पर्शानाम्। (वर्ग ३ सू० ५)

कादिमान्तानां वर्णानां स्पृष्टं करणं वेदितव्यम्। 'येन स्पर्शयति तत् करणम्' (तै० प्रा० अ० २।३४) इति तैत्तिरीयप्रातिशाख्योक्तं करणलक्षणं बोद्धव्यम्।

दुस्पृष्टमन्तस्थानाम्। (वर्ग ३ सू० ६)

अथान्तस्था इत्यनेन यरलवानामन्तस्थसंज्ञा विहिता। तेषां दुस्पृष्टं करणं विज्ञेयम्। 'दुस्पृष्टं तु प्राग्धकाराच्चतुर्णाम्' (ऋक् प्रा० १३।१०) इति सूत्रेणैतत् संवदते।

विवृतं स्वरोष्मणाम्। (वर्ग ३ सू० ७)

स्वराणाम् ऊष्मणां च विवृतं करणं वेदितव्यम्। 'नाज्झलौ' (पा० १।१।१०) इति सूत्रयन् भगवान् पाणिनिरिदं सूत्रमात्मपक्षपोषकत्वेन सूचयति।

विवृततरमकारैकारौकाराणाम्। (वर्ग ३ सू० ८)

अकारस्य ऐकारौकारयोश्च विवृततरं करणं विज्ञेयम्। एतत् प्रातिशाख्यमते ह्रस्वाकारस्यापि विवृततरत्वम्। एतदुच्चारणं प्रायो हि गौडाः कुर्वन्ति। पाणिनीयमते ह्रस्वाकारस्य संवृतत्वम् संवृतो घोषवान् (वर्ग ३ सू० ९)

एतच्च युक्तियुक्तम्। संवृते हि स्थाने घोष उत्पद्यते, ततश्च नादोऽनुप्रदीयते। एवं च हशः संवारा नादा घोषाश्चेति सिद्ध्यति।

विवृतोऽघोषः (वर्ग० ३ सू० १०)। एतावानेव सूत्रपाठो युक्तः। 'नादानुप्रदानाः स्वरघोषवन्तः' एतच्च पृथक् सूत्रं मन्तव्यम्। 'संवृतो घोषवान्' इति सूत्रेण सह नादानुप्रदाना इत्यस्य संबन्धः संघटते। तथैव विवृतोऽघोष इत्यस्य श्वासोऽघोषाणामित्यनेन सह संबन्धो बोद्धव्यः। तथा च संवृता घोषवन्तो नादानुप्रदानाः। विवृताः श्वासा अघोषाश्चेति साधु संघटते।

नादानुप्रदानाः स्वरघोषवन्तः। (वर्ग ३ सू० ११)

स्वरा घोषवन्तश्च ये वर्णास्तेषूच्चार्यमाणेषु नादोऽनुप्रदीयत इति स्वरा घोषवन्तश्च वर्णा नादानुप्रदाना मन्तव्याः।

श्वासोऽघोषाणाम्। (वर्ग ३ सू० १२)

एवं च विवृते स्थाने विवारः प्रयत्नस्तदा केवलं श्वसनं भवति, अघोषश्च जायते। अत एवोक्तम्—"खरो विवाराः श्वासा अघोषाश्च" इति।

तनीयान् प्रथमानाम्। (वर्ग ३ सू० १३)

प्रथमानाम्=वर्गाणां ये प्रथमास्तेषां तनीयान् प्राणः, अल्पप्राणास्ते इति विज्ञेयम्। परमत्र तृतीयपञ्चमानामल्पप्राणो महाप्राणो वेति नोक्तम्।

उभौ हचतुर्थानाम्। (वर्ग ३ सू० १४)

हकारस्य वर्गचतुर्थानां च वर्णानाम्, उभौ श्वासनादावित्यर्थः। एतेन महाप्राणा एत इति ज्ञायते।

संनिवेशोऽन्यः प्रत्याहारार्थः। (वर्ग ३ सू० १५)

अर्थाद् यदा प्रत्याहारार्थं यत्नः क्रियते, वर्णानां सन्निवेशोऽन्यप्रकारेण कर्तव्यः।

वर्णोऽनुबन्धो यावतिथस्तावतां तदादीनां ततः पराणाम्। (व० ३ सू० १६)

यावतिथोऽनुबन्धस्तावतां तदादीनाम्, ततः पराणाम्=आद्यानां मध्यस्थानां च बोधः प्रत्याहारद्वारा भवतीत्यर्थः। तदर्थं च वर्णक्रममन्यथोपादास्यति 'ए ओ' इत्यादिना सूत्रेण। परमस्मिन् प्रातिशाख्ये एकमपि सूत्रं तादृशं नास्ति, यत्र हि प्रत्याहारप्रयोगो लब्धास्पदो भवेत्। एतेन एतत्सर्वं यस्य पार्षदस्य कृते ग्रथितं तत्रेदं प्रतिभाति। पूर्वं यो हि पाठः प्रदर्शितः, स हि विशुद्धो न प्रतीयते। अतः शुद्धं तद्दर्शयामि।

अथ वाचोवृत्तिं व्याख्यास्यामः। (वर्ग १ सू० १)

वायुं प्रकृतिमाचार्याः। (वर्ग १ सू० २)।

वायुर्मूर्छन्श्वासी भवति। (वर्ग १ सू० ३)

श्वासो नाद इति शाकटायनः। (वर्ग १ सू० ४)

स खलु खविशेषं कण्ठं प्रतिपन्नः श्वसितिर्भवति। (वर्ग १ सू० ५)

स श्वसितिः शिरः प्रतिपन्न आकाशमद्वारकं नदतिर्भवति। (वर्ग १ सू० ६)

तस्येदानीं नदतेर्जिह्वाग्रेणेर्यमाणस्य व्यक्तयः प्रादुर्भवन्ति वर्णानाम् ओष्ठ्याः कण्ठ्यास्तालव्या मूर्धन्या दन्त्या नासिक्या जिह्वामूलीया इति। तद्यथा त्रपुकारस्त्रपु विलाप्य बिम्बे निषिञ्चेद् यस्मिन् यस्मिन् बिम्बदेशे तत् त्रपु निषिच्यते ततस्ततो द्रव्याणां व्यक्तिर्भवति कश्चिद् मणिको रुचकः स्वस्तिक इत्येवं यं यमयं रवविशेषं जिह्वाग्रेण स्पृशति ततस्ततो वर्णानां व्यक्तिर्भवति, ओष्ठ्यानां कण्ठ्यानां तालव्यानां मूर्धन्यानां दन्त्यानां नासिक्यानां जिह्वामूलीयानामिति। (वर्ग १ सू० ७)

एवमुत्पन्नानां वर्णानामुपदेशोद्देशाः। (वर्ग १ सू० ८)

उद्देशे संज्ञाकरणम्। (वर्ग १ सू० ९)

उपदेशे प्रत्याहारः सिद्धः। (वर्ग १ सू० १०)

तथाध्वर्योरुपदेशं वक्ष्यामः। (वर्ग १ सू० ११)।

इति प्रथमो वर्गः॥

अथ वर्णाः संज्ञाप्रत्याहारसमाः। (वर्ग २ सू० १)

अ इति, इ इति, ई इति, उ इति, ऊ इति, ऋ इति, ॠ इति, ऌ इति, ॡ इति समानानि। (वर्ग २ सू० २)

ए इति, ऐ इति, ओ इति, औ इति सन्ध्यक्षराणि। (वर्ग २ सू० ३)

किति खिति गिति घिति ङिति कवर्गः। (वर्ग २ सू० ४)

चिति छिति जिति झिति ञिति चवर्गः। (वर्ग २ सू० ५)

टिति ठिति डिति ढिति णिति टवर्गः। (वर्ग २ सू० ६)

तिति थिति दिति धिति निति तवर्गः। (वर्ग २ सू० ७)

पिति फिति बिति भिति मिति पवर्गः। (वर्ग २ सू० ८)

इति स्पर्शाः। (वर्ग १ सू० ९)

अथान्तःस्थाः। (वर्ग २ सू० १०)

यिति रिति लिति विति अन्तःस्थाः। (वर्ग २ सू० ११)

अथोष्माणः। (वर्ग २ सू० १२)

हिति शिति षिति सिति ऊष्माणः। (वर्ग २ सू० १३)
योगवाहाः। (वर्ग २ सू० १४)
अथायोगवाहाः (वर्ग २ सू० १५)
अः इति विसर्जनीयः। (वर्ग २ सू० १६)
× क इति जिह्वामूलीयः। (वर्ग २ सू० १७)
× प इत्युपध्मानीयः। (वर्ग २ सू० १८)
हुँ इति नासिक्यः। (वर्ग २ सू० १९)
हिँ इत्यनुनासिकम्। (वर्ग २ सू० २०)
अथ यमाः। (वर्ग २ सू० २१)
कुँ इति खुँ इति गुँ इति घुँ इति यमाः। (वर्ग २ सू० २२)
अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः। (वर्ग २ सू० २३)
अथानुस्वारौ। (वर्ग २ सू० २४)
ह्रस्वादीर्घो दीर्घाद्ध्रस्वः। (वर्ग २ सू० २५)।
इति द्वितीयो वर्गः॥
वर्ण इति पूर्वः कारादाख्यायाम्। (वर्ग ३ सू० १)
व्यञ्जनम् अकारपूर्वात्। (वर्ग ३ सू० २)
रिति रेफात्। (वर्ग ३ सू० ३)
स्पृष्टं करणं स्पर्शानाम्। (वर्ग ३ सू० ४)
ईःस्पृष्टमन्तःस्थानाम्। (वर्ग ३ सू० ५)
विवृतं स्वरोष्मणाम्। (वर्ग ३ सू० ६)
विवृततरम् अकारैकारौकाराणाम्। (वर्ग ३ सू० ७)
संवृतो घोषवान्। (वर्ग ३ सू० ८)
विवृतोऽघोषः। (वर्ग ३ सू० ९)
नादानुप्रदानाः स्वरघोषवन्तः। (वर्ग ३ सू० १०)[1]

१. स्वरान्तःस्थोत्तमानामकारघोषाणां हकारस्तु घोषवतामघोषाणां सोष्मणामूष्मणां च। प्रत्याहारे रहयोर्वर्गसंज्ञानुस्थानानामसिद्धिरिति चेद्ध्रस्वतर-

श्वासोऽघोषाणाम्। (वर्ग ३ सू० ११)
लघीयान् प्रथमानाम्। (वर्ग ३ सू० १२)
उभौ हचतुर्थानाम्। (वर्ग ३ सू० १३)

इति तृतीयो वर्गः॥

सन्निवेशोऽन्यः। (वर्ग ४ सू० १)
प्रत्याहारार्थो वर्णोऽनुबन्धो व्यञ्जनं यावतिथस्तावतां तदादीनां ततः पराणाम्। (वर्ग ४ सू० २)

ए ओ ऐ औ आ ऋ ऌ ई ऊ ॠ ॡ इ उ आः। (वर्ग ४ सू० ३)
रयवलाः। ङञणनमाः। घझढधभाः। गजडदबाः। खछठथफाः। कचटतपाः। हशषसाः। अः ५ क ५ पः। हुँ कुँ खुँ गुँ घुँ अं आं। एवमुपदेशे स्वराणां सन्ध्यक्षराणां दीर्घाणां ह्रस्वानां समानानाम् अन्तःस्थानाम् उत्तमानाम्।

अथ द्वितीयः प्रपाठकः—
मासे यथा दृष्टः॥१॥ (समासे इति पाठः)
वर्णोऽधिकृतः। समासे यथा दृष्टस्तथा विज्ञेयः। अपूर्वेयं प्रक्रिया। सूत्रे 'मासे' इत्यस्य समासे इति व्याख्या कृता। वस्तुतस्तु 'समासे' इत्येव पाठ आसीत्। लेखकेन 'स'शब्दो भ्रान्त्या न लिखितः।
हाः कण्ठे (प्र. २ सू. २)

नासिक्यस्थानेषु मात्राकरणं विशिष्टानामपि प्राप्तिस्तथा सिद्धमिति। इदमक्षरं छन्दो वर्णशः समनुक्रान्तम्। यथाचार्या ऊचुः—ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्विमं वर्णसमाम्नायमित्याचक्षते। न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति च।

हकारः, अकारः, आकारः, विसर्जनीयश्च कण्ठस्थाना वेदितव्याः। उरसि विसर्जनीयो वा। (प्र० २।१।३)

अथवा विसर्जनीयस्य उरःस्थानं विज्ञेयम्।

जिह्वामूले ५ कु। (प्र० २।१।४)

जिह्वामूलीयः, कवर्गः, ऋकारः, ऋकारश्च जिह्वामूलस्थाना भवन्ति, वर्गाद्यग्रहणे वर्गग्रहणं वेदितव्यमिति हि वक्ष्यति 'स्पर्शे वर्गस्य' (प्र० २ सू० १३) इति सूत्रे। यद्यपि तत्र 'स्पर्शे र्गस्येति' लिखितम्, तथाप्याद्याक्षरलोपेन तथा जातम्। आद्याक्षरस्य लोपो ज्ञानेनाज्ञानेन वा जात इति विचार्यम्।

तालुनि इच्ये[1]। (प्रथमो दशकः सू० ५)

तालुस्थानाः शकारचवर्गयकारा इकार ईकार एकारश्च वेदितव्याः। अत्र सूत्रे भाष्येऽपि ऐकारस्य स्थाननिर्देशो न कृतस्तथापि सोऽप्यत्रैव बोध्यः, यतो हि ताभ्यां सूत्रभाष्यकाराभ्याम् औकारस्य स्थानमेव निर्दिष्टम्।

षकारः, टवर्गश्च मूर्धस्थानौ ज्ञेयौ।

दन्ते त्लाः। (प्र० २।१।७)

दन्तस्थानास्तवर्गसकारलकारा बोद्धव्याः।

रेफो मूले वा। (प्र० २।१।८)

रेफस्तु दन्ते दन्तमूले वा उच्चारणीयः।

ओष्ठ्यो वो ५ पू[2]। (प्र० २।१।९)

ओष्ठस्थाना वकार ओकार औकार उकार ऊकार उपध्मानीयः पवर्गश्च ज्ञेयाः।

---

१. वस्तुतस्तु तालुनि 'इच्ये' इत्यस्य स्थाने 'इच्ययै' इति पठनीयम्। तत्र शकारः, चवर्गः, इ, ई, ए, ऐ एते तालुस्थाना वेदितव्या इति भाष्यं लेख्यम्।

२. अत्रापि 'ओष्ठ्यं ववौ ५ पू' इति लेख्यम्। तथा च भाष्यं संगतं भवेत्।

किटकिडाकारो हन्वाम्। (प्र० २।१।९)

किटकिडाकारो हन्वां तिष्ठति। कोऽयं किटकिडाकार इति विज्ञेयम्।

अविशेषस्थानौ संस्वादनिगारौ (प्र० २।२। सू० १)

पकारनकारयकाराः संस्वादे। ह्कारमकारनासिक्या निगारे। तथा चैतौ संस्वादनिगारौ अविशेषस्थानौ वेदितव्यौ।

नासिकायां यमानुस्वारनासिक्याः। (प्र० २ अ०)

यमानाम् अनुस्वारयोश्च नासिकास्थानं विज्ञेयम्।

स्पर्शे र्गस्य। (प्र० २।२।३)

अत्र वर्गस्येति बोध्यम्। स्पर्शग्रहणे वर्गस्य ग्रहणं बोध्यम्।

'स्थानेषु' इत्यधिकारः। अर्थात् स्थाननिर्देशे यत्र स्पर्शस्य ग्रहणं नाम स्पर्शाद्यग्रहणे सम्पूर्णस्य वर्गस्य ग्रहणं वेदितव्यम्। यत्र ककारः, तत्र सर्वः कवर्गः, यत्र चकारस्तत्र सर्वश्चवर्गो ज्ञेयः।

उत्तमा घोषाः। (प्र० २।२।४)

अत्रापि वर्गस्येत्यधिकारः। प्रत्येकं वर्गस्योत्तमा नाम अन्त्यास्त्रयो वर्णा घोषा वेदितव्याः।

हान्तःस्थाः। (प्र० २।२।५)

हकारोऽन्तःस्थाः पकाररेफलवाश्च घोषसंज्ञा भवन्ति। इतोऽतिरिक्ता वर्गाणां प्रथमद्वितीया ऊष्माणः, शषसहाश्च अघोषा विज्ञेयाः। घोषाणां लक्ष्येषु निर्धारितेषु ततो भिन्नानामघोषत्वमर्थात् सिद्धम्।

युग्माः सोष्माणः। (प्र० २।२।६)

वर्गस्येत्यधिकारः। वर्गस्य युग्माः सोष्माणो भवन्ति। ते च खछठथफाः, घझढधभा इति।

अन्त्योऽनुनासिकः। (प्र० २।२।७)

वर्गाणामन्त्यो वर्णोऽनुनासिकसंज्ञो भवति। ते च ङञणनमाः।

साक्षरः पदान्तोऽवसितः। (प्र० २।२।८)

साक्षर इत्यस्य समानाक्षर इत्यर्थः। नामैकदेशग्रहणे नाममात्रस्य ग्रहणमिति न्यायात्। समानानि समानसंज्ञकान्यक्षराणि यस्मिन् एवंभूतः पदान्तोऽवसानस्थोऽनुनासिको भवतीत्यर्थः। दधि मधु त्रपु गुरु पटु मृदु इत्यादीन्युदाहरणानि। मन्त्रे—अग्ने आयाहि। समानाक्षर इति किम्? अग्ने (१।१)। पदान्तोऽवसित इति किम्? संहितायां मा भूत्। यद्यप्यवसानस्थ इति कथनेनापि संहितायां वारणमर्हति, तथापि विस्पष्टार्थं तदुक्तिः। संहितायां तु अवसानस्थत्वं भवेदेव नहि।

येकवचने। (प्र० २।२।९)

ईकारस्य एकवचने विषये विकल्पेन अनुनासिको भवति। स्त्री-ब्राह्मणी-वृषली-प्रभृतीन्युदाहार्याणि निवृत्तानि। इन्द्राग्नी (१।२८१), द्यावापृथिवी (१।३२६), रोदसी (१।२७८) अत्र एकवचनाभावान्न जातम्। परमत्र भाष्ये—'इन्द्राग्नी' इत्यादीनि त्रीणि स्थानानि लिखित्वा तदग्रे न जातमिति लिखितम्। तस्य कोऽर्थः? तत्रानुनासिकत्वं न जातमिति तु स्थिरमेव, परं कथमत्रानुनासिकत्वाभावो भाष्यकाराभिमतः। किं विधेर्वैकल्पिकत्वेन? उताहो एकवचनत्वाभावत्वेन? तत्रैकवचनत्वाभावस्तु स्थापयितुं शक्यते, 'इन्द्राग्नी' इत्यत्र द्विवचनत्वस्यैव सत्त्वात्। परमेकवचनत्वाभावप्रयुक्तानुनासिकत्वाभावस्तु नहि युक्तियुक्तः, एकवचने किमित्यस्य 'गच्छन्त्यमी' इत्यादिप्रत्युदाहरणस्यैव दत्तत्वात्। एकवचनत्वाभावेन विधेरप्राप्त्या वैकल्पिकत्वशङ्काया दूरापास्तत्वान्न प्रथमः पक्षः। तस्मादत्रोच्यते—स्त्री-ब्राह्मणी-वृषली-प्रभृतीन्युदाहरणानि लौकिकानि, वैदिकानि निवृत्तेरुदाहरणानि एकवचनत्वाभावप्रयुक्तानि इन्द्राग्नी-प्रभृतीनि। गच्छन्त्यमी, धावन्त्यमी, भुञ्जन्त्यमी—इमानि प्रत्युदाहरणान्येकवचनत्वाभावप्रयुक्तानि। साक्षी, दाक्षी, काकी, पौष्णी—इमानि द्विवचनान्तानि। साक्षस्यापत्यम्, दक्षस्यापत्यम्, काकस्यापत्यम्,

पौष्णस्यापत्यमित्यर्थे इञन्तानि द्विवचनान्तानीमानि। यदा तु स्त्रीलिङ्गानि तदा तु भवत्येवात्रानुनासिकत्वम्। इन्द्राणी, शाकटायनी, इत्यत्रापि भवत्यनुनासिकत्वम्।

व्यञ्जनं पूर्वस्यान्तस्वरम् (प्र० २।२।१०)

व्यञ्जनं खलु पूर्वस्य स्वरस्यान्तस्वरं भवति। यदिन्द्रप्राक्।

अथ तृतीयो दशकः

अभिनिधानः। (प्र० २।३।१)

क्रमजं पूर्वान्तसस्वरं भवति। अर्कम्। (१।१५८)

व्यञ्जने। (प्र० २।३।२)

पदान्ते व्यञ्जनमित्यधिकारः। व्यञ्जने परे पदान्ते व्यञ्जनं पूर्वान्तसस्वरं भवति, व्यञ्जनमिति किम्? तमिन्द्रादीनि (१।११९)। पदान्ते किम्? अपघ्नन् (१।५१०)।

अनुस्वारौ च (प्र० २।३।३)

अनुस्वारौ पूर्वान्तसस्वरौ भवतः। त्रिंशत्पदा (१।२८१), अपां रेतांसि (१।२७)।

ह्रस्वाद्ध्रस्वो दीर्घादीर्घः। अन्यान्युदाहरणानि प्रातिशाख्ये द्रष्टव्यानि।

रलावव्यपरौ। (प्र० २।३।४)

अवकारयकारपरौ रलौ पूर्वान्तसस्वरौ भवतः। अर्कस्य देवाः, स्पर्धन्ते (१।५३९) प्रभृतीनि। शुल्का (१।२९१) इत्यादीनि। अव्यपराविति किम्? प्रहोत्रे पूर्व्यम् (१।९८), स्या अरातेः (१।६) इत्यादीनि।

स्पर्शः स्वे। (प्र० २।३।५)

स्पर्शः स्पर्शे परे पूर्वान्तसस्वरो भवति। सख्यन्ते (१।३२४) अत्र स्पर्शो नकारः परसवर्णजः स्वे तकारे परे पूर्वान्तसस्वरो भवति। अत्र बहून्युदाहरणानि विचार्याणि सन्ति।

रादिरमन्यत् ('परादिस्वरमन्यत्' इति पठनीयम्)। (प्र०२।३।६)

इतो भिन्नं परादिस्वरं भवति ।

सयुग् रुक् । (प्र० २।३।७)

संयुक्तं व्यञ्जनं संयोगसंज्ञं भवति । चिन्तम् (२।१२०९)

मात्रार्धमात्रा वा । (प्र० २।३।५८)

व्यञ्जनम् इत्यधिकारः । मात्रा अर्धमात्रा वा भवति व्यञ्जनम् ।

तिश्च त्रिकला वा । (प्र० २।३।५८)

अत्र सूत्रे 'गतिश्च' इत्यपि पाठः । एतेन 'रादिरमन्यत्' इत्यादि-सूत्रेषु 'परादिपरमन्यत्' इत्याद्येव पाठः । लेखकेन भ्रान्त्या तथा लिखितम् । गतिश्च त्रिकला भवति ।

सन्ध्याद्यश्च···(२।३···)

सन्ध्याद्यश्च वर्णस्त्रिकलो भवति । एकारौकारयोः ।

अथ चतुर्थो दशकः

द्रुतायां मात्रा । (प्र० २।४।१)

द्रुतायां वृत्तौ मात्रा त्रिकला भवति ।

चतुष्कला मध्यमायाम् । (प्र० २।४।२)

मध्यमायां वृत्तौ मात्रा चतुष्कला भवति ।

पञ्चकला विलम्बितायाम् । (प्र० २।४।३)

विलम्बितायां वृत्तौ मात्रा पञ्चकला भवति । अयमेव पक्ष ऋक्-प्रातिशाख्यभाष्ये (प० १३ सू० ४८) 'चतुर्भागाधिका भवन्तीत्येके' इत्यनेन प्रतिपादितोऽस्ति ।

वर्णान्तरं परमाणु । (प्र० २।४।४)

द्वयोर्वर्णयोरुच्चारणे मध्ये परमाणुमात्रं व्यवधानं भवति । तत्कलार्धम् ।

स्वरयोरर्धमात्रा । (प्र० २।४।५)

स्वरयोरन्तरम् अर्धमात्रा भवति ।

विरामे मात्रा । (प्र० २।४।६)

विरामे अन्तरं मात्रिकं भवति । तच्च अवसाने ।

नित्यविरते द्विमात्रम् । (प्र० २।४।७)

नित्यविरते द्विमात्रमन्तरं भवति । अर्धर्चान्तर्गतेषु ।

गाथासु । च (२।४।८)

गाथासु च द्विमात्रमन्तरं (नित्यविरते) भवति । "ये नौभिः प्रतरन्ति काश्मीराः सलिलम्" इत्यादीनि ।

त्रिमात्रं सामसु । (२।४।९)

त्रिमात्रमन्तरं सामसु वेदितव्यं भक्त्यन्तेषु ।

अकालो ह्रस्वः । (२।४।१०)

अर्धमात्रकालो ह्रस्वो भवति ।

अथ पञ्चमो दशकः

अर्धमणु । (२।५।१)

अर्धमात्रकालो वर्णोऽणुसंज्ञो भवति, स्वरितविनतप्रणताभिगीतेषु ।

मात्रा । (२।५।२)

मात्रा चाकारकालो भवति ।

द्वे दीर्घम् । (प्र० २।५।३)

द्वे मात्रे दीर्घं नाम वेदितव्यम् ।

तिस्रो वृद्धम् । (प्र० २।५।४)

वैखर्ये स्वरस्त्रिमात्रः । (प्र० २।५।५)

वैखर्ये स्वरस्त्रिमात्रो भवति ।

अक्षरम् । (प्र० २।५।६)

अक्षरसंज्ञं भवति । अकारकालो द्विरकारकालः । वृद्ध इत्यधिकारः । अकालो ह्रस्वः (प्र० २।४।१०), द्वे दीर्घम् (प्र० २।५।३), तिस्रो वृद्धम् (प्र० २।५।४) इति सूत्रत्रयमत्राधिक्रियते ।

कृते वर्णोपदेशेऽक्षरपरिभाषयाऽन्वर्थो धर्मोऽक्षरज्ञाने । अक्षरः

परिमाणसम्बन्धः। द्विस्वरः पर्व। तत्रोद्घातनिघातौ प्रत्युत्क्रमोऽभिगीतम्, वृद्धिः, कर्षणम्। अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौति। द्व्यक्षरेणोत्तरयोः। "दशाक्षरं मध्यतो निधनमुपयन्ति" (ता० म० ब्रा० ७, ७, १, २।८, ५, १३) इति हि ब्राह्मणम्। एकवर्त्तेऽभिहिते सर्वप्राप्तिः।

वर्त्ति। (प्र० २।५।७)

अकारादिषु वर्तते व्यञ्जनं वर्त्ति चाप्यक्षरसंज्ञकं भवति।

भूयान्। (प्र० २।५।८)

भूयाँश्च सव्यञ्जनो वर्त्तित्वेनाक्षरं भवति। कारुं बिभ्रत् (१।४८६)।

गुरु सणि। (प्र० २।५।९)

संयोगे परे पूर्वं गुरुसंज्ञं भवति। अग्निरित्यादि।

घम् (दीर्घम्)। (प्र० २।५।१०)

दीर्घं च गुरुसंज्ञं भवति। ए ओ प्रभृतीनि।

इतः परं नास्माकमुपयोगीति विरम्यते।

अधुना अथर्ववेदप्रातिशाख्यमतेन वर्णविषये किञ्चिन्निवेदयितुं समीहे। ततः पूर्वमथर्ववेदविषये किञ्चिद् वच्मि। अयं हि विषयो निगमागमविवेके मया विस्तरेणोपपादितोऽस्ति। संक्षेपेण त्वेतावदेव वदामि। सज्जनाः! नायमथर्ववेदः सर्ववेदसाधारणः, किन्तु वेदात् पौर्वकालिको यो ह्यागम आसीत्, तस्यैव कश्चन कश्चनांशः संगृहीतोऽत्रास्ति। अत एव अथर्ववेदः, ब्रह्मवेद इति वास्य नामधेयं प्रचलितमभवत्। तस्यैवाथर्ववेदस्य विकृतं रूपम् आधुनिकस्तन्त्रग्रामः। तथा चागमज्ञानमन्तरा वेदज्ञानं भवितुमेव नार्हति। तच्चागमज्ञानं गुरोः प्रसादं विनाऽसम्भवि। गुरुमुखादागमकुञ्जिकामासाद्यैव वेदरूपं गहनं गृहं प्रवेष्टुं प्रयतनीयम्। तथा चोक्तमथर्ववेदे—

अव्यसश्च व्यचसश्च बिलं विष्यामि मायया।
ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महै॥
(१९।६८।१)

व्यचसः, व्यचतिर्व्याप्तकर्मा। व्यापकस्य शरीरव्यापकस्य व्यानवायोः समष्टिरूपस्य। अव्यसः अव्यचसः 'वर्णलोपश्छान्दसः' अव्याप्तस्य व्यष्टिरूपस्य प्राणात्मकस्य वायोः। परस्परसमुच्चयार्थौ चकारौ। 'व्यचेः कुटादित्वमनसीति वक्तव्यम्' इति पर्युदासाद् ङित्त्वाभावेन सम्प्रसारणाभावः। तयोर्बिलं बिलवद् बिलं मूलाधारं मायया कर्मनामैतत्। कर्मणाऽभिभवनव्यापारेण विष्यामि विवृतं करोमि। स्यतिरुपसृष्टो विमोचन इति नैरुक्ताः (नि० १।१७)। शब्दं विवक्षोः पुरुषस्य प्रयत्नजनितवायुवशाद् मूलाधारे स्पन्दो भवतीत्यागमिका आहुः—"मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः" इति। ताभ्यां व्यानप्राणाभ्यां करणे तृतीया। वेदमक्षरात्मकमन्त्रसंघम्, उद्धृत्य बिलरूपाद् मूलाधारात् परापश्यन्तीमध्यमावैखरीक्रमेण उद्गमय्य, अथ अनन्तरं कर्माणि श्रौतस्मार्तानि च कृण्महे कुर्महे। यद्वा अव्यचसः अव्याप्तस्य परिच्छिन्नस्य जीवात्मनः, व्यचसः व्याप्तस्य परमात्मनश्च, बिलम् उपलब्धिस्थानं हृदयं मायया अज्ञानेन विष्यामि विमुक्तं विरहितं करोमि। हृदये अज्ञानावृते सति कर्तव्याकर्तव्यविभागो न भवति। अतः कार्याकार्यविभागैकज्ञानपरिपन्थिनं मूढभावम् अपसारयामीत्यर्थः। ताभ्यां जीवपरमात्मभ्यां वेदं चिकीर्षितकर्मविषयकं ज्ञानम्, उद्धृत्य संपाद्य, अथ अनन्तरं कर्माणि नित्यनैमित्तिककाम्यानि कृण्महे कुर्महे। चिकीर्षितस्य कर्मणः स्वरूपं तत्साधनकलापं तत्फलं तत्कर्मप्रतिपादकमन्त्रब्राह्मणयोरर्थं च विदित्वा कर्मारब्धव्यमित्युक्तं भवति। अयं द्वितीयोऽर्थोऽपरितुष्यता सायणेन प्रदर्शितः। यतो हि नाधुना कोऽपि मूलाधारान्मन्त्रोद्धारकुशलः पुरुषो दृश्यत इति सर्वस्य वैदिककर्मकलापस्य लोप एव भवेत्। पुनश्च तत्रैव—

यस्मात् कोशादुदभराम वेदं तस्मिन्नन्तर्दध्म एनम्।
कृतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसा बतेह॥

(१९।७२।१)

अस्यार्थः—यस्मात् 'अव्यसश्च व्यचसश्च' इति मन्त्रे प्रतिपादिताद् मूलाधाररूपात् कोशात्। कोशवत् कोशः। यथा कोशाद् धनवस्त्ररत्नादि-पूर्णाद् अपेक्षितं वस्तु आनीयते, एवमस्य सर्ववर्णमन्त्रायतनत्वात् तत एवोद्धार इति तत्त्वेन व्यपदेशः। वेदं विदन्त्यनेन प्रत्यक्षाद्यविषय-मुपायमिति वेदः। उक्तं हि—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥ इति।

श्रौतस्मार्तसकलकर्मप्रतिपादकमन्त्रब्राह्मणरूपं वेदम्, उदभराम उद्धृत-वन्तः कर्मानुष्ठानार्थमुच्चारितवन्तः स्म, तस्मिन् पूर्वोक्ते स्थाने येन कर्माण्य-नुतिष्ठानि तम् एनम् अन्वादिष्टं वेदम्, अन्तः मध्ये, अवदध्मः पुनः स्थापयामः। कर्मप्रयोगार्थं स्वमुखाद् उच्चारिता वर्णरूपा मन्त्रास्तथैव यदि निःसरेयुस्तर्हि उत्तरकाले मन्त्राभावेन कर्मानुष्ठानं न भवेदिति पुनः पूर्वोक्त एव वेदोद्धारणापादानस्थाने वेदनिधानमुक्तमित्यभिप्रायः। देशकालवस्तुपरिच्छेदशून्यस्य परमात्मनो वीर्येण वीर्यरूपेण कर्मप्रति-पादकेन वा वेदेन कृतं यत् कर्म ब्रह्मयज्ञादिकं निष्पादितम् इष्टं यत् स्वाहावौषडादिशब्दैर्देवतार्थं हविः प्रत्तम्, तेन कृतेन इष्टेन च कर्मणा हे देवा यूयम् इह लोके, तपःशब्देन फलं विवक्ष्यते, कर्मफलेन मा माम् अनुष्ठातारम् अवत रक्षत तर्पयत कर्म अविकलं कृत्वा तत्फलेन मा मां संयोजयतेति यावत्। यद्वा तपसा कृच्छ्रानुष्ठितेन कर्मणा माम् अवत। अथवा तपसा तपः पर्यालोचनम्, तद्रूपेण तेन ब्रह्मणो वीर्येण मां सन्तर्पयत।

एताभ्यां पूर्वोक्ताभ्यां मन्त्राभ्यां स्पष्टं प्रतीयते यदधुना वैदिककर्म-करणे सामर्थ्यं नास्त्यस्माकं मनुजानाम्। एतदर्थं स एव योगमार्गोऽ-नुष्ठानार्थमनुसरणीयो यो हि भगवता श्रीकृष्णेन गीतायां कृतसंचारो विद्यते। यावत्पर्यन्तं सा पद्धतिर्नावलम्बिता भविष्यति तावदिदं

भारतं स्वकीयगौरवं रक्षितुं न प्रभवेत्। एतदर्थं सर्वैरप्यस्माभिः कटिबद्धभूत्वा परिभ्रष्टस्य योगस्याविष्कारे प्रयतनीयम्।

धीती वा ये अनयन् वाचो अग्रं मनसा वा ये वदन्नृतानि।
तृतीयेन ब्रह्मणा वावृधानास्तुरीयेणामन्वत नाम धेनोः॥

(अ० वे० ७।१।१)

यद्यप्यस्मिन् द्व्यृचे देवताविशेषो न प्रतीयते, तथापि "अनिरुक्तो वै प्रजापतिः" (ऐतरेयब्राह्मणम् ६।२०) इति श्रुतेर्देवता अत्र प्रजापतिः। अथर्वाणम् इत्यष्टर्चेऽपि प्रजापतिर्देवता। अथर्वशब्दः प्रजापतिवाचक इति वक्ष्यते। अतः कृत्स्नमिदं सूत्रं प्राजापत्यम्। अतोऽर्थोत्पादनकर्मणि ईदृशी खलु विवक्षूणां शब्दाभिव्यक्तिः।

प्रथममभिलषितमर्थं विवक्षोः पुरुषस्य तद्वाचकशब्दप्रयोगार्थं तदिच्छावशेन जातात् प्रयत्नाद् मूलाधारे प्राणवायोः परिस्पन्दो जायते। तेन परिस्पन्देन मूलाधारे सकलशब्दमूलकारणभूता निष्पन्दा सूक्ष्मा परा वाग् आविर्भवति। सैव मूलाधाराद् ऊर्ध्वं नाभिदेशं प्राप्ता सामान्यज्ञानरूपा विवक्षितपदार्थदर्शनात् पश्यन्तीत्युच्यते। सैव हृदयदेशं प्राप्ता अर्थविशेषनिश्चयबुद्धियुक्ता मध्यदेशावस्थानाद् मध्यमेति गीयते। सैव कण्ठताल्वादिस्थानेषु वर्णरूपेण व्यज्यमाना विशेषेण परावबोधप्रचण्डा वैखरीति भण्यते। अत्र पराद्यवस्थात्मकास्त्रयः शब्दा देहान्तर्गतत्वाद् अस्फुटत्वेन विवक्षितमर्थं परेभ्यो न प्रतिपादयन्ति। वैखर्यात्मकः शब्द एवार्थप्रत्यायनक्षमः। "गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" (ऋक् १।१६४।४५) इति हि निगमः। "गुहायां त्रीणि पदानि निहितानि नार्थं वेदयन्ते" इति च यास्केनोक्तम्। आगमोऽपि—

स्वरूपज्योतिरेवान्तः परावागनपायिनी।
यस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥

अविभागेन वर्णानां सर्वतः संहृतक्रमा।
प्राणश्रयात् तु पश्यन्ती मयूराण्डरसोपमा॥
मध्यमा बुद्ध्युपादाना कृतवर्णपरिग्रहा।
अन्तःसंजल्परूपा तु न श्रोत्रमुपसर्पति॥
तालवोष्ठव्यापृतिव्यङ्ग्या परबोधप्रकाशिनी।
मनुष्यमात्रसुलभा बाह्या वाग् वैखरी मता॥ इति।

तथा चास्या ऋचोऽयमर्थः—

ये प्रजापतेः इन्द्राग्न्योर्वा वाचकं शब्दं विवक्षवः स्तोतारः। धीती ध्यायतेः क्तिनि छान्दसं संप्रसारणम्। हल इति दीर्घः। सुपां सुलुक (पा० ७।१।३९) इति तृतीयायाः पूर्वसवर्णदीर्घः। धीत्या ध्यानात्मकेन विवक्षाजन्यप्रयत्नजातवायुपरिस्पन्दाविर्भूतेन परावस्थापन्नेन प्रथमेन, शब्दब्रह्मणा इति यावत्। तृतीयेन ब्रह्मणा इति वक्ष्यमाणत्वाद् अत्रापि संख्याविशिष्टं ब्रह्मपदं सम्बध्यते। वाशब्दश्चार्थे। वाचो अग्रं "सर्वे वेदा यत्पदमामनन्ति" (क० व० २।१५) इति श्रुतेः सकलवाक्यप्रतिपाद्यत्वेन मुख्यं निखिलवाग्व्यवहारस्य वा आदिभूतं प्रजापतिरूपमर्थम् इन्द्राग्निरूपं वा अनयन् ध्यानविषयत्वं प्रापितवन्तः। यद् वृत्तान्नित्यम् (पा० (८।१।६६) इति निघातनिषेधः। अडागमस्य उदात्तत्वेन आद्युदात्तं पदं भवति। ये च विवक्षवः मनसा सामान्यधर्मग्राहकेण पश्यन्त्यात्मकेन द्वितीयेन शब्दब्रह्मणेत्यर्थः। ऋतानि सत्यभूतानि, अखण्डपरावस्थापेक्षया ईषद् उद्गतानि वा वाक्यानि देवतावाचकशब्दविचारविषयाणि अवदन्। वदनमत्र सामान्यज्ञानं विवक्षितम्। पूर्ववाक्ये यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः। ते विवक्षवः। तृतीयेन ध्यानमनोऽवच्छिन्नपरापेक्षया तृतीयत्वम्। त्रित्वसंख्यापूरकेण ब्रह्मणा अन्तर्विभक्तवर्णात्मकेन अर्थविशेषाध्यवसायबुद्धियुक्तेन मध्यमाख्येनेत्यर्थः। वावृधानाः अन्तर्भावितण्यर्थः। वृधेर्लिटः कानच्। तुजादित्वाद्दीर्घः। चितः (पा० ६।१।१६३)

इत्यन्तोदात्तत्वम्। वर्धयन्तः अशब्दविषयमर्थं शब्दवाच्यत्वेन पोषयन्तः। तुरीयेण चतुर्थेन 'चतुरश्छयतावाद्यक्षरलोपश्च' (पा० ५।२।५१ वा०) इति छप्रत्ययः। चतुःसंख्यापूरकेण वैखर्यात्मकेन वर्णपदवाक्यरूपेण ब्रह्मणा धेनोः, वाङ्नामैतत्, वाच्यवाचकयोरभेदाद् वाच्ये वाचकशब्दः। मन्त्रप्रतिपाद्यस्य। यद्वा धेनुवद् धेनुः, अभिमतफलप्रदानेन प्रीणनकारिणः प्रजापतेः, नाम नामधेयम्, प्रजासर्जनपालनादिधर्मकं प्रजापतिरिति। इन्द्राग्निदेवतापक्षे इदं दर्शनभूतेन्धनादिगुणविशिष्टम् (नि० १०।८) इन्द्र इति। अग्रणीत्वाङ्गनादिगुणकम्, अग्निरिति च नामधेयम् अमन्वत उच्चारितवन्त इत्यर्थः। धातूनामनेकार्थत्वात्। 'मनु अवबोधने' तानादिकः। एवं परादिवाचा प्रतिपादितस्वरूपः प्रजापतिः, अस्माकमभीष्टं साधयत्विति, इन्द्राग्नी वा साधयतामिति प्रार्थना। अथवा 'वाचो अग्रम्' इतिपदेन वेदात्मिकाया वाचो निदानं पर्यवसानभूमिर्वा परमात्मतत्त्वं विवक्ष्यते। तथा च ऐतरेयारण्यके "तदिह आस भुवनेषु ज्येष्ठम्" (ऋ० १०।१२०) इत्यस्य सूक्तस्य तच्छब्दप्रशंसावसरे समाम्नायते— "बृहस्पते प्रथमं वाचो अग्रम्' (ऋक् १०।७१।१) इत्येतद्धयेव हि प्रथमं वाचो अग्रम्" (ऐत० आ० १।३।३) इति। तदिद् आस इत्यत्र तच्छब्देन सर्वश्रुतिप्रसिद्धं सर्वजगत्कारणं ब्रह्म अभिहितम्। तदत्र एतच्छब्देन विवक्ष्यत इति तत्रार्थः। तादृशं सकलवाङ्निधानभूतं तत्त्वं ये जिज्ञासवो महर्षयो देवा वा। धीती कर्मनामैतत्। धीत्या। वाशब्दो विकल्पवाची। बाह्यविषयव्याप्रतया अक्षवृत्त्या अनयन्। अनेन जाग्रदवस्थाभिमानि विश्वसंज्ञात्मना तत्त्वं ग्रहीतुं उद्युञ्जन्त इत्युक्तं भवति। ये वा ततोऽपि सूक्ष्मदर्शिनो मनसा केवलेनान्तःकरणेन ऋतानि सत्यब्रह्मविषयाणि वाक्यानि अवदन्। अनेन स्वप्नावस्थायां केवलमनोव्यापारात् तदभिमानितैजसात्मकब्रह्मणा तत्त्वज्ञानाय प्रयतन्त इत्युक्तं भवति। ये वा ततोऽप्यान्तरं वस्तु जिज्ञासमाना वावृधाना, वर्धतेः 'लक्षणहेत्वोः' (पा० ३।२।१२६) इति हेतौ शानचि

व्यत्ययेन शपः श्लुः । परिच्छेदापनयनरूपवर्धनाद्धेतोस्तृतीयेन त्रित्वसंख्यापूरकेण ब्रह्मणा चैतन्यात्मना । अत्र सुषुप्तौ कारणशरीराभिमानी प्रज्ञानघनः प्राज्ञो विवक्षितः । तेन जागरस्वप्नावस्थावत् सुषुप्तौ बाह्यान्तरेन्द्रियजनितविक्षेपाभावाद् अपरिच्छिन्नब्रह्मभावेन वर्तन्ते इति शेषः । एवमवस्थात्रयाभिमानिविश्वादितादात्म्येन तत्त्वं बुभुत्सवः सर्वेऽपि तत्र तत्र निरस्तसमस्तभेदं तत्त्वम् अलभमानाः सन्तः धेनोर्वाचो अग्रमिति निर्दिष्टस्य फलप्रदस्य वा परमात्मनो नाम नामकं यत् स्वरूपं प्रति सर्वे प्रणताः, तद् निरस्तसमस्तोपाधिकं सत्यज्ञानादिलक्षणं तत्त्वं तुरीयेण तुर्यावस्थापन्नेन कारणशरीराभिमानरहितेन सर्वसाक्षिणा चैतन्येनात्मना अमन्वत जानन्ति स्म । "गूढं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणा विन्दद् अत्रिः" (ऋक् ५।४०।६) इति हि निगमः । "स ब्रह्मा (स शिवः) स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्" (तै० आ० १०।११।२) इति श्रुतौ । परमात्मनो नानादेवतानामव्यवहार्यत्वदर्शनाद् अत्र प्रजापतिशब्दव्यपदेश्यम् इन्द्रम् अग्निशब्दव्यपदेश्यं वा तदेव तत्त्वं सम्यग् अधिगतं साधयत्विति प्रार्थ्यते ।

अनूकारः स्वरः पद्यः । (१।४)

ऌकारभिन्नः स्वरः पदस्यान्त्ये भवति ।

लकारविसर्जनीयौ च । (१।५)

लकारो विसर्जनीयश्च पदस्यान्ते भवतः ।

स्पर्शाः प्रथमोत्तमाः (१।६) । न चवर्गः (१।७) ।

चवर्गभिन्नाः प्रथमा उत्तमाश्च स्पर्शाः पदस्यान्त्ये सन्ति ।

अधिस्पर्शं च (१।८) । द्वितीयचतुर्थाः सोष्माणः (१।९) ।

स्पर्शेषु द्वितीयाश्चतुर्थाश्च सोष्माणो भवन्ति । ऊष्मणा वायुना सहिता द्वितीयाश्चतुर्थाश्च भवन्तीति भावः । अर्थात् प्रथमतृतीयेषु प्रत्येकं वर्गे ऊष्माख्यो वायुरागत्य तान् सोष्मणो विदधाति । तथा चोक्तं

तत्रैव भाष्ये—

सस्थानैरूष्मभिः पृक्तास्तृतीयाः प्रथमाश्च ये ।
द्वितीयाश्च चतुर्थाश्च सम्पद्यन्त इति स्थितिः ॥

उत्तमा अनुनासिकाः । (१।११)

ऋक्प्रातिशाख्यरीत्या स्पर्शेषु ये प्रतिवर्गम् उत्तमास्तेऽनुनासिका भवन्ति । यथा—अनुस्वारः स्वस्थानादागत्य घोषं तं जनयतीति प्रतिपादितम्, तथात्राप्यनुस्वारः स्वस्थानादागत्य पञ्चमान् अनुनासिकान् सम्पादयति ।

पञ्चैव प्रथमान् स्पर्शान् एक आहुर्मनीषिणः ।
तेषां गुणोपसंचयादान्यभाव्यं प्रवर्तते ॥ १ ॥
जिह्वामूलीयशषसा उपध्मानीयपञ्चमाः ।
एतैर्गुणैः समन्विता द्वितीया इति तान् विदुः ॥ २ ॥
त एव सह घोषेण तृतीया इति तान् विदुः ।
ऊष्मणा च द्वितीयेन चतुर्था इति तान् विदुः ॥ ३ ॥
प्रथमाः सह घोषेण यदा स्युरनुनासिकाः ।
तानाहुः पञ्चमान् स्पर्शांस्तथा वर्णगुणाः स्मृताः ॥ ४ ॥
न तु हि व्यञ्जनसन्धिरसंयोगो भवेत् पुनः ।
संयोगश्च प्रसज्येत क्रमो वाच्यः पुनर्भवेत् ॥ ५ ॥

इति ह्विटनीसमुद्धृतभाष्यांशतोऽयमर्थः स्पष्टीक्रियते ।

अर्थाद् आद्या एव प्रतिवर्गं स्पर्शा यदा घोषवन्तो भवन्ति त एव ऊष्मणा संपृक्ताश्चतुर्था द्वितीयाश्च सम्पद्यन्ते ।

श्वासो घोषेष्वनुप्रदानः । (१–१२)

नादो घोषवत्स्वरेषु । (१–१३)

अयं भावः—विवृते कण्ठे श्वासो नाम बाह्यः प्रयत्नो जायते, तदा श्वासध्वनिसंसर्गाद् अघोषो जायते, सोऽप्यनुप्रदानपदेनैव व्यवह्रि-

यते। संवृते कण्ठे नादोऽनुप्रदीयत इति नादध्वनिसंसर्गाद् घोषो नाम बाह्यः प्रयत्नो जायते। तथा चाघोषाणां श्वासः प्रकृतिः। घोषाणां तु नादः प्रकृतिरिति। तथा चोक्तं तत्रैव भाष्ये—

व्यञ्जनं घोषवत्संज्ञमन्तःस्था हपरौ यमौ।
त्रयस्त्रयश्च वर्गान्त्या अघोषः शेष उच्यते॥

अयमर्थः—अन्तःस्था यरलवा हकारः, परौ यमौ गुँ घुँ इति त्रयस्त्रयो वर्गान्त्या नाम गघङाः, जझञाः, डढणाः, दधनाः, बभमाः—इत्येते घोषवत्संज्ञाः। शेषः—अर्थात् कखौ चछौ टठौ तथौ पफौ शषसाः, अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाः कुँ खुँ इत्येतेऽघोषसंज्ञाः।

समानयमेऽक्षरम् उच्चैरुदात्तम् (१-१४)।

नीचैरनुदात्तम् (१-१५)। भाष्यं न लिखितम्।

आक्षिप्तं स्वरितम् (१-१६)। भाष्य इव। स्वरितो नाम द्वयोर्वर्णधर्मयोराक्षेपे सह स्थितौ भवति। स्वरितस्यादितो मात्रार्धमुदात्तम् (१।१७)।

स्वरिते उदात्तत्वानुदात्तत्वे वर्णधर्मौ सह तिष्ठतः, तत्र दीर्घो भवतु ह्रस्वो वा प्लुतो वा तत्र तस्यार्धम् आदावुदात्तं भवति, अन्त्यमर्धं त्वनुदात्तम्।

मुखे विशेषः करणस्य (अ० १, १८)। मुखे करणस्य विशेषा भेदाः स्युः। अर्थात् तत्तत्स्थानीयेषु वर्णेषु करणस्य भेदा भवन्ति। तत्र १९-२५ सूत्रयोर्भाष्ये किं पुनः स्थानम्, किं पुनः करणमिति यद् उपक्रम्यते तत् स्थानम्, येनोपक्रम्यते तत् करणम्।

कण्ठ्यानामधःकण्ठः (१।१९)।

कण्ठ्यानां वर्णानामधरकण्ठः (१।२०)।

कण्ठ्यानां वर्णानाम् अधरकण्ठः करणं भवति।

अस्मिन् प्रातिशाख्ये वर्णानां स्थानानि नहि निर्दिष्टानि सन्ति। भाष्ये तु निर्दिष्टानि सन्ति। तान्येव स्थानानि ह्विटनेमहाशयः स्वकीये आङ्गलानुवादे निरदिक्षत्।

अत्र कण्ठ्यानामधरकण्ठः करणत्वेनोक्तः, तत्र प्रातिशाख्यभाष्यानुसारेण त्रिविधोऽकारो हकारविसर्जनीयाः कण्ठ्या भवन्ति। यजुःप्रातिशाख्यानुसारमप्येत एव कण्ठस्थाना वेदितव्याः।

यद्यपि 'जिह्वामूलीयानां हनुमूलम्' (अथर्वप्रा० १।२०) इत्यस्मिन् सूत्रे जिह्वामूलीयानाम् इति बहुवचनेन जिह्वामूलीया बहवो लभ्यन्ते, अस्यां स्थितौ किमथर्वप्रातिशाख्यमते यजुःप्रातिशाख्योक्त्या ऋकारास्त्रयः कवर्ग्याः पञ्च जिह्वामूलीयो नवम इत्येते नव जिह्वामूलीया ग्राह्याः। यद्वा ऋक्प्रातिशाख्योक्ता "[1]ऋकारलृकारावथ षष्ठ ऊष्मा जिह्वामूलीयः प्रथमश्च वर्गः' (ऋक्प्रा० १।४) इत्येते जिह्वामूलीया ग्राह्याः। यद्वा तैत्तिरीयप्रातिशाख्योक्ता ग्राह्या इति चिन्तायामुच्यते—

जिह्वामूलीयानुस्वारा हनुमूलेन (यजु० प्रा० १।८३) इति यजुःप्रातिशाख्येन, जिह्वामूलीया हनुमूलकरणकाः प्रतीयन्त इत्यनेन यजुःप्रातिशाख्येनास्य साम्यदर्शनाच्च यजुःप्रातिशाख्योक्ता एव जिह्वामूलीया ग्राह्याः।

यजुर्वेदप्रातिशाख्ये ह्यकारस्त्रिविधः, हकारो विसर्जनीय इत्येतेषां कण्ठस्थानमुक्तम्। ऋकारस्त्रिविधः, जिह्वामूलीयः कवर्ग इत्येतेषां जिह्वामूलं स्थानमुक्तम्। यद्यपि ऋक्प्रातिशाख्येऽपि जिह्वामूलीयानां जिह्वामूलं स्थानमिति तेनाप्यथर्वप्रातिशाख्यस्य साम्यं दृश्यते, तथापि ऋक्प्रातिशाख्ये स्पृष्टतादीनि करणान्युक्तानि। यजुःप्रातिशाख्ये त्वाथर्वणिकानि। अनयोर्द्वयोः सादृश्यं व्यवस्थापयितुं शक्यते।

तालव्यानां मध्यजिह्वम् (अथ० प्रा० १।२१)।

तत्र के तालुस्थाना इति चिन्तायाम् ए, ऐ, य श च छ ज झ ञ्

---

१. ऋकारश्च लृकारश्च षष्ठश्च ऊष्मा जिह्वामूलीयः प्रथमश्च ककारादिर्वर्गः एते जिह्वामूलस्थाना वेदितव्याः। ऋ ॠ ऌ ॡ ५ क कखगघङ। हनुमूलं चैषां करणम्।

इकारस्त्रिविध इति द्वादश वर्णास्तालुस्थाना वेदितव्याः। यजुःप्रातिशाख्ये त्वैकारो नहि तालव्यत्वेन परिगणितः। ऋक्प्रातिशाख्ये त्वेकार-श्चवर्गस्त्रिविध इकार ऐकारो यकारः शकार एते द्वादश तालुस्थानाः सन्ति। परं तद्भाष्ये प्लुत इकारो नहि परिगणितस्तेषां शाखायां तदभावात्। अथर्ववेदेऽपि प्लुत इकारो नास्ति केवलं सम्भाव्यमानतया तस्य स्थानन्निर्देशस्तद्भाष्ये कृत इति ध्येयम्। सामप्रातिशाख्येऽप्येषां द्वादशानां तालुस्थानमुपात्तमस्ति। यजुःप्रातिशाख्ये त्विचशेयास्तालौ (१।६६) इत्यनेनैकादशानाम् 'इ-ई-ई३ चु श य ए' एषां तालुस्थानं निर्दिष्टम्। तत्र ऐकारस्य भागद्वयं विधाय तयोः पृथक् पृथक् स्थानं निर्दिष्टं वर्तते। तैत्तिरीयेण तु वैषम्यं विद्यत इति तदुपन्यासोऽप्राकरणिकः।

सामप्रातिशाख्ये तु 'तालुनि श्च्यय्यै' (१।५) इत्यनेन शः, चवर्गः, यकारः, त्रिविध इकार एकारैकारावित्येते तालुस्थानाः सन्ति। इत्यनेनापि साम्यं वर्तते।

मूर्धन्यानां जिह्वाग्रं प्रतिवेष्टितम्। (१।२२)

षकारस्य टवर्गस्य च मूर्धा स्थानम्। तथा चोक्तमत्रैव भाष्ये—'मूर्धस्थानं षकारस्य टवर्गस्य तथा भवेत्' इति। प्रतिवेष्टितं च जिह्वाग्रं करणं बोध्यम्। 'षटौ मूर्ध्नि' (यजुः १।६७) इत्यनेन यजुःप्रातिशाख्येऽपि षकारटवर्गयोर्मूर्धैव स्थानं निर्दिष्टमस्ति। ऋक्प्रातिशाख्येऽपि 'मूर्धन्यौ षकारटकारवर्गौ' (११।४३) इत्यनेन स्थानसाम्यमायाति। तैत्तिरीये प्रातिशाख्येऽपि 'जिह्वाग्रेण प्रतिवेष्ट्य मूर्धनि टवर्गे' (तै० २।३७) 'स्पर्शेस्थानेषूष्माण आनुपूर्व्येण' इत्याभ्यां सूत्राभ्यां षकारटवर्गयोः स्थानसाम्यमेव। करणसाम्यमप्यनयोर्वर्तत एव।

सामवेदेऽपि 'षटौ मूर्ध्नि' (१।६) इत्यनेन स्थानैक्यमस्ति। करणं तु सामप्रातिशाख्ये नैव निर्दिष्टम्। परमथर्वप्रातिशाख्ये षकारस्य द्रोणिका करणम्, तथा च सूत्रम् 'षकारस्य द्रोणिका' (१।२३) षकारस्य द्रोणिका

करणम्, द्रोणिका नाम अल्पा द्रोणी द्रोणिका 'द्रोणी काष्ठाम्बुवाहिनी' इति कोशाद् द्रोणीसदृशी जिह्वा विधेया। तथा च मूर्धस्थानस्पर्शो विधेयः। दन्त्यानां जिह्वाग्रं प्रस्तीर्णम् (१।२।२)।

लसतवर्गाणां दन्ताः स्थानम्। प्रस्तीर्णं जिह्वाग्रं च करणम्। सामप्रातिशाख्येन 'दन्ते त्स्लाः' (१।७) इति सूत्रेण स्थानसाम्यं विद्यते। ऌकारस्तु नात्र निर्दिष्टो भाष्येऽथर्वप्रातिशाख्यीये, अस्यां शाखायां तदभावात्। ऋक्प्रातिशाख्ये तु दन्तमूलीयस्तु तकारवर्गः (प० १।४४), सकाररेफलकाराश्च (१।४५) इत्याभ्यां दन्तमूलं स्थानं प्रोक्तम्। यजुःप्रातिशाख्ये तु 'ऌलसिता दन्ते' (अ० १।६९) इत्यनेन स्थानसाम्यं वर्तते। 'दन्त्या जिह्वाग्रकरणाः' (अ० १।७६) इत्यनेन सामान्यं जिह्वाग्रं करणत्वेन निर्दिष्टम्। तैत्तिरीये तु दन्तमूलं स्थानं जिह्वाग्रं च करणं निर्दिष्टम्। ओष्ठ्यानामधरोष्ठम् (१।२५) ओकार औकार उपध्मानीयः त्रिविध उकारः, वकारपवर्ग एषाम् ओष्ठः स्थानम्। करणं चाधरोष्ठम्। ऋक्प्रातिशाख्येऽपि शेष ओष्ठ्योऽपवाद्य नासिक्यान् (१।४७) इत्यनेन उ ऊ ओ औ प फ ब भ म व एषामोष्ठः स्थानमिति स्थानैक्यं प्रतीयते। यजुःप्रातिशाख्ये तु उवोपध्मा ओष्ठे (१।७०) इत्यनेन स्थानसाम्यं केवलमौकारो याजुषेऽन्यस्थानः।

'समानकरणस्थानां नासिक्यौष्ठ्याः' (१।८०) इत्यनेन याजुषे करणं त्वोष्ठ एव। सामप्रातिशाख्ये तु[1] ओष्ठ्ये वो ५ पू (१।९) इत्यनेन तद्भाष्येण च वकार ओकार औकार उपध्मानीयः पकार उकार ऊकारः इत्येतेषाम् ओष्ठः स्थानम्। सामप्रातिशाख्ये करणनिर्देशो नास्ति। नासिक्यानां नासिका (१।२६)।

नासिकास्थानानां वर्णानां नासिकाकरणम्।

---

१. ओष्ठ ववौः पू इति पाठः साधीयान्।

के वर्णा नासिकास्थाना इति चिन्तायामुच्यते—कुं खुं गुं घुं-इति चत्वारो यमाः, ङञणनम इति पञ्च उत्तमा अनुस्वारश्च, तत्र टीकाकारेणोक्तम्—

नासिक्ये नासिकास्थानं तथाऽनुस्वार उच्यते।
यमा वर्गोत्तमाश्चापि यथोक्तं चैव ते मताः॥ इति।

एतेनापि प्रमाणेन नासिकास्थानीया वर्णा निर्णीताः।

अनुनासिकानां मुखनासिकम् (१।२७)।

अनुनासिकानां मुखनासिकं करणं वेदितव्यम्, स्थानमपि मुखनासिकम्।

रेफस्य दन्तमूलानि (१।२८)।

अत्र करणपदं नानुवर्तत इति ह्विटनीमहोदयेनोक्तम्।

तत्र प्रमाणत्वेन वक्ष्यमाणवचनमप्युद्धृतम्।

रेफस्य दन्तमूलानि प्रत्यग् वा तेभ्य इष्यते।
इति स्थानानि वर्णानां कीर्तितानि यथाक्रमम्॥

परमस्मिन्मते करणपदमेवानुवर्तनीयम्। यतो हि नायं सूत्रकारः कस्यचिदपि वर्णस्य स्थानं निरदिक्षत्। तत्तद्वर्णानां स्थाननिर्णयस्तु प्रमाणान्तरेणैव विधेयः।

किञ्च, रेफस्य दन्तमूलानीति सूत्रे करणपदस्य नानुवृत्तिः, उत्तरसूत्रे करणपदग्रहणसामर्थ्यादिति चेन्न, उत्तरसूत्रे करणपदस्यान्यार्थकत्वात्।

स्पृष्टं स्पर्शानां करणं १–२९ स्पृष्टं स्पर्शानां करणं भवति। अर्थाद् वक्ता कस्माच्चित् स्थानात् केनचित् करणेन वर्णानुच्चारयति। तत्रोच्चारणे करणानां यत् स्पर्शनम् ईषत् स्पर्शनादिकं च व्यापारो भवति तदेवात्र करणपदेनोच्यते। साधकतममिति यावत्।

क्वचित्त्वपवादः। यथोक्तं ह्विटनीमहोदयेन—

स्वरमध्ये डढौ यत्र पीडनं तत्र वर्जयेत्।
मृदुप्रयत्नावुच्चार्यौविडा मीढं निदर्शनम्॥

ईषत्स्पृष्टमन्तःस्थानाम् (१।३०)।

यरलवानाम् ईषत्स्पृष्टं करणं ज्ञेयम्। यतो हि तत्तत्करणैस्तत्तत्स्थानानाम् ईषत् स्पर्शनं विधेयम्।

[1]ऊष्मणां विवृतं च (१।३१)।

शषसहानां विवृतं प्रयत्नो बोद्धव्यः।

स्वराणां च (१।३२)। स्वराणां च विवृतं प्रयत्नो ज्ञेयः। अत एव सिद्धान्तकौमुद्याम्—विवृतमूष्मणां चेत्युक्तम्, भाष्यरीत्या त्वीषद्विवृतमूष्मणाम्, विवृतं स्वराणाम्। तेन नाञ्झलाविति सूत्रं प्रत्याख्यातम्।

एके स्पृष्टम् (१।३३)।

स्वराणामित्यनुवर्तते। स्वराणां स्पृष्टं प्रयत्नः। परं नैतद् युक्तम्, अनुभवविरोधात्।

एकारौकारयोर्विवृततमम् (१।३४)।

एतच्च पातञ्जलमहाभाष्यविरुद्धम्। तन्मत एतयोर्विवृततरत्वात्, ऐकारौकारयोर्विवृततमत्वं नैतन्मते। किन्त्वाकारस्यैवात्यन्तं विवृततमत्वम्। अत एवाह—

ततोऽप्याकारस्य (१।३५)।

ऐकारौकाराभ्यामप्याकारस्य विवृततमत्वम्।

इदमेव हि मतं शिक्षाप्रकाशे प्रदर्शितम् (पृ० ३८१ प० २५ शिक्षा-

---

१. ऊष्मणां विवृतं च (१।३१)। अस्मिन् सूत्रे चकार ईषद् इत्यनुकर्षति, तथा चोष्मणाम् ईषद् विवृतं प्रयत्नः। तथा चानुकृष्टं नोत्तरत्रेति न्यायेन स्वराणां चेत्यस्मिन् सूत्रे ईषदित्यस्य नानुकर्षणम्। अयं हि योगविभागः (पृथक् सूत्रम्) सूचयति च यत् पूर्वसूत्रे ईषदित्यस्यानुवृत्तिः। यदि हि ईषदित्यस्यानुवृत्तिरनिष्टाऽभविष्यत् तदा तु स्वरोष्मणां विवृतम् इत्येवावक्ष्यत्।

यद्यत्र चकारात् पूर्वसूत्राद् ईषदित्यनुवर्तते तदा नाञ्झलाविति प्रत्याख्यानपरेण भाष्येणैकमत्यम्।

संग्रहे) [1]चान्द्रशिक्षासूत्रे तु 'ताभ्यामप्यकारस्य' (चान्द्रसू० २६) इत्यनेन ह्रस्वाकारस्य विवृततमाभ्यामप्यैकारौकाराभ्यामत्यन्तं विवृतत्वं प्रतिपादितम्। दृश्यते हि मरुस्थलवासिनां गौडानामीदृशमुच्चारणं ह्रस्वाकारस्य। परन्तु तत्र 'ताभ्यामप्याकारस्य' इत्येव पाठः समीचीनः।

[2]सस्पृष्टरेफमृवर्णम् (अ० १।३७)।

ऋवर्णं रेफेण सहितं भवति। अर्थात् त्रिविधमपि ऋवर्णं रेफेण युक्तं भवति। तथा चोक्तम्—

ऋवर्णे स्वरमात्रा या तस्या मध्येऽर्धमात्रया।
रेफो भवति संस्पृष्टो यथाङ्गुल्या नखं तथा॥
सूत्रे मणिरिवेत्येके तृणे क्रिमिरिवेति च।

एतेन ह्रस्वे ऋकारे पादमात्रा आदौ, पादमात्रा चान्ते, मध्ये रेफस्यार्धमात्रा। एवम् एकमात्र ऋकारः संपन्नः।

दीर्घप्लुतयोः पूर्वा मात्रा (१।३८)।

अत्र भाष्ये किञ्चिन्न विवृतम्। तथा सति ऋति ऋ वा (पा० ६।१।१०१) इति वार्त्तिकेन यदा द्वयोर् ऋकारयोः स्थाने ईषत्स्पृष्ट ऋकारो दीर्घो विधीयते तदा आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा 'अभितोऽभक्तेरपरा' इति रीत्या दीर्घे ऋकारे यदा 'दीर्घप्लुतयोः पूर्वा मात्रा (अ० प्रा० १।३८) इत्यनेन पूर्वत्रैकस्यां मात्रायां निश्चितायां रेफस्यार्धमात्रा मध्ये मन्तव्या। अपरत्र त्वचोऽर्धो भागः। प्लुतविषये तु यदि पूर्वम् एका मात्रा तदा मध्ये द्वौ रेफौ मन्तव्यौ तयोरेका मात्रा तदनन्तरं स्वरस्यैका मात्रेति कृत्वा प्लुत ऋकारः सम्पन्नः।

सलकारम् ऌवर्णम् (१।३९)।

पूर्वोक्तरीत्या ऌवर्णस्यापि ऋवर्णस्येव व्यवस्था विधेया। सन्ध्यक्षराणि संस्पृष्टवर्णान्येकवर्णवद् वृत्तिः (१।४०)। चत्वारि ए ऐ ओ औ

---

१. 'प्राच्यविद्याप्रतिष्ठान'संस्थामुद्रितचान्द्रशिक्षासूत्रम्।

२. एवं संस्पृष्टलकारम् ऌवर्णमित्यपि सूत्रमपेक्ष्यते। परं तत्काले ऌवर्णप्रयोगस्य वेदेऽनुपलब्धेर्न तथा सूत्रं सूत्रकारेणाकारि।

इतीमानि सन्ध्यक्षराणि संस्पृष्टा वर्णा येषु तानि भवन्ति, एकवर्णवच्च तत्र व्यवहारः। व्यञ्जनेषु यत्र द्वयोर्व्यञ्जनयोः स्वरैरव्यवहितयोः संयोगो भवति तत्र नैकवर्णवद् वृत्तिः, किन्तु वर्णद्वयव्यवहार एव तत्र भवति। प्रत्येकवर्णप्रयुक्तं कार्यमपि तत्र भवत्येव। नैवम् एतेषु सन्ध्यक्षरेषु अवयवीभूतवर्णद्वयव्यवहारः प्रत्येकं वर्गे भवति। यदि ह्येकवर्णवद् वृत्तिर्नाभिमता भवेत् तदा 'रमा एति' इत्यत्र रमाघटकाकारस्य एकार-घटकाकारेण दीर्घे पुनराद्गुण इति गुणे 'रमेति' इत्यनिष्टं रूपं सम्पद्येत।

'एचोऽयवायावः' इति सूत्रमप्येतदर्थं परिपुष्णाति।

नैकारौकारयोः स्थानविधौ (अ० प्रा० अ० १ सू० ४१)।

ऐकारौकारयोः स्थानविधावेकवर्णवद् वृत्तिर्न भवति।

यथा एकार ओकारश्च प्रश्लिष्टावर्णौ न तथा ऐकारौकारौ। अत एव तुल्यास्यसूत्रे (पा० १।१।९) (पृ० ६२ प० १) महाभाष्ये—'यदि प्रारम्भो यत्नस्य प्रयत्न एवमप्यवर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोति। प्रश्लिष्टावर्णावेतौ। अवर्णस्य तर्ह्येचोश्च सवर्णसंज्ञा प्राप्नोति विवृततरा-वर्णावेतौ।' इत्यनेन ऐकारौकारयोर्द्वयोर्वर्णयोरसंश्लिष्टत्वं सूचितम्। तथा चानयोर्द्विस्थानतैव युक्ता। अत एव तैत्तिरीये प्रातिशाख्ये 'अकारा-र्धमैकारौकारयोरादिः (२।२६), इकारोऽध्यर्धः पूर्वस्य शेषः (२।२८), उकारस्तूत्तरस्य (२।२९) इति, 'तेन तदीयाः स्थानकरणप्रयत्नास्तस्मिन्नंशे भवन्ति' इति वैदिकाभरणे च प्रोक्तम्। एवं स्थितावथर्वप्रातिशाख्येऽपि द्विस्थानतैवानयोर्द्वयोर्मन्तव्या। अत एव—"ऐकारौकारयोश्चापि पूर्वा मात्रा परा च या। अर्धमात्रा तयोर्मध्ये संस्पृष्टा इति ताः स्मृताः॥" इति ह्विटनीमहाशयेन आङ्गलव्याख्याने श्लोक उद्धृतः। अतो हेतोः ऐकारस्य कण्ठतालुस्थानम्, औकारस्य कण्ठोष्ठं स्थानं सिद्ध्यत्यथर्वप्राति-शाख्येऽपि। वाजसनेयप्रातिशाख्येऽपि 'ऐकारौकारयोः' कण्ठ्या पूर्वा मात्रा तालव्योष्ठ्योरुत्तरा (१।७३) इत्यनेनानयोर्द्विस्थानतोक्ता।

विसर्जनीयोऽभिनिष्टानः (१।४२)।

किमत्र अभिनिष्ठान इति विसर्जनीयस्य संज्ञा आहोस्वित्तद्गुणवर्णानाम्। न तावत् संज्ञा, कस्मिन्नपि समुपलब्धे प्रातिशाख्ये व्याकरणे वा तदनुपलब्धेः। तस्मादवशिष्यते गुणवाचकत्वम्। एतदर्थविषये तु वर्तते विवादः। केचनाधुनिका ह्विटनीमहाशयप्रभृतयः स्थाधातोर्निष्पन्नत्वेनाभिनिष्ठान इति पाठं मन्वते। परमत्र ष्टनधातोरभिनिपूर्वकान्निष्पन्नत्वेन सर्वतः संशब्दितत्वाद् अभिनिष्टानत्वं तस्य मन्तव्यम्।

व्यञ्जनविधारणमभिनिधानः पीडितः सन्नतरो हीनश्वासनादः (१।४३) व्यञ्जनविधारणं नाम वाक्कलह इत्यत्र द्वयोः ककारयोर्मध्ये प्रथमस्य ककारस्य संयुक्तमुच्चारणं न कर्तव्यम्, किन्तु पार्थक्येनेदमेव अभिनिधानपदवाच्यम्। एतद्विषयेऽन्यत्र मया विस्तरेणालेखि।

तैत्तिरीयप्रातिशाख्ये उच्चारणस्थानानि

		स्थानम्	करणम्
१	अकारस्य	हनू	ओष्ठौ
२	ओकारस्य	हनू उत्तरोष्ठश्च	अधरोष्ठः
३	एकारस्य	हनू तालु च	ओष्ठौ जिह्वामध्यं च
४	ऋकारस्य ॠकारस्य ऌकारस्य च	वर्त्मा:	जिह्वाग्रं हनू च
५	इकारस्य	तालु जिह्वाया अधस्तनः प्रदेशश्च	जिह्वामध्यम्
६	उकारस्य	उत्तरोष्ठः	अधरोष्ठः
७	ऐकारस्य	हनू तालु च	ओष्ठौ जिह्वामध्यं च
८	औकारस्य यदुपसंहरति	हनू उत्तरोष्ठश्च तत् करणम्	अधरोष्ठः (तै० प्रा० अ० २ सू० ३२) इति सूत्रे भाष्ये तु ओष्ठौ

		स्थानम्	करणम्
१	अकारस्य		ओष्ठौ
२	इवर्णस्य		तालु जिह्वा च
३	उवर्णस्य		अधरोष्ठः
४	ऋकारादीनाम्		ओष्ठौ, हनू, जिह्वा च
५	एकारस्य		ओष्ठौ
६	ऐकारस्य		जिह्वा ओष्ठौ च
७	ओकारस्य		ओष्ठौ
८	औकारस्य		ओष्ठौ

अथ व्यञ्जनानां तैत्तिरीयप्रातिशाख्योक्तानि उच्चारणस्थानानि

१	कवर्गस्य जिह्वामूलीयस्य च	हनुमूलम्	जिह्वामूलम्
२	चवर्गस्य, शकारस्य च	तालु	जिह्वामध्यम्
३	टवर्गस्य षकारस्य च	मूर्धा	प्रतिवेष्टितम् जिह्वाग्रम्
४	तवर्गस्य सकारस्य च	दन्तमूलम्	जिह्वाग्रम्
५	पवर्गोपध्मानीययोः	उत्तरोष्ठः	अधरोष्ठः
६	यकारस्य	तालु	जिह्वाया यौ मध्यौ तयोरन्तौ
७	रेफस्य	दन्तमूलस्याभ्यन्तरो-परिभागः	जिह्वाग्रस्य यन्मध्यं तन्निष्ठः प्रदेशः
८	लकारस्य	दन्तमूलप्रत्यासन्नप्रत्यक्-प्रदेशः	जिह्वाग्रमध्यम्
९	वकारस्य	दन्ताः	अधरोष्ठस्य बाह्याभ्यन्तरौ अन्तौ
१०	हकारविसर्गयोः	कण्ठः	कण्ठः

अन्तःस्थानां करणान्तव्यापारनिष्पाद्यत्वाद् अन्तःस्थात्वम्।
ऊष्मणां करणमध्यं तु विवृतं भवति तेनैतेषां विवृतप्रयत्नता।

		स्थानम्	करणम्
११	पञ्चमान्तस्थान्युग्रस्य हकारस्य	उरः	उरः

माध्यन्दिनानुसारं शरीराद् निर्गच्छतो वायोस्त्रीणि स्थानानि—उरः, कण्ठः, शिर इति। द्व करणे संवृतविवृते इति।

१	त्रिविधस्य ऋकारस्य कवर्गस्य जिह्वामूलीयस्य च	जिह्वामूलम् १	हनुमूलम्
२	इकारत्रयस्य, एकारस्य चवर्गस्य शकारस्य यकारस्य च	तालु २	जिह्वामध्यम्
३	षकारस्य टवर्गस्य च	मूर्धा ३	प्रतिवेष्टितम् जिह्वाग्रम्
४	रेफस्य	दन्तमूलम्	जिह्वाग्रम्
५	त्रिविधस्य लृकारस्य तवर्गस्य लकारस्य सकारस्य च	दन्ताः ४	जिह्वाग्रम्
६	त्रिविधस्योकारस्य ओकारस्य तवर्गस्य वकारोपध्मानीययोः	ओष्ठः ५	ओष्ठः
७	त्रिविधस्य अकारस्य, हकारस्य विसर्जनीयस्य च	कण्ठः ६	हनुमध्यम्
८	ऐकारस्य	कण्ठतालु	जिह्वामध्यम्
९	औकारस्य	कण्ठोष्ठम्	ओष्ठः
१०	यमानुस्वारनासिक्यानाम्।	नासिके ७	
११	वकारस्य	ओष्ठः	दन्ताग्रम्
१२	यमानाम्	नासिका	नासिकामूलम्

		स्थानम्	करणम्
१३	अनुस्वारस्य	नासिका	हनुमूलम्
१४	हुँ इति नासिक्यस्य	नासिका	नासिका
१५	अन्तस्थाः पञ्चमयुक्तस्य हकारस्य	उरः	उरः (अत्र शिक्षा-मूलम्)

ऋक्प्रातिशाख्यानुसारम्

१	अवर्णस्य विसर्गस्य हकारस्य च	कण्ठः १	(१) स्पृष्टं स्पर्शानाम् अस्थितम्
२	केषाञ्चिन्मते हकारस्य विसर्गस्य च	उरः २	(२) दुःस्पृष्टं यरलवानाम्
३	त्रिविधस्य ऋकार-ऌकारस्य च जिह्वा-मूलीयस्य कवर्गस्य च	जिह्वामूलम् ३	(३) अस्पृष्टं स्वराणाम् अनुस्वारस्य ऊष्मणां च···स्थितम्
४	एकारस्य इकारस्य च चवर्गस्य यकारशकारयोश्च।	तालु ४	एकेषां मते हकारस्य
५	षकारटवर्गश्च	मूर्धा	विसर्जनीयस्य च स्पृष्टं दुःस्पृष्टं वा करणम्।
६	तवर्गस्य सकारस्य रेफलकारयोश्च	दन्तमूलम् ६	
७	रेफस्य कस्यचिन्मते	वर्त्वम् ७	
८	त्रिविधस्य उकारस्य ओ, औ पवर्गोपध्मानीययोश्च।	ओष्ठः ८	
९	यमानुस्वारयोः	नासिका ९	
१०	लकारस्य	जिह्वामूलं तालु च	
११	यमानाम्	नासिका, प्रकृत्याश्रयं यत् स्थानं तदपि स्थानम्	

सामप्रातिशाख्यानुसारम्

	वर्णाः	स्थानम्	करणम्
१	हकारः, अकारः, विसर्जनीयश्च आकारः	कण्ठः	अत्र करणनिर्देशो नास्ति।
२	विसर्जनीयः	उरः	
३	कवर्गः, ऋकारः, ऋकारः, जिह्वामूलीयः	जिह्वामूलम्	
४	इकारः, ईकारः, एकारैकारौ, शयौ, चवर्गः	तालु	
५	तवर्गलकारसकाराः	दन्ताः	
६	रेफः	दन्तः	
७	रेफः	दन्तमूलम्	
८	पवर्गः, ओकारौकारौ उकारः, ऊकारः, वकारः उपध्मानीयः	ओष्ठः	
९	किट्किडाकारौ	हनु	
१०	पकारनकारपकाराः (संस्वादः)		
११	हकारमकारनासिक्याः निगारः	अविशेषः स्थानम्	
१२	यमानुस्वारनासिक्याः	नासिका,	

सामप्रातिशाख्यमतेन वर्णानां स्थानादीनि

	दीर्घः	स्थानम्	अत्र करणनिर्देशो
१	ह अ आ विसर्जनीयः	कण्ठः	नास्ति।
२	विसर्ग एकीयमते	उरः	
३	जिह्वामूलीयः कवर्गः, द्विविध ऋकारः।	जिह्वामूलम्	

४	शकारः चवर्गो द्विविधः इकार एकारश्च	तालु
५	षकारः, टवर्गः	मूर्धा
६	तवर्गसकारलकाराः	दन्ताः
७	रेफः	दन्तमूलं दन्तो वा
८	वकारः उ, ऊ ओ औ, पवर्ग उपध्मानीयः	ओष्ठौ
९	संस्वादनिगारौ	अविशेषस्थानौ
१०	पकारनकारयकाराः	संस्वादे
११	हकारमकारनासिक्याः	निगारे
१२	यमानुस्वारनासिक्याः	नासिका

अथर्वप्रातिशाख्ये मूले केषां किं स्थानमिति नोक्तम्, किन्त्वथर्ववेदीयमाण्डूक्यशिक्षायाम्—

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च॥

शिक्षासंग्रहे माण्डूक्यशिक्षा पृ० ४६९ श्लो० ६८ इत्यनेनाष्टौ स्थानान्युक्तानि। तानि चाथर्वणिकैर्मन्तव्यानि। किञ्च, वाजसनेयिभिरेषां साम्यं दृश्यतेऽतस्तैर्वाजसनेय्यभिमतान्येव स्थानानि स्वीकार्याणि। अतः संक्षिप्ता संकलिता पट्टिका परिदर्श्यते—

	वर्णाः	स्थानानि	करणानि
१	अ आ आ ३ ह-विसर्जनीयानाम्	कण्ठः	अधरकण्ठः
२	त्रिविध ऋकारकवर्ग-जिह्वामूलीयानाम्	जिह्वामूलम्	हनुमूलम्
३	इ ई ई ३ ए श य चवर्गाणाम्	तालु	मध्यजिह्वम्
४	टवर्गस्य	मूर्धा	प्रतिवेष्टितं जिह्वाग्रम्

५	षकारस्य	मूर्धा	द्रोणिका (काष्ठाम्बुवाहिन्याकारा जिह्वा)
६	लृकारस्य तवर्गस्य लसयोश्च	दन्ताः	प्रस्तीर्णं जिह्वाग्रम्
७	ओकारस्य पवर्गस्य उकारस्य वकारस्योपध्मानीयस्य च	ओष्ठौ	अधरोष्ठः
८	यमानां ङञणनमाम्	नासिका	नासिका
९	यमानाम्	आश्रयस्थानता च	नासिका
१०	ऐकारस्य	कण्ठतालु	मध्यजिह्वम् अधरकण्ठश्च
११	औकारस्य	कण्ठोष्ठम्	अधरोष्ठम् अधरकण्ठश्च
१२	रेफस्य	दन्तमूलानि, हनुमूलम्, प्रत्यग्दन्तमूलतो वा	दन्तमूलानि तैत्तिरीये जिह्वाग्रमध्यम्
१३	पञ्चमैरन्तस्थाभिश्च सहितस्य हकारस्य	उरः	अधरकण्ठः

अथ याज्ञवल्क्यशिक्षानुसारवर्णविषये किञ्चिदुच्यते।

तत्र तावद् भगवता पतञ्जलिना —

अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम्। वर्णं वाहुः पूर्वसूत्रे किमर्थमुपदिश्यते॥ (महाभाष्य १-१-पृ-३६) इति महाभाष्ये वर्णशब्दोऽक्षरसमानार्थ उपात्तोऽस्ति। तत्र वर्णशब्दः कमभिप्रायमवलम्ब्य प्राचीनैः प्रयुक्त इति चिन्तायामुच्यते। याज्ञवल्क्यशिक्षादर्शनेन शुक्लादिवर्णार्थकत्वमेवास्य वर्णशब्दस्यायाति। तत्र हि—

स्वरस्पर्शान्तस्थोष्माणः कण्ठ्यजिह्वामूलीयतालव्यमूर्धन्यदन्तौष्ठ्ययमविसर्जनीयरङ्गानुनासिकनिपाताश्च किं वर्णदैवतलिङ्गा इति प्रश्ने—

स्वराः कृष्णाः। अन्तस्थाः कपिलाः। ऊष्माणोऽरुणाः। यमा नीलाः। नासिक्या हरिताः। अनुस्वारः पीतः। जिह्वामूलीयो रक्तः। उपध्मानीयः पीतः। विसर्जनीयः श्वेतः। रङ्गः शबलः। अनुनासिक्योऽतिनीलः। इत्यन्तर्मध्ययोर्नासिक्यं विद्यात्। अनया रीत्या स्वरा वर्गाणां प्रथमाश्च ब्राह्मणाः। द्वितीयास्तृतीयाश्चतुर्थाश्च क्षत्रियाः। वर्गाणां पञ्चमा अन्तस्थाश्च वैश्याः। ऊष्माणो हकारश्च शूद्राः। स्वरा विसर्जनीया यमाश्च पुंलिङ्गकाः। प्रथमा अन्तस्थाश्च स्त्रीलिङ्गाः। शेषाण्यक्षराणि षण्ढानि।

सन्धिश्चतुर्विधो ज्ञेयः, लोपागमवर्णविकाराः प्रकृतिभावश्चेति। अयं हि शिक्षाकारो वर्णशब्दस्याक्षरेषु प्रयोगस्य मूलं प्रदर्शयितुं ब्राह्मणादिषु नीलपीतादिरूपेषु च पौर्वकालिकं प्रयोगं मत्वा पूर्वोक्तां रीतिमुपास्थापयत्।

विवृत्तिश्चतुर्विधा—

(१) स्वरयोर्मध्ये यत्र सन्धिर्न दृश्यते सा पिपीलिका, (२) पाकवती, (३) वत्सानुसारिणी, (४) वत्सानुसृता चेति।

(१) आद्यन्तदीर्घा पिपीलिका, (२) उभयतो ह्रस्वा पाकवती, (३) वत्सानुसारिणी, (४) वत्सानुसृता। यद्यपि पुस्तकेषु अनुसृजितेति पाठो दृश्यते, तथापि तस्याशुद्धत्वादग्राह्यत्वम्। करिणी, कुर्विणी, हरिणी, हारिता, हंसपदा चेति पञ्च।

तैत्तिरीयप्रातिशाख्यभाष्ये (अ० २२ सू० १३) "ह्रस्वादिर्वत्सानुसृतिरन्ते वत्सानुसारिणी। पाकवत्युभयह्रस्वा दीर्घमध्या पिपीलिका॥" इत्यासां चतसृणां लक्षणमुक्तम्।

"मातृका वत्सानुसृतिस्तथा वत्सानुसारिणी। पादोना स्यात् पाकवती पादमाया पिपीलिका॥" इत्यपि तत्रैव।

पञ्चधा स्वरभक्तिः, सा च रहोयोगे करिणी, लहकारयोः कुर्विणी, हरिणी रशसानां च हारिता लशकारयोः। उदाहरणं तु ऋक्प्रातिशाख्यशीर्षके द्रष्टव्यम्।

अस्यां शिक्षायां तु—

स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत्।
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च॥

(पृ० १७ श्लो० १०३)

स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।
स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम्॥ १०॥
मणिवद् व्यञ्जनान्याहुः सूत्रवत् स्वर इष्यते।
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति स स्वरः॥ ११९॥
ओं३कारो हि प्लुतो ज्ञेयः प्लुतमात्रा द्वितीयकम्।
लाजी३ञ् शाची३न् तृतीयकम् विवेशे३ति चतुर्थकम्॥
अधः स्वि३दासीत् पञ्चमम् उपरि स्विदासीत् षष्ठं च।
सप्तमं तु क्लिबे स्मर अष्टमं नैव विद्यते।
लृकारस्य च दीर्घत्वं नास्ति वाजसनेयिनः॥ १२६॥

अनुस्वारविषये विशेषः—

वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रिकः।
द्विमात्रे मात्रिको ज्ञेयः संयोगाद्यश्च यो भवेत्॥
अनुस्वारो द्विमात्रः स्याद् ऋवर्णव्यञ्जनोदये।
ह्रस्वाद् वा यदि वा दीर्घाद् देवानां हृदये यथा॥ १३८॥
अनुस्वारस्योपरिष्टात् संवृतं यत्र दृश्यते।
दीर्घं तं तु विजानीयात् श्रोता ग्रावाणकं यथा॥ १४०॥
अनुस्वारस्योपरिष्टात् संयोगो यत्र दृश्यते।
ह्रस्वं तं तु विजानीयात् सꣳस्थामिति निदर्शनम्॥ १४१॥
अनुस्वारस्तु यो दीर्घादक्षराच्च भवेत् परः।
स तु ह्रस्व इति प्रोक्तो मन्त्रेष्वेव विभाषया॥ १४२॥

ओभावश्च विवृत्तिश्च शषसा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥ १४३॥
यद्योभावप्रसन्धानमुदात्तादि परं पदम्।
स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः॥ १४३॥
ओभावमागता योष्मा तां तु केलिं विनिर्दिशेत्।
विवृत्तिप्रत्ययादूष्मा विज्ञेया विकटानना॥ १४४॥
पादादौ च पदादौ च संयोगावग्रहेषु च।
लीढातिलीढा विद्युच्च शषसेषु प्रकीर्तिता॥ १४५॥
जिह्वामूले च रेफे च विज्ञेया चपला तथा।
उपध्मानीयसहितां पुष्पिणीं तां विनिर्दिशेत्[1]॥ १४६॥
अन्यत्र या भवेदूष्मा सुलभां तां विनिर्दिशेत्।
ऊष्मप्राधान्यमेतस्य तस्मात्तां यत्नतोऽभ्यसेत्॥ १४७॥
पादाद्यन्तं पदाद्यन्तं तथावग्रहकालिकम्।
ईषत्स्पृष्टं विजानीयात् तस्मिन् काले तु कारयेत्॥ १४८॥

अथ यकारस्य वर्गीयजकारोच्चारणम्—

पादादौ च पदादौ च संयोगावग्रहेषु च।
जः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः॥ १४९॥
उपसर्गपरो यस्तु पदादिरपि दृश्यते।
ईषत्स्पृष्टो यथा विद्युत् पदच्छेदात् परं भवेत्॥ १५०॥
त्वदर्थवाचिनौ वो वां वां वैं यदि निपातजौ।
आदेशाश्च विकल्पार्था ईषत्स्पृष्टा इति स्मृताः॥ १५१॥
विभाषया यकारः स्यात् तथा नेति पदात् परः।
भवतीत्यपि पूर्वैव तथा च सपदादपि॥ १५२॥
यदेव लक्षणं यस्य वकारस्यापि तद्भवेत्।

---

१. 'विदुर्बुधाः' इति पाठान्तरम्।

अथ वकारोच्चारणप्रक्रिया —

यत्र यत्र विशेषः स्याद् इदानीं स तु कथ्यते।
वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः॥
यवर्णस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः।
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः॥ १५६॥
सन्धिजौ तु पदान्तीयावुपसर्गपरौ लघू।
अथ-मा-स-न-शब्देभ्यो विभाषाम्रेडिते यवौ॥ १५७॥
पञ्चमादुत्तरो-यो-वो यदि चैकपदे।
संहितायां लघुः सोऽपि पदकाले गुरुर्भवेत्॥ १५८॥
जात्ये च स्वरिते चैव वकारो यत्र दृश्यते।
उभयोरपि कर्तव्यो व्वायव्व्यैरिति दर्शनम्॥ १५९॥
जात्ये च स्वरिते चैव यकारो यत्र दृश्यते।
कर्तव्य उभयोः क्षेपः सदस्यैरिति दर्शनम्॥ १६०॥
हकारो रेफसंयुक्त ऋवर्णोदय एव वा।
सुस्पृष्टं तं विजानीयाद् यकारो नान्ययुग् यदि॥ १६१॥
उपांशु स्वरितं वापि योऽधीते वित्रसन्नपि।
अपरूपसहस्राणां संदेहेषु प्रवर्तते॥

हकारोच्चारणम्—

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्।
औरसं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्॥ १७७॥
हकारो यत्र पूर्वस्थः अन्तस्थाश्च भवेत् परः।
पदकाले वियुज्येत संहितायां स औरसः॥ १७८॥
मेघदुन्दुभिनिर्घोषो श्रूयते पयसो ह्रदात्।
एवं नादं प्रकुर्वीत सिंहस्य रुदितं यथा॥

मासे भाद्रपदे मेघः शब्दं कुर्वीत यादृशम्।
एवं गह्वरमासाद्य शुक्रं दुदुह्रे निदर्शनम्॥

अथ रङ्गः—

रङ्गे चैव समुत्पन्ने न ग्राह्यं पूर्वमक्षरम्।
स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत्॥ १८९॥
यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते।
एवं रङ्गः प्रयोक्तव्यो ङकारेण विवर्जितः॥
द्विमात्रो मात्रिको वापि नासामूलं समाश्रितः।
अन्ते प्रयुज्यते रङ्गः पञ्चमैः सानुनासिकः॥ १९१॥
अनन्तरं मकारस्य यो रङ्गस्तत्र दृश्यते।
सर्वानुनासिकं विद्यादेषा मध्योपधानिका॥
यरलवाः शषसहा रज्यन्ते चोपधानिकाः।
वर्गान्ते रज्यते यस्तु सर्वैः सर्वानुनासिकः॥
नासादुत्पद्यते रङ्गः कांस्येन समनिस्वनः।
मृदुश्चैव द्विमात्रः स्याद् दृषि माँ इवेति निदर्शनम्॥

अथ सप्तविधाः संयोगपिण्डाः—

अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति।

यमान् विद्यादयस्पिण्डान् सान्तस्थान् दारुपिण्डवत्।
अन्तस्थं यमवर्जं तु ऊर्णापिण्डं विनिर्दिशेत्॥ २०२॥
अन्तस्थयमसंयोगे विशेषो नोपलभ्यते।
अशरीरं यमं विद्यादन्तस्थं पिण्डनायकम्॥ २०३॥
ज्वालापिण्डान् सानुनासिक्यान् सानुस्वारांस्तु मृण्मयान्।
सोपध्मान् वायुपिण्डांस्तु जिह्वामूले तु वज्रिणः॥ २०४॥

तत्रायस्पिण्डो यथा—अग्निः (यजुः २३।१७) पक्कीः (२७।२०)।
दारुपिण्डो यथा—अश्वः। ऊर्णापिण्डो यथा—अश्मन्।

ज्वालापिण्डो यथा—ब्रह्म। मृत्पिण्डो यथा—सꣳस्थाम्। वायुपिण्डो यथा—द्यौष्पिता। वज्रपिण्डो यथा—निष्कृतीः (पृ० ३२ श्लो २०७ अनन्तरम्)।

चतुर्विधं करणम्—स्पृष्टम्, अस्पृष्टम्, संवृतम्, विवृतं चेति। संवृता घोषाः। विवृता अघोषाः। विंशतिर्घोषास्ते गजडदबाः, घझढधभाः, ङञणनमाः, यरलवहाश्चेति। त्रयोदशाघोषास्ते कचटतपाः खछठथफाः शषसाश्चेति।

षडविधमास्यप्रयत्नम्—संवृतम्, विवृतम्, अस्पृष्टम्, स्पृष्टम्, ईषत्स्पृष्टम्, अर्धस्पृष्टं चेति।

अकारः संवृतो ज्ञेय इतो विवृताः स्वराः।
सर्वे च ते स्युरस्पृष्टाः स्पर्शाः स्पृष्टा भवन्ति हि ॥२०९॥
ईषत्स्पृष्टास्तथान्तस्थाः ऊष्माणोऽर्धस्पृशः स्वराः।

परमेतादृशो विभागो न युज्यते। यथा सिद्धान्तकौमुद्यामाभ्यन्तरप्रयत्ननिरूपणे—

स्पृष्टम्, ईषत्स्पृष्टम्, विवृतम्, संवृतं चेति। भाष्यमते तु सप्तप्रयत्नाः, एते चत्वार ईषद्विवृतम्, विवृततरम्, विवृततमं चेति त्रयोऽधिकाः। याज्ञवल्क्यरीत्या यदि विभाग इष्टश्चेत् तर्हि प्रयत्नो द्विधा भिद्यते—अस्पृष्टः, स्पृष्टश्चेति। अस्पृष्टो द्विधा—संवृतं विवृतं च। स्पृष्टं तु त्रिधा—स्पृष्टम्, ईषत्स्पृष्टम्, अर्धस्पृष्टं चेति।

सामान्यं भजते वर्णः सस्थमकरणस्य हि। (२१०)
ऋलोर्मध्ये भवत्यर्धमात्रा रेफलकारयोः।
तस्मादस्पृष्टता न स्याद् ऋलृकारनिरूपणे॥

तथा चायं स्पष्टोऽर्थः—सर्वे च ते स्युरस्पृष्टा इत्यत्र स्वरेषु ऋऌकारौ नहि अस्पृष्टौ। अपि चायमंशः स्वरात् पूर्वभावीनि व्यञ्जनानीति दृढीकरोति।

वर्गाणां प्रथमा द्वितीयाः शषसाश्चाघोषाः, घोषास्त्वन्ये। परमत्र पुनरुक्तिः प्रतीयते घोषाघोषयोः पूर्वमेवोपपादनात्।

दशधा वर्णा भवन्ति—उरस्य-कण्ठ्य-मूर्धन्य-तालव्य-दन्त्य-ओष्ठ्य-दन्तमूलीय-जिह्वामूलीय-यमा अनुस्वाराश्च।

तत्र द्वावुरस्यौ-ह्ह-ह्य इति। एतन्न युक्तम्, अत्र एक एव हकारोऽस्ति। उत्तरवर्णभेदेन भेदे तु सर्वे पञ्चमाः, सर्वे अन्तस्थाश्च भेदकाः स्युः। त्रयः कण्ठ्या अवर्णहकारविसर्जनीयाः। षण्मूर्धन्याः षकारटवर्गाश्च। नव तालव्या इवर्णचवर्गशकारैकारयकाराः।

अष्टौ दन्त्या ऌवर्णलकारशकारतवर्गाः।

अष्टौ ओष्ठ्या उवर्णवकारोपध्मानीयपवर्गाः। एको दन्तमूलीयो रेफः। सप्त जिह्वामूलीया ऋ ५ कौ कवर्ग इति। चत्वारो यमाः कुं खुं गुं घुं इति। रुक्मेति प्रथमः, सक्ष्मा इति द्वितीयः, विघ्ना इति तृतीयः, जम्भे दघ्न इति चतुर्थः।

अपञ्चमैश्चैकपदे संयुक्तं पञ्चमात् परम्।
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य हि॥
पञ्चमाः शषसैर्युक्ता अन्तस्थैर्वापि संयुताः।
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः॥

अस्यां स्थितौ ऐकारस्य, औकारस्य, ओकारस्य च स्थानानि नोक्तानीति महती न्यूनता।

आद्या मात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेत्।
तालव्यस्य तथौष्ठ्यस्य च द्वितीया च यथाक्रमम्॥

अत्र एकारस्य इति पाठोऽशुद्धः। ऐकारस्येति युक्तः पाठः, एकारस्य तालुस्थानमिति पूर्वमुक्तत्वात्। यदि च—"अर्धमात्रा तु कण्ठ्यस्य ऐकारौ-

कारयोर्भवेत्। तालव्यस्य तथौष्ठ्यस्य द्वितीया च यथाक्रमम्॥" इत्यनेन ऐकारस्य औकारस्य च स्थाननिर्देशः कृत एवेति मन्यते चेत्, तदा ओकारस्थानानुक्तिस्तु दोषो विद्यत एवेति।

अस्यां शिक्षायां ग्राह्या अंशा मया गृहीतास्तत्र कश्चन विचारोऽपि प्रदर्शितः। अन्याः शिक्षा अपि अर्वाचीना एव। तथापि तत्र नह्यपूर्वः कोऽप्यंशोऽवलोक्यत इति तद्विचाराद् विरम्यते।

प्राच्यविद्याप्रतिष्ठानसंस्थाद्वारा मुद्रितानि शिक्षासूत्राणि मयावलोकितानि। तत्र तिस्रः शिक्षा मुद्रिताः सन्ति। तासु एका आपिशलिशिक्षा, द्वितीया पाणिनिशिक्षा, तृतीया चन्द्रगोमिविरचिता शिक्षा। अत्र विचार्यते—तैत्तिरीयप्रातिशाख्ये (अ० १ सू० १४) वैदिकाभरणे (पृ०७३) 'सृक्किणीस्थानमवर्णमेके' इति शिक्षासूत्रमुद्धृतम्। परमत्र पाणिनिशिक्षायाम्—'वकारो दन्त्योष्ठ्यः' एतदनन्तरम्—'सृक्किणीस्थानमेके' इति सूत्रं लिखितमस्ति। एतच्च वैदिकाभरणशिक्षावचनविरुद्धं प्रतीयते। आपिशलिशिक्षायामपि 'वकारो दन्त्योष्ठ्यः' एतदनन्तरम्—'सृक्कस्थानमेके' इति सूत्रं लिखितम्, तस्यापि तादृशी एव गतिः। अपि च चान्द्रसूत्रेषु 'ताभ्यामप्याकारस्य' (सू० २६) एतेनैचोऽपेक्षया ह्रस्वाकारो विवृततमः। अयं हि गौडब्राह्मणैः साम्प्रतमुच्चार्यते।

परमथर्वप्रातिशाख्ये 'ततोऽप्याकारस्य' (अ० प्रा० १।३५) इत्यनेन सूत्रेण दीर्घाकारस्य अत्यन्तं विवृततमत्वस्योक्त्या अत्रापि चन्द्रगोमिशिक्षायां 'ततोप्याकारस्य' इत्येवमेव पठनीयम्।

आपिशलिशिक्षाविषये पुनरपि विचार्यते—

आपिशलिर्हि पाणिनेः प्राचीन इति निर्विवादम्। यदि तेनैवापिशलिना एषा शिक्षा निर्मिता अभविष्यत्तर्हि तस्यां शिक्षायाम् ऊष्मणा-

मीषद्विवृतत्वस्य स्वराणां तु विवृतत्वस्य सिद्ध्या पाणिनिः 'नाज्झलौ' इति सूत्रं न निरमास्यत्। एतेनापि प्रायोऽधुनोपलभ्यमानाः शिक्षा यन्नाम्नाऽङ्किताः सन्ति न तैरुपनिबद्धा इति निश्चितम्। दृश्यतां पाणिनिशिक्षायामपि। तत्रापि 'ईषद्विवृतकरणा ऊष्माणः, विवृतकरणा वा' इति सूत्रद्वयमुपन्यस्तम्। एतेनापि नहि पाणिनिनैषा शिक्षा निर्मितेत्यायाति। प्रत्युत पद्यरूपायां पाणिनिशिक्षायां 'स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्' इत्युक्त्या सूत्ररूपशिक्षातः सैव प्राचीना प्रतीयते।

किञ्च, ऋषभदेवकृतायां टीकायाम् (पृ० १०५) "तथेत्यापिशलिशिक्षादर्शनम्" इत्युक्तम्। अस्यामापिशलिशिक्षायां नाभिप्रदेशादित्यादिरूपेण पाठाभावात्, अपि च "इत्येवमादि प्रतिशाखं शिक्षासु भिन्नमार्गमदर्शनं दृश्यमानं सर्वं प्रपञ्चेन समर्थयितव्यम्" इति भर्तृहरेरुक्त्या शिक्षाः प्रतिशाखं भिद्यन्त इति। इयमापिशलिशिक्षा किं शाखीयेति निश्चित्यास्याः प्रामाणिकत्वमास्थेयम्। इत्यलमैतिह्यासिकार्थविचारेण, अस्य मद्विषयाभावात्।

किञ्च, पाणिनिशिक्षासूत्रेषु 'ईषद्विवृतकरणा ऊष्माणः' इति लिखितम्, तच्च,'नाज्झलौ' इति सूत्रयतः सूत्रकारस्य मतेन विरुद्धम्। यदि पाणिनीयपदेन भाष्यमतमप्यभीप्सितं चेत् तर्हि विवृततरविवृततममयोरनुक्त्या न्यूनता। तथा च नैतानि सूत्राणि प्रामाणिकानि मन्तव्यानि। यद्यपि न्यासादिग्रन्थेषु कानिचित् सूत्राण्युद्धृतानि सन्ति, तथापि तदन्तःपातिनां केषाञ्चित् सूत्राणां समूलत्वेऽपि सर्वेषां समूलत्वे मानाभावः।

किञ्चापिशलिसूत्रे पाणिनिशिक्षासूत्रे च 'सरेफ ऋवर्णः' (सू० २६) इति सूत्रानन्तरं 'सल्कारम् ऌवर्णम्' इति सूत्रमावश्यकमिति टिप्पण्यां लिखितोक्तिः 'सल्कारम् ऌवर्णम्' (अ० प्रा० १।३९) इत्यथर्वप्रातिशाख्य सूत्रेण परिपुष्यते। ग्रन्थगौरवभयान्न मया विस्तरेण तेषां सूत्राणां

विषयेऽनुसन्धानं कर्तुमिष्यते। सम्भाव्यते यदपरे केचन तथा प्रयत्नं कुर्युरिति।

'महति वायौ महाप्राणा अल्पे वायावल्पप्राणाः' (तै० प्रा० अ० २ सू० ११ वैदिकाभरणे), आपिशलिशिक्षासूत्रे 'महति वायौ महाप्राणः' (आ० शि० १६), 'अल्पे वायावल्पप्राणः' इति सूत्रद्वयं पूर्वोद्धृतशिक्षा-वचनाभ्यां सङ्गतं भवति। 'विवृतमूष्मणां स्वराणां च संवृतमकारस्य' (तै० प्रा० सू० ४७ वैदिकाभरणे), नेदृशं सूत्रं पूर्वोक्ते शिक्षासूत्रेऽवलोक्यते। तदुक्तमापिशलिशिक्षायाम् 'स्पर्शयमवर्णकरो वायुरयःपिण्डवत् स्थानमापीडयति। अन्तस्थावर्णकरो वायुर्दारुपिण्डवत्। ऊष्मस्वरवर्णकरो वायुरूर्णापिण्डवत् (तै० प्रा० अ० २१ सू० २ वैदिकाभरणे) इति। प्राच्यविद्याप्रतिष्ठानसंस्थायां मुद्रितायां शिक्षायामयमंशोऽस्ति केवलं तत्र कार इति पाठभेदः। एवंरूपेण उद्धृता अंशाः सूचयन्ति यदिमास्तिस्रः शिक्षा निर्मूला न सन्ति। अतोऽत्र मया सिंहावलोकनन्यायेन ताः परीक्ष्यन्ते। तत्र प्रथममापिशलिशिक्षासूत्राणि—

तत्र स्थानकरणप्रयत्नेभ्यो वर्णास्त्रिषष्टिः (सू० ४)।

वर्णानां त्रिषष्टिः संख्या पूर्वं परीक्षिता, अतोऽत्र नैव विचार्यते।

अकुहविसर्जनीयाः कण्ठ्याः (सू० ७)।

हविसर्जनीयावुरस्यावेकेषाम् (सू० ८)।

जिह्वामूलीयो जिह्वयः (सू० ९)।

कवर्गावर्णानुस्वारजिह्वामूलीया जिह्वा एकेषाम् (१०)।

ऋक्प्रातिशाख्ये ऋकारलृकारयोः, जिह्वामूलीयस्य, कवर्गस्य च जिह्वामूलं स्थानं निर्दिष्टम् (ऋक० प्रा० पृ० १ सू० ४१)। अवर्णस्य तु कण्ठः स्थानम् (ऋक्० प्रा० पृ० १ सू० ३८)। तथा च ऋकारलृकारयोर्जिह्वामूलं स्थानम् ऋक्प्रातिशाख्यमतेनेति भेदः। अत्र हि लृतुलसा दन्त्याः (सू० १५), ऋटुरषा मूर्धन्याः (सू० १३)। आभ्याम् लृकारस्य

दन्त्यत्वम्, ऋकारस्य तु मूर्धप्रभवत्वम्। 'रो दन्तमूलस्थानमेकेषाम्' (सू० १४)। अयमेवार्थ ऋक्प्रातिशाख्ये 'रेफं वर्त्वमेके' (ऋक्० प्रा० पृ० १ सू० ४६) इति सूत्रेण वर्त्वः स्थानं प्रतिपाद्यते। वर्त्वपदेन दन्तमूलादुपरितन ऊच्छूनः प्रदेश उच्यते। 'सकाररेफलकाराश्च' (ऋक्० प्रा० पृ० १ सू० ४५), 'लृतुलसा दन्त्याः' (सू० १५), ऋक्प्रातिशाख्यानुसारं तु लृकारस्य जिह्वामूलप्रभवत्वं प्रतीयते। 'दन्तमूलीयस्तु तकारवर्गः' (ऋ० प्रा० पृ० १ सू० ४४), सकाररेफलकाराश्च (ऋक्० प्रा० पृ० १ सू० ४५) इत्याभ्यां सूत्राभ्यामपि तवर्गलकारसकाराणां दन्तमूलीयत्वमायाति। 'वकारो दन्त्योष्ठ्यः' (सू० १६), 'शेष ओष्ठ्योऽपवाद्य नासिक्यान्' (ऋक्० प्रा० पृ० १ सू० ४७) इति ऋक्प्रातिशाख्यबलात् केवलोष्ठप्रभवत्वं वकारस्योच्यते। 'सृक्कस्थानमेके' (सू० १७) इति सूत्रे ओष्ठप्रान्तद्वयप्रभवत्वं विज्ञायते। अयमंश ऋक्प्रातिशाख्येन संवदते। 'उपूपध्मानीया ओष्ठ्याः' (सू० १८) ऋक्प्रातिशाख्येणाप्ययमेवार्थः प्रोच्यते। 'अनुस्वारयमा नासिक्याः' (सू० १९), 'कण्ठनासिक्यमनुस्वारमेके, (सू० २०), 'अनुस्वारोत्तमा अनुनासिकाः' (तै० प्रा० पृ० २-३०)। तैत्तिरीयप्रातिशाख्येनायमर्थः साम्यं भजते। 'यमाश्च नासिक्यजिह्वामूलीया एकेषाम्' (सू० २१)। एकेषां मतेन, 'अत्र यमोपदेशः' (ऋ० प्रा० अ० २ सू० ५०) इत्यनेन च स्थानद्वयवत्त्वमायाति।

करणप्रकरणम्

'जिह्वयतालव्यमूर्धन्यदन्त्यानां जिह्वाकरणम्' (सू० २)। 'जिह्वामूलेन जिह्वयानाम्' (सू० ४), 'जिह्वामध्येन तालव्यानाम्' (सू० ५), 'जिह्वोपाग्रेण मूर्धन्यानाम्' (सू० ६)। तैत्तिरीये तु जिह्वाग्रेण मूर्धन्यानाम्। किञ्च, मूर्धन्यानां जिह्वाग्राधःकरणमपि 'जिह्वाग्राधःकरणं

१. "प्रान्तावोष्ठस्य सृक्कणी" इत्यमरः।

वा' (सू० ७) इति सूत्रेण प्रतिपाद्यते । [1]'शेषाः स्वस्थानकरणाः' (सू० ९) इति सूत्रेण शेषाणां स्वस्थानकरणत्वमुक्तम् । परं यकारविषये जिह्वामध्यान्ताभ्यां यकारे (तै० प्रा० अ० २ सू० ४०) इत्यनेन जिह्वाया मध्यभागस्य यावन्तौ तावेव करणम् । अन्यत् सर्वं तैत्तिरीयप्रातिशाख्यशीर्षके द्रष्टव्यम् । विस्तरभिया नोच्यते ।

प्रयत्नप्रकरणम्

४—तत्र स्पृष्टकरणाः स्पर्शाः

५—ईषत्स्पृष्टकरणा अन्तस्थाः

६—ईषद्विवृतकरणा ऊष्माणः

७—विवृतकरणाः स्वराः

८—तेभ्य ए ओ विवृततरौ

९—ताभ्यामै औ

१०—संवृतोऽकारः

११—इत्येषोऽन्तः प्रयत्नः

'नाज्झलौ' (पा० १।१।१०) इति सूत्रे भाष्यम्—"स्पृष्टं करणं स्पर्शानाम्[1] । ईषत्[2]स्पृष्टमन्तस्थानाम् । विवृत[3]मूष्मणाम् । ईषत्[4]दित्येवानुवर्तते । स्वराणां च विवृतम् । ईषद् इति निवृत्तम् । अत्रैव टिप्पण्यां कश्चनाह—"चत्वारि शौनकप्रातिशाख्यसूत्राणि बोध्यानि" इति, तन्न युक्तम्, शौनकप्रातिशाख्ये तथा सूत्रपाठाभावात् ।

भगवान् पतञ्जलिः कस्याः शिक्षाया वचनान्युदाजहारेत्यन्वेषणीयम् , सम्प्रत्युपलभ्यमानासु शिक्षासु तथा पाठाभावात् । पदमञ्जर्यां

---

१. तै० प्रा० अ० २ सू० ४६ वैदिकाभरणटीकायाम् 'शेषाः स्थानकरणाः' इत्यापिशलिशिक्षावचनमुद्धृतम् ।

तु (भा० १ पृ० १८५० १४)—तथा च शिक्षा विवृतकरणाः स्वराः। तेभ्य ए ओ विवृततरौ, ताभ्यामै औ। ताभ्यामप्याकारः। संवृतोऽकार इति। तथा च 'ताभ्यामप्याकारः' इति सूत्रमापिशलिशिक्षायां परित्यक्तम्।

किञ्चास्यामापिशलिशिक्षायां प्रारम्भे चतुर्थसूत्रे 'स्थानकरणप्रयत्नेभ्यो वर्णास्त्रिषष्टिः' इति प्रतिज्ञाय त्रिषष्टित्वं सम्यङ् नोपपादितम्। वर्णानां भेदः कया रीत्या भवतीत्यनुपपादयन् सूत्रकारः कथं त्रिषष्टित्वं व्यवस्थापयिष्यतीति त्रुटिः। अष्टादशप्रभेदगणनया तु संख्याधिक्यम्। तस्मादपूर्णेयं शिक्षा।

अपि च 'हविसर्जनीयावुरस्यावेकेषाम्' इति मतेन सर्वस्यापि हकारस्योरस्यत्वं प्रतिपादयत् सूत्रमपूर्णतामेवास्याः शिक्षायाः सूचयति।

सम्प्रत्यन्यां शिक्षामविचार्य केवलं सूत्ररूपा पाणिनिशिक्षा समालोच्यते। तत्रादौ 'वर्णास्त्रिषष्टिः' इत्युक्त्वा त्रिषष्टित्वं नैव व्यवस्थापितम्। कया रीत्या वर्णभेदो भवतीत्यपि नोद्दिष्टम्। 'सरेफ ऋवर्णः' इति सूत्रमुपन्यस्य सलकार ऌवर्ण इति नोपन्यस्तम्। ईषत्स्पृष्टयोर्ऋकारऌकारयोरनुक्त्या चेयं शिक्षा नहि पाणिनीया प्रतिभाति। यमानां स्वरूपं पूर्णतयाऽप्रदर्शयन् एतद्ग्रन्थकारोऽनार्षत्वं व्यनक्त्यस्याः शिक्षाया इति।

[1]परिशिष्टम्–१

मानवस्वरोच्चारणयन्त्रम्

उवाच मे वरुणो मेधिराय
त्रिः सप्त नामाघ्न्या बिभर्ति।
विद्वान् पदस्य गुह्या न वोचद्
युगाय विप्र उपराय शिक्षन्॥
(ऋग्वेदे, ७।८७।४)



स्वभावसिद्धमिदं मनुष्याणां यदुच्चारणयन्त्रस्यातिसूक्ष्मत्वेनावस्थानाच्चलनाच्च प्रत्येकव्यक्तेरुच्चारणं व्यक्त्यन्तरापेक्षया किञ्चिद् विभिन्नं

१. अत्र पाश्चात्यमतेन वर्णोच्चारणप्रक्रिया प्रदर्श्यते।

विलक्षणञ्चानुभूयते। एवं कथमपि सूक्ष्मनियमैर्लिपिबद्धा भाषा काप्युच्चारितभाषायास्तुल्यतां नारोहति। एकस्य पुरुषस्य पुरुषान्तरापेक्षया युगस्य वा युगान्तरापेक्षया तत्तद्ध्वन्युच्चारणभेदे इमौ सजातीयशारीरिकभेदौ हेतुत्वेन पर्यवस्यतः।

(क) विभिन्नपुरुषाणामुच्चारणस्थानानां निर्माणचलनयोर्नैसर्गिकतया भेदः।

(ख) उच्चारणस्थानानां करणानां चावस्थितिचलनयोर्विभिन्नवर्णोच्चारणे निकटसादृश्यम्।

अतो विभिन्नध्वनीनामुच्चारणं शरीरस्य तत्तदुच्चारणस्थानानां करणानाञ्च सूक्ष्मावस्थितिचलनप्रक्रियामपेक्षत इति तादृशोच्चारणप्रक्रियामेव निरूपयिष्यामः।

वर्णोच्चारणप्रक्रिया

साधारणश्वसनसमये हृत्पिण्डपर्यन्तं नीतः श्वासवायुः कुक्ष्युरसोमांसपेशीसम्प्रसारणेन पुनर्बहिर्गतः सन् श्वासमार्गेण (स्वरनालीकम्पनपूर्वकं वा) कण्ठनालमुद्गच्छति। तदुद्गमनं चोभयपार्श्वस्थघोषन्त्र्योर्मध्ये भवति, तन्त्र्यौ तु निश्चले स्तः। कण्ठनालतो गलमुखे कण्ठाग्रे वा प्रवेशसमये ततश्च जिह्वाकण्ठादिस्थानेषु निर्गमावसरे तत्तत्स्थानानां[1] तदनुबन्धं किमपि कार्यं स्पन्दो वा न भवति। अयं साधारणश्वसनप्रकारः। कफादिविकारकृतबाधा वायोश्चेदस्मिन् ध्वनिर्नैवोपपद्यते। क्वाचित्क ईषद्ध्वनिस्तु वायुस्रोतसो निर्गमनपार्श्वाभ्यां नैसर्गिकसंघर्षणेनानुभूयते। संघर्षणाधिक्ये ध्वन्याधिक्यं तत्स्पष्टताधिक्यं वानुभूतं स्यात्, परं ध्वनिरेष [2]उच्चारणात्मको नैव।

१. वायुगमननिमित्तमित्यर्थः।
२. सार्थकवर्णात्मक इत्यर्थः।

श्वसनस्योच्चारणात्मकवर्णरूपेण परिणामस्तु वायुनिर्गममार्ग-स्थानां तत्तत्स्थानानां मांसपेशीनां प्रसारणात्मककार्यमपेक्षते। हृत्पिण्ड-स्थानाद् वायोर्निर्गमनं तु सवेगं प्रयत्नापेक्षमूर्मिरिवास्ते। ऊर्मिगतिको वायुवेगोऽसौ स्वेप्सितवर्णजननेच्छया कदा स्वमार्गस्थघोषतन्त्र्यावुत्क-स्पयति, कदा वा घोषतन्त्र्यौ मुक्ते स्वतन्त्रे स्तः। अस्मिन्नेव घोष-तन्त्रीस्थाने प्राथमिक उच्चार्यमाणवर्णमूलभूतो ध्वनिरुत्पद्यते। घोष-तन्त्र्योरुपरि वर्तमानमावर्तकयन्त्रं (Glottis) त्यक्त्वा यदा वायुवेगो गलमुखं ततश्च कण्ठताल्वादिस्थानान्याहन्ति, तदा स्वेप्सिता विभिन्न-ध्वनय उत्पद्यन्ते। मुखमार्गश्च तत्तत्स्थानेषु वायुवेगस्य निर्गमसमये सङ्कुचितः प्रलम्बितः कदा वा रुद्धः सन् अतिशीघ्रं विभिन्नाकारान् भजते। भाषातत्त्वज्ञैस्तत्तत्स्थानाहतवायुजातस्य सूक्ष्मशब्दस्यावधारणार्थम् (Laryngoscope) इत्याख्यो यन्त्रविशेषोऽप्याविष्कृतः। तत्तत्स्था-नेष्वाहत्य श्वसनवायोः शब्दत्वेन विपरिणाम उपरिष्टाल्लेखिष्यमाण-शारीरस्थानानि नियोज्यन्ते।

(क) कण्ठनालः, अलिजिह्वा, घोषतन्त्र्यौ च।

कण्ठनालः स्वमांसपेशीनां संकोचनादिकार्यैः संकुचित उन्नीतोऽ-धोनीतश्च भवति। अस्य नालस्य मध्यप्रदेशे पिधानात्मकचर्मयन्त्रं गलमुखस्य कण्ठाग्रस्य वा (Pharynx) द्वारसदृशं वायुस्रोतोनिय-न्तृत्वेन वर्तते। अस्य च पिधानरूपयन्त्रस्योभयोः पश्चादग्रपार्श्वयोः चर्मतन्तू घोषतन्त्र्यावित्युच्येते। अनयोश्च घोषतन्त्र्योर्मध्येऽर्धाङ्गुल-परिमितं ($\frac{3}{4}$ of an inch) छिद्रं वर्तते। पुरुषाणां चैतच्छिद्रमधिकम्, स्त्रीणान्तु न्यूनमिति विशेषः। एवमपि जिह्वोपजिह्वादीनां तत्रत्यमांस-पेशीक्रियाद्वारा वर्णोच्चारणे कारणताऽभ्युपगन्तव्या। तत्रोपजिह्वाया (घण्टिका) वर्णानां सानुनासिकत्वेन नियन्त्रणे हेतुतेति स्वयमूहनीयम्।

वर्णितमेतत् पूर्वं यद् मुखस्य व्यादानं संयुक्तिर्वा भवतु, यदि

वायुस्रोतसः प्रसरणसमये तत्तत्स्थानानां निष्क्रियत्वं तदा श्वसनमन्तरा कोऽपि ध्वनिर्नोत्पद्यते। विविधदिशा तत्तत्स्थानीयमांसपेशीक्रियाद्वारैव शब्दा उत्पद्यन्ते। एवमत्र प्रथमप्रयत्नस्तु घोषतन्त्र्योरुत्कम्पनम्। तयोरुत्कम्पनं तु वक्ष्यमाणरीत्या भवति। प्रसृतवायुवेगेन तयोः पिधानेयन्त्रात् परस्परवियोगो भवति। ततश्च यदा वायुवेग उद्गच्छति तदा ते पुनः पृष्ठतः स्वस्थानमायातः। एवं तयोर्विभिन्नकम्पनगतयोऽतिशीघ्रं भवन्ति। तद्गतिभिश्च तन्मध्यस्थवायुस्रोतसः कम्पनं भवति। एवं घोषतन्त्रीसाहाय्येन वायुवेगातिकम्पनाद् घोषवर्णा उत्पद्यते। केचिच्च वर्णा वायुवेगस्य कम्पनमनपेक्ष्याघोषतन्त्रीमात्रकम्पनेनैव घोषत्वेनात्रैव प्रादुर्भवन्ति। घोषात्मकवर्णोच्चारणसमये घोषतन्त्र्योर्मध्ये वायुस्रोतस ऊर्मिसदृशी गतिर्भवति। केवलं श्वासप्रयत्नवतामघोषाणां वोच्चारणे वायुस्रोतसः सरला गतिर्भवतीति विशेषः। इत्थंरीत्या वायुवेगोत्कम्पनस्य संख्याधिक्यादुदात्तस्वरो (Pitch or height) भवति। यदा कदाचिदस्पष्टमुच्चारणं भवति तदा तत्कारणं तु घोषतन्त्रीकम्पनस्य शीघ्रत्वे वायुस्रोतसो मन्दता तथा ध्वनेरस्पष्टता (Shriller) स्त्रीपुरुषयोर्घोषतन्त्र्योर्ह्रस्वदीर्घत्वे एव तयोर्ध्वनिभेदं प्रतिपादयतः।

(ख) वायुवेगस्य कम्पनानि स्वगतितारतम्येनोर्मिगतित्वेन (Amplitude) परिणमन्ते। अर्थात् कम्प ऊर्मिसदृशस्तथात्वे च तद्गतेरुच्चता सरलता चानुभूयते।

ऊर्मिगतयश्चेत्थम्—

(क) (ख)

कम्पनानां चात्र गतितारतम्यमङ्कितरेखाभिरवगम्यते। तत्तारतम्यफलञ्च दीर्घध्वनिर्दीर्घकालस्थितिर्वा। तत्तद्देशकालव्यक्तिभेदे ध्वनिः कम्पो वा भिद्यते। तद्भेदज्ञानं च भाषाणामितिहासज्ञाने सौकर्यं सम्पादयति।

भाषाणामितिहासावगमने चैष ध्वनिः कम्पाधिक्यं वा बहुप्रयोजनं भवति।

(ग) घोषतन्त्रीकम्पजन्यानि वायुमार्गकम्पनानि विभिन्नाकारान् भजन्ते, स्वाकारैरपि भिद्यन्ते च। एक एव दीर्घध्वनिर्विविधान् गुणान् विविनक्ति। तादृशविविधगुणोत्पत्तिश्च स्वरमार्गस्य कम्पितवायुवेगाधारस्य विविधाकारजन्या। वायुवेगाधारभूतस्य मुखमार्गस्य वायुनिर्गमनसमये विभिन्नाकारता च विभिन्नस्वरोच्चारणं निश्चिनोति।

क- स्व-

एतदुभयाकाराकारितमुखमार्गेणाकारादिस्वराणां विभिन्नाकारा निश्चीयन्ते। गलमुखस्य मुखमार्गस्य नासायाश्च विभिन्नाकारकरणं विविधस्वरोत्पत्तौ तथा अ. ए. इ. ओ. उ वर्णानामुच्चारणभेदे हेतुरित्यवगन्तव्यम्। उच्चारणकर्तृणां तत्तत्स्थानानां सर्वेषां प्रायशः समत्वेऽपि तन्मार्गस्थवायुवेगस्य विभिन्नाकारत्वं विभिन्नगुणा वा तत्तत्स्वरभेदान् प्रतिपादयन्ति।

यद्यपि सूचितदिशा वायुमार्गस्यानिर्दिष्टाकारत्वादिना वर्णानामप्यनिर्दिष्टसंख्यत्वापत्तिः शङ्क्यते, तथापि मनुष्यस्वभावसिद्धमिदं यदनन्ताकारस्वराणां श्रवणेन्द्रियाग्राह्यत्वमिति निर्दिष्टसंख्यकवर्णा एव व्यवहारोपयोगित्वेन निर्दिष्टाकारत्वेन गृहीताः। तत्र भाषातत्त्वविदा स्वीट्महाशयेनैवं निर्धारितम्—षट्त्रिंशन्मौलिकध्वनय एव जिह्वायास्तिसृभिरूर्ध्वगतिभिस्त्रिभिः संकोचनैस्तथा द्वाभ्यां चक्राकाराभ्यां सर्वदोत्पद्यन्ते। अस्य व्याख्याप्रकारस्त्वेवम्—यदि प्रोत्कम्पितवायुर्मुखमार्गे प्रविशति, जिह्वा च स्वस्थाने शान्तमास्ते, तथा चोष्ठौ स्वमांसपेशीप्रयत्नमन्तरा साधारणतो व्यायतौ, कोमलतालु च गलमुखस्य कण्ठाग्रस्य वा पश्चाद्भागमुन्नीतम्, यदि वा वक्ष्यमाणद्वितीयचित्रस्थमार्गे ध्वनिः प्रसरति, तदा तत्फलस्वरूपोऽर्ध एकारः (Inderminate vowel ə) उत्पद्यते। वैदिकसमयेऽपि तादृशोऽर्ध एकार आसीत्। यथा—"सुजाते

अश्वसूनृते" इति। यदि तद्वैपरीत्येन कण्ठनालस्योर्ध्वनयनमोष्ठयोर्मुखकोणानाञ्च संकोचनम्, तथा जिह्वायास्तृतीयचित्र इव तालुपर्यन्तमुन्नमनम्, तत्फलस्वरूपो मुखमार्गः सातिशयन्यूनः क्रियते, तदा हकारस्योत्पत्तिरास्ये।



चित्रम् - ३ यम्



चित्रम् - २ यम्

एवमेव यदि कण्ठनालो नीचैर्नीयते, ओष्ठयोश्चाग्रतश्चक्रीकरणम्, यतश्च स्वरमार्गोऽतिमहान् भवेत्, जिह्वायाश्च कोमलतालुपर्यन्तमुन्नयनम्, तत्फलमुकारोच्चारणम्। यदि चौष्ठावग्रतोभूय चक्राकारितौ कण्ठनालश्चोन्नीतो न त्वधःपतितस्तदा 'यु' इति वर्णस्योत्पत्तिः। पाश्चात्त्यविदुषां स्वीट्महाशयानां मौलिकषट्त्रिंशद्वर्णोत्पत्तिविषये औपरिष्टाश्चत्वारः कारणभेदाः प्रदर्श्यन्ते—

(क) जिह्वाया उन्नयनप्रयुक्तावस्थाभेदेन उच्चनीचमध्यस्थितिरेव इकारादिवर्णोत्पत्तिकारणम्।

(ख) यदि जिह्वामूलं कोमलतालु स्पृशति तदा अ ओ उ वर्णाः।

(ग) जिह्वायाः संकोचनप्रसारणाभ्यां वर्णोत्पत्तिः। यथा आ तथा अ।

(घ) ओष्ठयोश्चक्राकारेण तदभावेन वा। यथा—उकारोच्चारणे

ओष्ठयोः सातिशयचक्रीकरणम्, ओकारे तन्न्यूनता, अकारे ततोऽपि न्यूनता।

एवमेव अकारोच्चारणे संस्कारकप्रयत्नानावश्यकत्वाद् अयमेव मौलिको नैसर्गिकश्च वर्णः। तथा इकारोच्चारणे तु मुखमार्गस्यातिसंकोचो दीर्घप्रयत्नश्च। एवमुकारोच्चारणे ओष्ठयोश्चक्रीकरणं मुखमार्गस्य च प्रलम्बितत्वम्। इत्येवं त्रयः स्वरा एते मौलिकाः, प्रधानाः, नैसर्गिकाश्च।

यदि 

एतादृशरेखया चिह्निता एते वर्णाः स्युस्तर्ह्यन्ये सर्वेऽपि स्वरास्तदन्तर्गता भविष्यन्ति।

अनुनासिकस्वराः

स्वरोच्चारणसमये यदि कोमलतालुनो मांसम् (घण्टिका) अधः पतितं सद् मुखमार्गं पिदधाति, तथा वायुस्रोतो नासामार्गस्थगह्वरेषु कम्पते, तदा स्वरा नासिक्यगुणविशिष्टा भवन्ति। नासागह्वरेषु वायुवेगस्य कम्पनमेव, न तु नासामार्गेणोच्चारणं स्वराणां सानुनासिकत्वे हेतुः। नासामार्गयोर्वायुवेगस्य शनैः शनैर्निःसारणे तु सातिशयं नासिकाधर्मः प्रतिभाति। सर्वभाषास्वनुनासिकत्वप्रकाशनार्थं स्वरेष्वनुनासिकचिह्नमपि दीयते। परन्त्वेषा न्यूनता तादृशनिरपेक्ष्यवर्णाभावं प्रकटयति। भाषाशास्त्रदृष्ट्या त्वसावभिन्न एक एव सानुनासिको वर्णः।

सन्ध्यक्षराणि

यदि वाग्यन्त्राणि प्रथमत एकवर्णोच्चारणावश्यकत्वेन स्वाकारं धृत्वा पुनरन्यस्वरोच्चारणार्थं विभिन्नाकारमनुसरन्ति, एवं यदि तादृशवर्णद्वयोच्चारणान्तःपातित्वेनान्योऽपि ध्वनिस्तत्सहकारित्वेनोत्पद्यते, तदा सन्ध्यक्षराण्युत्पद्यन्ते। ऐ, औ इत्याद्यन्यतमं सन्ध्यक्षरं द्वयोरन्यतरन्न, नापि द्वयोर्मेलनेन भवति, परन्त्वेतानि वर्णान्तराण्येव। यथा—

ai (आइ), au (औ), eu (यु) ei (एइ)। लेटिनभाषातोऽन्यासु भाषास्वागता एते वर्णाः।

स्वराः, व्यञ्जनानि, अर्धस्वराः

वर्णान्तरानपेक्षया य उच्चार्य्यते स स्वरः, यत्तु स्वरसाहाय्येनैवोच्चार्यते तद् व्यञ्जनमिति प्राचीनानां विभागोऽसमीचीन एव। व्यञ्जनानां स्वरेभ्यो भेदे इदमेव कारणं भवितुमर्हति यत् तानि प्रधानतो मुखमार्गे नासामार्गे चोत्पद्यन्ते। श्वासो नादो वा भवतु, व्यञ्जनं तु मुखनासिकामार्गयोर्गह्वरेषु घर्षणस्य सम्पूर्णस्थितेर्वा फलस्वरूपमिति सिद्धान्तः। भवानित्यादौ नकारस्य स्वरसाहाय्येन विनाप्युच्चारणमनुभवसिद्धम्। आङ्गलभाषायामपि सकारादयो (S Z V E K) वर्णाः स्वरं विनैवोच्चार्य्यन्ते।

वायुवेगेन घोषतन्त्र्योरुत्कम्पश्चेत् तर्हि नादः, अन्यथा श्वास एवेति तु पूर्वं प्रदर्शितम्। महाप्राणप्रयत्नवतो व्यञ्जनस्योच्चारणे श्वासो नादवायुर्वा सप्रयत्नं कठिनकण्ठनालस्य गह्वरं प्रत्याकृष्यते, यतो नाम तत्र सुस्पष्टवायुसंघर्षो जायेत।

वर्णोच्चारणात्मकध्वनेः प्रायशश्चत्वारो विभागाः। यथा—श्वासः, नादः (घोषो वा), महाप्राणः, अल्पप्राणश्च।

घोषवर्णाः—ग, ज, ड, ब, र, ल, य, न,

अघोषाः, श्वासा वा—क, ट, प, स, ष, थ।

महाप्राणाः—घ, ढ, भ।

अल्पप्राणाः—ख, ठ, फ।

वर्णोच्चारणसमये मुखनासिकामार्गयोर्विकासस्तत्परिमाणश्च

१. क-च-ट-पादीनां श्वासप्रयत्नवतामुच्चारणे मुखनासामार्गयोः सम्पूर्णावरोधः। एते चाल्पक्षणस्थायिनः।

२. मुखमार्गस्य सम्पूर्णावरोधो नासामार्गस्य तु विकासश्चेत् ङ, न, णादयो सानुनासिक्या वर्णाः।

३. जिह्वापार्श्वयोर्वायुस्रोतसो निर्गमनमनायासेन भवति चेत् तर्हि अन्तःस्थलकारस्योत्पत्तिः। तथा च वायुनिर्गमनसमये जिह्वाग्रस्य पतनं तथा कम्पनं चेद् रेफस्य।

४. मुखमार्गस्य संकोचनेन छिद्रं यदि जायते, तदन्तर्गतत्वेन यदि वायुर्गुञ्जनं करोति, तर्हि शकारस्य चवर्गस्य चोत्पत्तिः।

उच्चारणस्थानानि

उच्चारणसमये मुखमार्गे यत्र संकोचो विकासो वा भवति तानि स्थानान्यसंख्यानि, परन्तु तादृशस्थानस्पर्शेनैव तत्तद्वर्णोत्पत्तिनिश्चयः। अतः स्पर्शानां तत्तत्स्थानान्युपरिष्टाद् वक्ष्यन्ते।

(क) जिह्वामूलस्य कोमलतालुनि स्पर्शात् तालव्या उत्पद्यन्ते।

(ख) कठिनतालुनो जिह्वायाश्च मध्यमार्गस्य संकोचनेन कण्ठ्यानामुत्पत्तिः।

(ग) जिह्वाग्रस्य ऊर्ध्वदन्तस्पर्शेन दन्तमूलपर्यन्तमुत्थानेन वा दन्त्या उत्पद्यन्ते।

(घ) ओष्ठयोः कार्यप्राधान्ये ओष्ठ्यानाम्, तथा अधरौष्ठस्योर्ध्वदन्तैः सम्बन्धे दन्त्यौष्ठ्यस्योत्पत्तिः।

उच्चारणसादृश्यम्

वर्गाणां प्रथमतश्चतुर्णां वर्णानां पञ्चमवर्णैः साकं सर्वथा सादृश्यम्। वैसादृश्यं तु नासामार्गस्योन्मोचनमिति विशेषः।

हकारत्रयमपरात् (२१।१४) इति हकारद्वित्ववत् पञ्चमो यमोऽभ्युपगतः सूत्रकृता। अत एव वैदिकाभरणकृता (२१।१४) सूत्रभाष्ये—"तस्मादिह शक्त्या वर्णान्तरागमविधिनिश्चयात् शिक्षाया-

मनुक्तोऽपि पञ्चमो नासिक्योऽस्माकमवश्याभ्युपगन्तव्यः" इत्युक्तम्। नाप्येतन्मते स्वरभक्तिर्वर्णान्तरम्, किन्त्वनुनासिकत्ववद् गुणमात्रमेव तत्र विधेयम्। स्वरस्येव भक्तिर्धर्मो यस्यासौ। स्वरसादृश्यं च मात्रिकत्वेन प्रधानतया चोपपद्यते। रेफस्यैकमात्रत्वेऽपि न वर्णान्तरत्वम्, मात्राभेदेन वर्णभेदस्य स्वरेष्वेवाभ्युपगमात्। अन्येषां मते तु स्वरभक्तिरपि वर्णान्तरम्। टिप्पण्यां[1] मतभेदा द्रष्टव्याः। तथा चोक्तं वैदिकाभरणकृता—

ह्रस्वदीर्घप्लुतावर्णेवर्णोवर्णाः ऋ ॠ ऌ च।
ए ऐ ओ औ इति ज्ञेयाः षोडशेहादितः स्वराः॥
कखौ गघौ ङचच्छजा झञौ टठडढाणतौ।
थदौ धनौ पफबभमाः स्पर्शाः पञ्चविंशतिः॥
यरौ लवौ चतस्रोऽन्तःस्थाश्च ५ क शषस ५ पहाः।
षड्ऊष्माणो विसर्गानुस्वारौ लो नास्यपञ्चकम्॥
इत्येकोनषष्टिवर्णा अस्मत्स्वाध्यायवर्तिनः। इति।

---

१. षोडशादितः स्वराः (१–१), शेषो व्यञ्जनानि (१–६), आद्याः पञ्चविंशतिः स्पर्शाः (१–७), पराश्चतस्रोऽन्तःस्थाः (१–७), परे षड्ऊष्माण ऊष्मविसर्जनीयप्रथमद्वितीया अघोषा (१–१२), न हकारः (१–१३), व्यञ्जनशेषो घोषवान्।

परिशिष्टम्–२

निगमागमविवेकः

परं परां प्रणम्याहं पितरं मातृका गुरून्।
आगमादागमौ बुद्ध्वाऽऽगमान् संदर्शयाम्यहम्॥

कालक्रिया

अथायं निरवधिः कालः कलयन् पदार्थान् नानारूपान् सम्पादयन् विश्वमेतद् विजृम्भयति। यत्र ह्यगाधा अब्धयस्तत्र वालुकामयो मरुप्रदेशो जागर्त्ति। अपरत्र शुष्कः समुद्रः कुक्षिस्थान् शैलांस्तरुगुल्माद्यावृतान् दर्शयति। यत्र प्रदेशे विशिष्टप्रतिभाशालिनस्तपस्विनः, सदाचाराः सत्यात्मकाश्च मानवा आसंस्तत्र बुद्धिहीनान् उदरम्भरीन् असत्यमनस्कान् दुराचारांश्चाविर्भावयति। एतद्वैपरीत्यं चान्यत्र परिपुष्णाति ऊषरमुर्वरयन्, कृष्णांश्चार्जुनयन्नर्जुनांश्च रञ्जयन्, विविधा ओषधीर्नाम मात्रशेषा अवशेषयन्, नूतनाश्च ताः समुत्पादयंस्ताभिर्मनुजान् पुष्णन्, दूषयंश्च प्रकृतीर्ग्रहानपि कवलयन्, नव्यांश्च कतिचन दर्शयंस्तदधीनान् ऋतूनप्यन्यथयन् विश्वमेतद् बिभर्ति, संहरति च कांश्चनान्यान् देशान्।

तद्गत्याऽहमपि कश्चनाणुर्महान् वा यते स्वकीयं रूपं प्रकटयितुम्।

अयि विद्वत्प्रवराः! भवन्तु भवन्तस्ततोऽपि समाहितमनस्कतरा आयच्छन्तु च प्राणान् उद्वहन्तु चात्मानं परमात्मना विश्वं द्रष्टुम्।

अपि च, स्वकीयरहस्यप्रकटनात् पूर्वं युष्मान् याचे प्राञ्जलम् एतत्कृतेर्दोषपरिमार्जनाय गुणग्रहणाय च।

साम्प्रतमियं वैदिकी शुद्धा वाक् शब्दानृतैरर्थानृतैश्चाक्रान्ता समुच्छ्वसित्येव। उच्छ्वसत्यपि यथास्थानप्रयत्नं शुद्धवर्णोच्चारणशैलीराहित्याद्

मध्ये मध्ये श्वासहीनेव दृश्यते। शब्दमात्रविषये त्वेतादृशी गतिः संजाता।

अर्थविषये तु महान् प्रलयः। बहव आधुनिका यद् यद् नवीनं वस्तु आविष्कुर्वन्ति, एतद्देशीया गवेषकदेश्यास्तत्सर्वमपि वेदे भवेदित्यर्थं चेष्टन्ते। भवन्ति च सफलप्रयत्नास्ते क्वचनांशे। नास्त्यस्माकं कश्चन समारम्भस्तत्र। भवन्तु नाम कतिचन मन्त्रा जडवादमधिकृत्य प्रवृत्ताः, किन्तु संस्कृतसाहित्यमूलभूते ज्ञानागारे वेदे बहवो मन्त्रा रहस्यपरिपूर्णा ज्ञानपथं नायान्ति विदुषाम्। यथा 'उद्वयम्', 'उदुत्यम्' इत्यादि मन्त्रद्वयम्। वयम् उत्तमं ज्योतिरुदगन्म, तमः पश्यन्तः सन्तः, ततः स्वः पश्यन्तः सन्तः ('स्वर्' इत्यस्य शब्दस्तेजश्चार्थः), तदनन्तरम् उत्तरं देवं पश्यन्तः, तदनन्तरं देवत्रा सूर्यं पश्यन्तः (दिव्यं सूर्यमिति तदर्थः) एतेन उत्तरम्, मध्यमम्, उत्तमम् इति शुद्धं ज्योतिस्त्रयमित्यायाति। एवमेव द्वितीयस्याप्यत्यन्तं गूढोऽर्थो वर्तत इत्यलं तदुद्घाटनया।

सर्वेऽपि दार्शनिकाः स्वीयप्रतिभाप्रकर्षं केवलं विवादास्पदविषयान् निगूढांश्चार्थान् अवलम्ब्य प्रादीदृशन्। वेदमार्गे ते यदि स्वीयां शैमुषीं प्रावर्तयिष्यंस्तर्हि नाभविष्यन् बहवो रहस्यपूर्णा अर्था अज्ञानगुहापतिताः।

अस्त्वलं परदोषसमीक्षया, केवलं यदहं किञ्चिद् ब्रवीमि तत्र दीयतां मनः कञ्चित् कालं सदयम्।

अद्यावधि बहवः पौरस्त्याः पाश्चात्त्याश्च गवेषका आर्यानार्यपद्धत्योर्भेदं प्रादीदृशन्। परमहं यं पन्थानमवलम्ब्य स्वीयाभिप्रायं प्रकटयामि, स पन्था भवेद् विद्विष्टो बहुभिः 'तातस्य कूपोऽयम्' इति समुद्घोषयद्भिर्लोकैः। 'शुक्रेन मूलमन्विच्छ सौम्य' इति पद्धतिमवलम्ब्य द्वयोरैक्यक्रिया सुदृढा भविष्यति परमार्थतः।

तथाहि भगवान् पतञ्जलिः स्वकीये महाभाष्ये पस्पशाह्निके—"शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति। विकार एनमार्या भाषन्ते

'शव' इति" । एतेनासंस्तत्समये बहवोऽनार्या ये संस्कृतशब्दैरपि व्यवाहरन् । अपि च तत्रैव एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा—गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः ।

एतेन साधुशब्दातिरिक्तास्तदर्थप्रतिपादकाः सर्वे शब्दा अपभ्रंश-पदवाच्या आसन् पतञ्जलिकाले । भवन्तु नाम ते स्थानकरणाद्यपाटव-जन्याः स्वतः कल्पिता वा । एवं च तेषां तदानीं विभागो द्विविधः—साधुशब्दोऽसाधुशब्दश्चेति । असाधुशब्देनापभ्रष्टाः स्वतश्च कल्पिता भाषा गृह्यन्ते । परमधुनाऽस्मिन् जगति बहुविधासु भाषासु सतीषु द्विविधा श्रेणिः प्रतीयते । एका आर्यभाषाश्रेणिः, अपरा अनार्यभाषाश्रेणिः ।

आर्यभाषास्वेकस्मिन्नर्थे शब्दस्वरूपभेदे सत्यपि तयोर्मूलभूता भाषा काचिदासीदिति पाश्चात्त्या ब्रुवन्ति । संस्कृतभाषैव तासां जननीति केचनापरे प्रत्यवतिष्ठन्ते ।

बहुविधास्वनार्यभाषासु जगतीषु जाग्रतीषु तासां परस्परं नहि जन्यजनकभावः, किन्तु सर्वास्ताः स्वतन्त्रा एव सन्ति । कासाञ्चित्तु वर्तते जन्यजनकभावः सोदर्यभावश्चेति वदन्ति बहवो गवेषकाः ।

एवं चैनयोः श्रेण्योर्न कश्चन सम्बन्धः, किन्तु सर्वा अपि स्वतन्त्रास्ताः ।

आधुनिकविज्ञानवादिनस्त्वस्याः पृथिव्याः सृष्टौ बहुषु स्थलेषु सहैव कालभेदेन वा बहवो द्वीपाः समुदभवन् । तत्र तत्र च तेषां तेषां प्राणिनां विविधा सृष्टिरभूत्, व्यवहारार्थं विविधा भाषाश्च कल्पिताः । तासां च नैव कश्चन सम्बन्ध आसीदिति ब्रुवन्ति ।

अत्रेदं तत्त्वम्—अस्य संसृतिचक्रस्य यद्यप्यनादित्वं तथापि चक्रेऽराणां सन्निवेशनेऽवश्यं कश्चनैक एवारः प्रथमं ग्रहीतव्यः, तथा च तमेवारं वयं प्राथम्येन गृह्णीमः । तथैव सृष्टेरादाववश्यमेवैकविधा सृष्टिः परमेश्वरेण रचिता भवेत् । तदानीं नामरूपविभागानन्तरं व्यवहाराय भाषाऽप्युद्भावितैव स्यात्, कालवशादितस्ततो विकीर्णेषु जनेषु पूर्वभाषा-

स्मृतितदभावप्रयुक्तो भेदस्तदानीं सम्भवेदेव। एवं सति केचन तामेव स्मृतां भाषामाश्रित्यावापोद्वापरीत्या भाषास्वरूपं निर्मायुः।

स्थानभेदेनैकमूलभूतभाषाभाषिणामपि जनानां वैषम्यं दुर्निवारं स्यात्। तेषामेव प्राणिनां भाषा समानजननीका स्यात्, ये च विस्मृतपूर्वभाषा आसंस्तेषां कल्पिता भाषा अत्यन्तं विभिन्नस्वरूपाः परस्परमसम्बद्धाश्चासन्।

तासां सर्वासामपि भाषाणां मूलभूता मातृकाः सप्त नव षोडश वा सन्ति।

एतद्विषयको विचारोऽक्षरविज्ञाने मया कृत इत्यलमत्राप्रासङ्गिकेन विचारेण।

एवं स्थितौ सा मूलभूता भाषा प्राकृतं संस्कृतं चेति द्वयी गतिरस्माकं भारतीयानां कृते। प्रकृत्या आगतं प्राकृतमिति जैना बौद्धाश्च मन्यन्ते। प्रकृतिः संस्कृतम्, तस्या आगतं प्राकृतमिति संस्कृताः स्वीकुर्वन्ति। संस्कृतभाषाया एव वैदिकलौकिकभेदेन द्वैविध्यम्।

सर्वासामपि भाषाणां जननी आगमभाषा वर्तते। सा चागमभाषा संस्कृतायाः प्राकृत्याश्च मूलं प्राक्तनी वा वर्तते। यस्यां हि षोडशानां मातृकाणां प्रसर आसीत्।

एवं सति कोऽसावागम इति शङ्का समुदेति। अत्रोच्यते—

इदानीं निगमागमशब्दव्यवहारः संस्कृतसाहित्ये बहुषु स्थलेषु लब्धप्रचारो वर्तते। तत्र को निगमः कश्चागम इत्यत्र वर्तते महत् साङ्कर्यम्। तथाहि मनुस्मृतौ प्रथमाध्याये द्व्यशीतितमे श्लोके—

इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः।
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः॥ इति।

अत्र मेधातिथिः—"आगमाद् वेदाख्याद् धर्मः पादशो युगे युगे पादेनावरोपितः" इत्यादिना वेदं जग्राह। निगमपदेन वेदस्य ग्रहणं तु

निरुक्ते बहुषु स्थलेषु समुट्टङ्कित इत्यपि निगमो भवतीत्यादिना।

"आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इत्याह पस्पशाह्निके पतञ्जलिः (क्वत्योऽयं सन्दर्भ इत्यन्वेषणीयम्)।

"सिमस्याथर्वणेऽन्त उदात्त इति, अयं शाखाभेदो विच्छेदे पुनः पुनर्भवतीत्यागमः, प्राक प्रविभागात्त्वेकत्वमेवेति भावः।"

(वा० का० १ श्लो० ६ टीका)

शिष्टेभ्य आगमात् सिद्धाः साधके धर्मसाधनम्।

(वा० का० १ श्लो० २७)

न चागमाद्दते धर्मस्तर्केण व्यवतिष्ठते।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्॥

(वा० का० १ श्लो० ३०)

चैतन्यमिव यश्चायमविच्छेदेन वर्तते।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते॥

(वा० का० १ श्लो० ४१)

अत्र स्वोपज्ञटीकायां भर्तृहरिः—"तथैवायं श्रुतिस्मृतिलक्षणः सर्वैः शिष्टैः परिगृहीत आगमः" इति। अत्र त्वागमपदेन श्रुतिस्मृत्योरपि ग्रहणं टीकायां कृतम्।

अस्तं यातेषु वेदेषु कर्तृष्वन्येष्वसत्स्वपि।
श्रुतिस्मृतिगतं धर्मं लोको न व्यतिवर्तते॥

(वा० का० १ श्लो० १३४)

न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते।
बीजं सर्वागमापाये त्रय्येवादौ व्यवस्थिता॥

(वा० का० १ श्लो० १३३)

इति वाक्यपदीय-तट्टीका-दर्शनेन आगमपदेन ऋषिप्रणीतानां शास्त्राणामपि ग्रहणं समायाति। तत्रैव टीकायाम्—"अनेन सर्वागमानामनादित्वं व्यवस्थापयति, वेदवाक्यानि त्वपौरुषेयाणि" इत्यादिना निगमागमयोरयं भेदः प्रतिपादितोऽस्ति।

परं यदि ऋषयः 'पृषोदरादीनि यथोपदिष्टम्' इतिसूत्रस्थमहाभाष्यलक्षणलक्षितास्तर्हि तेषां तादृशवचसामिव प्रामाण्यं यादृशं हि वेदवाक्यानाम्। मन्त्रद्रष्टृत्वेनैव तेषाम् ऋषित्वं व्यवस्थापितम्। तथा चागमात् सिद्धा अपि विषयाः श्रुतिमूलका एवेति मन्तव्यम्।

न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वं च दर्शनम्।
प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः॥
प्रज्ञाविवेकं लभते भिन्नैरागमदर्शनैः।
कियद् वा शक्यमुन्नेतुं स्वतर्कमनुधावता॥
तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना।
अनुपासितवृद्धानां विद्या नातिप्रसीदति॥

(वा० का० २ श्लो० ४९०, ४९२-९३)

इत्यादिवाक्यपदीयस्य पूर्णरूपेण समालोचनया दिव्यदृष्ट्या ये निगूढा विषयाः परापरज्ञैर्विदितवेदितव्यैर्महर्षिभिर्दृष्टास्त एवागमपदेन व्यपदिश्यन्ते। तादृशम् ऋषित्वं च युक्तयुज्ज्ञानभेदेन द्वैविध्यमासादयति। तेषामेव ऋषीणां कल्पादिकर्तृत्वं मन्त्रद्रष्टृत्वं च। तत्र मन्त्रद्रष्टृत्वं मनःसमाधानावस्थायाम्, अन्यशास्त्रकर्तृत्वे तु मनःसमाधेरनपेक्षणात् तादृशविशुद्धबुद्धेस्तत्राभावः।

वस्तुतस्तु ये हि विषया विशुद्धायां बुद्धावारोहन्ति त एवागमपदेन निर्दिश्यन्ते। निगमपदेन त्वागता अर्था आलूनविशीर्णन्यायेन यदा सिद्धान्तीक्रियन्ते तदा निगमनाद् निगमपदवाच्या भवन्ति।

भवेदियं शङ्का यद् आगमाः खनिनिःसृतमलिनहीरका इव बाह्यमलाच्छन्नाः, निगमास्तु मालिन्यरहितरत्नानीव चकासति विद्योतमानाः। तथाप्येवंविधा शङ्का नोत्थापनीया, आगमानां विशुद्धबुद्धाववतीर्णत्वाद् मालिन्यलेशस्यापि तत्राभावात्। तेषां निर्गमनं त्वेतावतैव मन्तव्यं यत्तेष्वागमेषु बहवोऽर्था अत्यन्तं निगूढाः, साधारणत्रैवर्णिकानामपि कृते नोपदेश्याः। तेष्वधिकारः केषाञ्चन पुरुषधौरेयाणामेवेति मत्वा सामान्यतस्तदुपदेशं न प्रावर्तयन् पूर्वे विद्वांसः।

"बीजं सर्वागमापाये त्रय्येवादौ व्यवस्थिता" इति वाक्यपदीयदर्शनेन सर्वेऽप्यागमा यदा नष्टा भवेयुस्तदापि बीजरूपेण त्रयी स्थास्यत्येव। आगमेषु प्राञ्जलरूपेण ये विषयाः प्रतिपादिता आसन् तेष्वत्यन्तमपेक्षितान् विषयान् निगूढभावेन संक्षिप्ततया गृहीत्वा निगमाः प्रत्यगृह्णन् इति निगमान् दृष्ट्वा हेतुभिरागमांश्चानुमाय विद्वांसः सर्वाणि कृत्यान्यपेक्षितानि सम्पादयन्ति काले काले।

तथा चागमा एव संक्षिप्ताः प्रतिसंस्कृताश्च निगमपदेनाभिधीयन्ते। परमस्मिन् पक्षे ऋषयो मन्त्रद्रष्टार इति सिद्धान्तो न संघटते। ऋषयो हि यादृशान् मन्त्रान् समाधावपश्यंस्तानेव मन्त्ररूपेणापठन्, नहि खलु त आगमेषु विकीर्णेषु विषयेष्वत्यन्तं रहस्यभूतानर्थान् मन्त्ररूपेण व्यन्यस्यन्।

ऋषयो हि मन्त्रद्रष्टारः। ते चागमज्ञानानन्तरमेव मन्त्रान् ददृशुः। तथा च तेषां विशुद्धे चेतसि प्रथममागमा उद्भवन्ति। तेषु प्रकाश्यान् विषयानेव मन्त्ररूपेण ते प्रकाशयामासुः। रहस्यभूतांस्त्वर्थान् निगूढान् गुरुमुखैकगम्यानकार्षुः।

पाणिनिसूत्रमहाभाष्यादिपर्यालोचनया वेदविषये द्वयी गतिः प्रतीयते। एका च संहिताश्रेणिः, अपरा मन्त्रश्रेणिः। इयं हि संहिताश्रेणिः शाकल्यमाध्यन्दिनादिनाम्नाङ्किता शाखापदेनाप्युच्यते। वेदं वृक्षत्वेन

रूपयित्वा संहिताः शाखापदेन व्यवाहरन् पूर्वे विद्वांसः। "एकशतम् अध्वर्युशाखा" इत्यादिनापि स एवार्थ आप्यायितो भवति।

अत्रेदं रहस्यम्—विहगदृष्ट्या वेदपर्यालोचनया यथा संहितास्तत्तद्दृषिभिः संकलितास्तथैव संहितास्था मन्त्रा अपि विभिन्नैर्ऋषिभिर्दृष्टः। एवमेकमेव सूक्तं बहुभिर्ऋषिभिर्दृष्टम्, तथैव एक एव मन्त्रोऽनेकैर्ऋषिभिर्दृष्टः। यथा ऋग्वेदेऽष्टममण्डले प्रथमसूक्तस्य मेधातिथिमेध्यातिथिनामानौ द्वावृषी। तौ च कण्वसगोत्रौ। आद्यस्य द्वयृचस्य तु घोरस्य पुत्रः स्वकीयभ्रातुः कण्वस्य पुत्रतां प्राप्तत्वात् काण्वः प्रगाथाख्य ऋषिः। प्लयोगनाम्नो राज्ञः पुत्र आसङ्गाभिधानो राजा देवशापात् स्त्रीत्वमनुभूय पश्चात्तपोबलेन मेधातिथेः प्रसादात् पुमान् भूत्वा तस्मै धनं दत्त्वा स्वकीयमन्तरात्मानं दत्तदानं स्तुहि स्तुहीत्यादिभिश्चतसृभिर्ऋग्भिरस्तौत्। अतस्तासामासङ्गाख्यो राजा ऋषिः।

अस्यासङ्गस्य भार्याङ्गिरसः सुता शश्वत्याख्या भर्तुः पुंस्त्वमुपलभ्य प्रीता सती स्वभर्तारम् 'अन्वस्य स्थूरम्' इत्यनया स्तुतवती। अतस्तस्या ऋचः शश्वती ऋषिका। तथा चैकस्मिन्नेव सूक्ते सम्पूर्णस्य सूक्तस्य मेधातिथिमेध्यातिथिनामानौ द्वावृषी, सूक्तान्तर्गतानां चतसृणाम् ऋचां स्तुहि स्तुहीत्यादीनाम् आसङ्गाख्यो राजा ऋषिः, आद्यस्य द्वयृचस्य तु प्रगाथ ऋषिः, अन्वस्येत्यादेः शश्वती ऋषिकेति सिद्धम्।

एवमेव शुक्लयजुर्वेदे वाजसनेयिसंहितायां षोडशेऽध्याये सम्पूर्णस्याध्यायस्य परमेष्ठिदेवप्रजापतय ऋषयः, १५-१६श्योः कण्डिकयोः कुत्सोऽपि ऋषिः। अस्यां स्थितावेकस्यैव मन्त्रस्य बहवो द्रष्टार इत्यायाति।

तथा चैतादृशा मन्त्रास्तदृषयश्च सूचयन्ति यत् पूर्वभागमेषवेते मन्त्रा आसन्, ये हि ऋषिभिर्दृष्टाः। अस्यां स्थितौ आगमसारभूता निगमा इति

सिध्यति। आगमेषु लुप्तेष्वपि विशुद्धान्तःकरणा विद्वांसस्तत्तत्समये प्रादुर्भूय वेदमन्त्रानवलम्ब्य आगमानपि प्रकाशयन्ति। अनया रीत्यागमनिगमयोर्बीजाङ्कुरन्यायेन पूर्वापरीभावो व्यवस्थापनीयः। यथा संकल्पादैश्वरात् पूर्वं बीजानामुत्पत्तिस्तथैवागमानामपि प्रादुर्भावः समर्थनीयः। ततश्चैतदनन्तरं द्वयोः परस्परं पूर्वापरीभावः प्रचलति। ते चागमाः प्रभूतकालतः पूर्वं विनष्टाः सन्ति। नाद्यावधि तादृशा ऋषयोऽभूवन् येषां बुद्धौ ते आगमाः प्रादुर्भवेयुः। ये च साम्प्रतम् आगमा दृश्यन्ते ते नहि भाष्योक्तलक्षणलक्षितैः शिष्टैः प्रणीताः, किन्तु साधारणा विद्वांसः परम्परया गृहीतान् वेदेष्वन्येषु च शास्त्रेषु विप्रकीर्णान् स्वकल्पितान् विषयान् अधिकृत्य तानि तानि तन्त्राणि प्राणैषुः। वाक्यपदीयप्रथमकाण्डस्थत्रयस्त्रिंशदधिकशततमादिश्लोकद्वय-तट्टीकाविरोधश्च बीजाङ्कुरन्यायेनैव परिहरणीयः।

अहमप्यस्मिन् विषये विस्तरभिया संक्षेपतः किञ्चिद् वच्मि—अथर्ववेदे पञ्चदशकाण्डे व्रात्यमहिमवर्णने आगमकालिकस्य लोकोत्तरस्य कस्यचिद् व्रात्यस्य महिमा वर्णितोऽस्ति। अत एव सायणेन—"अत्र काण्डे व्रात्यमहिमा प्रपञ्च्यते। व्रात्यो नाम उपनयनादिसंस्कारहीनः पुरुषः। सोऽर्थाद् यज्ञादिवेदविहिताः क्रियाः कर्तुं नाधिकारी, न स व्यवहारयोग्यश्चेति जनमतं मनसिकृत्य व्रात्योऽधिकारी व्रात्यो महानुभावो व्रात्यो देवप्रियो व्रात्यो ब्राह्मणक्षत्रिययोर्वर्चसोर्मूलम्। किं बहुना, व्रात्यो देवाधिदेव एवेति प्रतिपाद्यते। यत्र व्रात्यो गच्छति विश्वं जगद् विश्वे च देवास्तमनुगच्छन्ति, तस्मिन् स्थिते तिष्ठन्ति, तस्मिंश्चलिते ते चलन्ति। यदा स गच्छति, राजवत् स गच्छतीत्यादि। न पुनरेतत् सर्वव्रात्यपरं प्रतिपादनम्, अपि तु कञ्चिद् विद्वत्तमं महाधिकारं पुण्यशीलं विश्वसंमान्यं कर्मपरैर्ब्राह्मणैर्विद्विष्टं व्रात्यमनुलक्ष्य वचनमिति मन्तव्यम्" इत्युक्तम्।

एतच्छ्रेणिपतित एव कश्चन सिद्धः 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रे महाभाष्ये सूचितः। तथाहि—एवं तर्हि निवासत आचारतश्च शिष्टत्वम्, स चाचार आर्यावर्त एव। कः पुनरार्यावर्तः? प्रागादर्शात् प्रत्यक्कालकवनाद् दक्षिणेन हिमवन्तम् उत्तरेण पारियात्रम्। एतस्मिन्नार्यावर्ते ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद् विद्यायाः पारङ्गतास्ते तत्रभवन्तः शिष्टाः। यदि तर्हि शिष्टाः शब्देषु प्रमाणं किं पुनरष्टाध्याय्या क्रियते? शिष्टपरिज्ञानार्था अष्टाध्यायी। कथं पुनरष्टाध्याय्या शिष्टाः शक्या विज्ञातुम्। अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं ये चास्यां विहिताः शब्दास्तान् प्रयुञ्जानम्। स पश्यति नूनमस्य दैवानुग्रहः स्वभावो वा, योऽयं न चाष्टाध्यायीमधीते ये चास्यां विहिताः शब्दास्तान् प्रयुङ्क्ते, नूनमयमन्यानपि जानाति। एवमेषा शिष्टपरिज्ञानार्थाऽष्टाध्यायी।

तथा च वेदमनपेक्ष्यापि परा-पर्यायागमसंज्ञिकायां विद्यायां ये लब्धप्रसरा विद्वांसस्ते जगत्कर्तुमकर्तुमन्यथा कर्तुं च शक्ता भवन्ति।

एतेनाप्यागमानां पौर्वकालिकी सत्तेति गम्यते। अत एव श्रीमद्भागवते एकादशस्कन्धे अ० १७, श्लो० १०—

आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः।
कृतकृत्याः प्रजा जात्या तस्मात् कृतयुगं विदुः॥
वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक्।
त्रेतामुखे महाराज प्राणान् मे हृदयात् त्रयी॥

इत्याद्युक्तम्। तथा च कृतयुगे वेदा नासन्, किन्तु वेदमूलभूत ओङ्कार एवासीत्। अयमेव ओङ्कार आगमसंज्ञः सर्ववेदमूलभूतश्च। यथाऽल्पदेन प्रत्याहारदृष्ट्या सर्वे वर्णा बुद्ध्यन्ते तथैव 'ओम्' इति प्रत्याहारेण संकेतेन वा आगमा बोद्धव्याः। अत एव मुण्डकोपनिषदि प्रथममुण्डके प्रथमखण्डे ३ ये मन्त्रे—

"शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ—कस्मिन् नु खलु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥३॥ तस्मै होवाच द्वे विद्ये वेदितव्ये इति ह स्म ब्रह्मविदो वदन्ति परा चैवापरा च ॥४॥ तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं ज्यौतिषमिति। अथ परा यया तदक्षरमधिगम्यते ॥५॥

अत्र हि शाङ्करभाष्ये—

"परा च परमात्मविद्या अपरा च धर्माधर्मसाधनतत्फलविषया। अपरा हि विद्याऽविद्या; सा निराकर्तव्या। तद्विषये हि विदिते न किञ्चित् तत्त्वतो विदितं स्यादिति निराकृत्य पूर्वपक्षं पश्चात् सिद्धान्तो वक्तव्यो भवतीति न्यायात्। ननु ऋग्वेदादिवाह्या तर्हि सा कथं परा विद्या स्याद् मोक्षसाधनं च। 'या वेदबाह्याः स्मृतय' इति स्मरन्ति। कुदृष्टित्वान्निष्फलत्वादनादेयः स्यात्।"

ऋग्वेदादित्वे तु पृथक्करणमनर्थकम्। अथ कथं परेति? वेद्य-विषयविज्ञानस्य विवक्षितत्वात्, उपनिषद्वेद्याक्षरविषयं हि विज्ञानमिह परा विद्या इति प्राधान्येन विवक्षितम्, नोपनिषच्छब्दराशिः। वेदशब्देन तु सर्वत्र शब्दराशिर्विवक्षितः। शब्दराश्यधिगमेऽपि यत्नान्तरमन्तरेण गुर्वभिगमनादिलक्षणं वैराग्यं च नाक्षराधिगमः संभवतीति पृथक्-करणं ब्रह्मविद्यायां परा विद्येति कथनं चेति।

रङ्गरामानुजाचार्येण तु साक्षादिति शेषं पूरयित्वा यया साक्षाद-क्षरमधिगम्यते सा परेति व्याचख्ये।

परमत्र का सा परेति न स्पष्टं तेन भणितम्। भवेत्तन्मते परा आगम-रूपेति तर्कयामः। इमामेव परां येऽधिजग्मुस्त एव परापरज्ञेति विशेष-णेन शिशिषिरे।

अत एव "शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन" इति वार्त्तिकोपर्येवं हि श्रूयते—

"यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः, प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः"इति पतञ्जलिनोक्तम्। प्रत्यक्षधर्माण इति योगजप्रत्यक्षेण सर्वं विदितवन्तः परापरज्ञा इति विद्याऽविद्याप्रविभागज्ञा इति तदर्थं कैयट आह।

परन्तु मन्मते 'परा चापरा च परापरे, ते जानन्तीति व्युत्पत्त्या मुण्डकोक्ते परापरे अत्र ग्राह्ये। सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इत्यनेनात्र पुंवद्भावः। न च संज्ञात्वेन सर्वनामत्वाभावः, अपरेत्यस्य संज्ञाशब्दत्वाभावात्। तत्र परत्वप्रवृत्तिनिमित्तमादाय अपराशब्दो विशेषणत्वेन प्रयुक्त इति स्वीकारात्। कैयटस्याप्ययमेव भावः।

एतेन पतञ्जलिसमये ततः पूर्वं वा आसन्नेतादृशा महर्षयो ये हि त्रयीपारगाः कर्मनिष्ठाः परायां विद्यायां नदीष्णाः। इयमेव परा आगमपदेनाभीष्टेति न विस्मर्तव्यम्।

एतादृशा एव शिष्टा भर्तृहरिणा वाक्यपदीये—

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥
अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥

इत्यादिनोक्ताः।

भागवते नवमस्कन्धे १४ शे अध्याये ४८-४९ श्लोकयोः—

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः।
देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥
पुरूरवस एवासीत् त्रयी त्रेतामुखे नृप।
अग्निना प्रजया राजा गन्धर्वं लोकमेयिवान् ॥

अयं भावः—कृतयुगे सत्त्वप्रधानाः प्रायशः सर्वेऽपि ध्याननिष्ठाः। रजःप्रधाने तु त्रेतायुगे वेदादिविभागेन कर्ममार्गः प्रकटो बभूवेत्यर्थः।

एतेन स एवार्थः परिपुष्टो भवति, आगमानां पौर्वकालिकत्वरूपः। एतादृश एव श्रीभागवतसन्दर्भोऽस्मिल्लेखे मया पूर्वं समुद्धृतोऽस्ति, उद्धरिष्यते चोपरिष्टाद् यथावसरम्। अत्रेयं विचारणा—यदि त्रेतायुगत एव त्रयीधर्मः प्रचलितोऽभवत्, तदा प्रतिमन्वन्तरं बहूनां चतुर्युगीणां वर्तमानत्वात्। प्रत्येकत्रेतायुगत एव वेदत्रयी लब्धप्रसरा मन्तव्या। तथा च कृतयुगे सदागमव्यवस्थया प्रायः सर्वे लोका ध्याननिष्ठाश्चासन्। एवं सति प्रतियुगत्रयि वेदानामाविर्भावो मन्तव्य इति चेन्न, आदौ कृतयुगे इत्यत्रादिपदेन कल्पारम्भककृतयुगस्यैव ग्रहणात्, पूर्वमेव तथोपपादितत्वात्। छान्दोग्योपनिषदीयपूर्वोक्तवचनदर्शनेन इयं [1]ब्रह्मविद्या पुरा ब्राह्मणेषु नासीत्; केवलं राजन्या एवास्याः प्रवक्तार आसन्निति प्रतीयते। सा चेयं ब्रह्मविद्या यद्युपनिषद्रूपा भवेत् तर्हि उपनिषदामपि त्रय्यन्तर्गतत्वेन ततो बहिस्तस्याः पराया विद्यमानत्वेन

१. इयमप्युक्तिः क्षत्रियैरेव ग्रथिता, जैनपरम्परायामयमंशः सम्यग् ग्रथितोऽस्ति। तथाहि महावीरो ब्राह्मणीगर्भे आयातः। परन्तु ब्राह्मणजातावुत्पन्नो नहि तीर्थङ्करो भवितुमर्हति। अतः स ब्राह्मणीगर्भादाकृष्य क्षत्रियाकुक्षावारोपितः। ततः क्षत्रियायामुत्पन्नः क्षत्रियः स तीर्थङ्करोऽभवत्। अतो ब्राह्मणानां नीचत्वं क्षत्रियाणां च श्रेष्ठत्वं तैः प्रतिपादितम्। किञ्च, परशुरामः त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरूः रामेण पराजितः, अहल्या च प्रस्तरभूता पुनः स्वरूपं रामेण प्रापिता, तदनन्तरं रामस्य महत्त्वं ख्यापितमभवत्। ब्राह्मणैश्च लोलुपैः क्षत्रियस्य रामस्य अवतारत्वं व्यवस्थापितम्। इन्द्रादीनां च व्यभिचारित्वमाधुनिकेषु बुद्धिविरुद्धेषु ग्रन्थेषु दृश्यते। वैदिका देवाश्च निन्दिताः, वैदिकमार्गोऽपि व्याहतोऽभवत्। पौराणिकग्रन्थाश्च महत्त्वं प्रापिताः। गोवर्धनो नाम बन्धः पर्वततामलभत, कृष्णस्य च गोवर्धनोद्धारणं दृश्यते। एवमेव प्रह्लादस्य चरितं हिरण्यकशिपोर्नरसिंहेन हननमपि वैष्णवमतमहत्त्वं बुद्धिविरुद्धं दर्शितम्।

परस्परं व्याघातात्। ननूपनिषदो यदि त्रय्यन्तर्गतास्तदा 'इयं ब्रह्मविद्या ब्राह्मणेषु नासीत्' इत्युक्तेः का गतिरिति चेत्, श्रूयताम्—

तदुक्तेर्गर्वपराहतत्वेन विद्वेषधियोक्तत्वात्। कथमन्यथा यजुर्वेदस्यैव चत्वारिंशेऽध्याये ईशावास्योपनिषदः सत्ता प्रतीयेत।

एवं बहवो मन्त्रा ब्रह्मज्ञानप्रतिपादकास्त्रय्यां दृश्यन्ते। अस्यां स्थिताविय ब्रह्मविद्या ब्राह्मणेषु नासीदित्युक्तेः का गतिरिति चेत्, स एव प्रष्टव्यः।

यद्वा त्रय्यां कर्मप्राधान्येन रहस्यभूतमन्त्राणामपि कर्मस्वेवोपयुक्तत्वेन ब्रह्मज्ञानस्य गौणत्वेन तथोक्तेर्गतिश्चिन्तनीया।

वेदशब्देन शब्दराशिर्विवक्षित इत्यादिना केषाञ्चित् समाधानं तु न स्वान्तःसुखमावहतीति सोऽपि त्याज्य एव।

अपि च केवलं ब्रह्मैव परया ज्ञायते तर्हि सा विद्या नहि विस्तरमपेक्षेत। कर्मणामनेकरूपत्वात् त्रयी तु विस्तरमासादयेन्नहि तथा परा। तथा च केयं परेति प्रश्नो विचारणीयः।

अस्मिन् वाङ्मये बहुषु स्थलेषु तत्तद्विद्यानामुपदेशस्तत्तदाचार्यैस्तत्तदधिकारिभ्यो दत्तो दृश्यते, परं विद्यायाः स्वरूपं न तत्र दर्शितम्। यथा रामायणे महर्षिर्विश्वामित्रो भगवते रामचन्द्राय बलाप्रभृतीर्विद्या उपदिदेश। एवं महाभारते भगवान् द्वैपायनोऽर्जुनाय विद्यां योगं चोपादिशत्। तत्रापि तत्स्वरूपं न प्रदर्शितम्। बहुषु स्थलेष्वयमेव प्रकारः समुपलभ्यते। अत्र च समाधानद्वयं मे प्रतिभाति।

(१) ये ह्यासन् ग्रन्थकारास्ते तादृशमितिहासं कर्णाकर्णिकया जानन्तो विद्यास्वरूपं नाध्यगच्छन्नित्येकः पक्षः।

(२) ये ह्यासन् समुपलभ्यमानपुस्तकप्रणेतारस्ते कर्णाकर्णिकया तादृशमितिहासं जानन्तो विद्यास्वरूपमधिगच्छन्तोऽपि नादीदृशंस्तत्तत्स्थलेषु रहस्यम् उद्घाटनभिया, केवलं गुरुमुखैकगम्यत्वात्तासां

विद्यानाम् ।[1]

एवमेवागमविद्यापि तदानीं तादृश्येवासीत्, नहि सा विद्या ग्रन्थरूपेणासील्लिखिता ।

अथवा भवन्तु नामागमा अपि निबद्धनिबन्धरूपेण तत्र न काचिद्धानिः, प्रत्युत आगमानां ग्रन्थरूपेण सत्ता यदि न स्वीक्रियेत तर्हि त एवागमीया विषयाः कथं निगमेषु निगमरूपतां भजेयुः । एतदर्थमेवागमानां बृहदाकारता मन्तव्या । यत्रत्या विषया निगमेषु संक्षिप्तरूपं प्राप्ता भवेयुस्ते ह्यागमाच्चिरात् परिभ्रष्टाः । यथा हि महाभाष्यं ग्रन्थमात्रे व्यवस्थितमासीत् । तत्रत्यागमांशो नहि साधारणबुद्धिविषयोऽभवत् । एवमेव तत्तत्समये महर्षयः स्वयमुद्भूय योग्येभ्योऽधिकारिभ्य आगमीयान् अर्थानुपदिदिशुः । यथा हि निरुक्ते (१—ख-२० म-२)—"साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् संप्रादुः" इत्यादिना ऋषयो रहस्योपदेशयोग्येभ्यः शिष्येभ्यो रहस्यमुपदिदिशुरित्यायाति ।

मन्मते त्वेतदायाति यन्निगमात् पूर्वमागमेषु काचिदपूर्वैव भाषासीत्, यस्याः [2]षोडशैव मातृका मूलभूता आसन् । तासामेव मातृकाणां

१. उपदिष्टानां तत्तन्मनुज्ञानां तदुपदेशे नाधिकार आसीदिति न तेऽन्यस्मै तां विद्यामुपदिदिषुः ।

२. उवाच मे वरुणो मेधिराय त्रिःसप्त नामान्यघ्न्या बिभर्त्ति ।
विद्वान् पदस्य गुह्या न वोचद् युगाय विप्र उपराय शिक्षन् ॥ (ऋग्वेदे)
मेधाविने मह्यं वरुण उवाच किं तत्=अघ्न्या वाणी एकविंशतिनामानि बिभर्ति यथा विद्वान् पुरुषः पदस्य गुह्यानि उपराय योग्याय शिष्याय शिक्षन् कथयति तथैव ।
अयमंश आगमीयः । तानि च एकविंशतिः—हयरलव, ञमङणनम, झभञघढधष, जबगडदश, विसर्ग इमाः षोडशमातृकाः । ताश्च अर्धमात्रा स्थिता नित्या याऽनुच्चार्य्या

पूजनमद्यापि वैवाहिकादिमाङ्गलिककृत्येषु प्रथमं दृश्यते । एता एव षोडशमातृकाः कलानिधेः षोडशकलारूपाः सर्वमातृभूता मन्यन्ते । ता एव मातृकाः सर्वासां मातृकाणां प्रसवित्र्यः । एताभिरेव मातृकाभिरागमा निबद्धा आसन् । वैदिकसमये तु वर्णा अपि अधिका उद्भूताः । आगमसमये तु तद्भाषायां मातृकाः षोडशैवासन् । पितृस्थानीयो बिन्दुर्वा मकारो नकारो वासीदेव ।

इदमेव हि मातृकाचक्रमन्यासामपि देशान्तरीयभाषाणामेतद्देशभाषाणां च मूलभूतमासीत् । आभ्य एव षोडशभ्यो मातृकाभ्यः समाकृष्य स्वस्वाभीष्टसिद्ध्यर्थं स्वानुकूला मातृकाः संगृह्य व्यवाहरंस्तत्तद्भाषाभाषिणः ।

कया रीत्या एताभ्य एव मातृकाभ्यो वर्णान्तराणां प्रादुर्भाव इत्यक्षरविज्ञाने मया विस्तरेण प्रपञ्चितमिति तत एवावधार्यम् ।

आधुनिकतन्त्रेष्वागमपदव्यपदेश्येषु स एवागमविषयः कियतांशेन गूढोऽल्पभावेन निबद्धोऽस्ति । ये चाधुनिकाः कबीरादिमार्गास्ते सर्वे पूर्वागमस्यैव कणा दृश्यन्ते । आगमस्थांशमात्रमुपलभ्य कबीरप्रभृतयः सन्त आत्ममत्ताश्चुलुकजल एव लब्धे तत्र लुठन्तः स्वाशयप्रकाशनाय बहून् ग्रन्थान् जग्रन्थुः । इदानीं स्थालीपुलाकन्यायेन कञ्चन विषयं भवतां पुरस्तादुपस्थाप्येमभंशं समापयामि ।

आधुनिकतन्त्रेषु योगमार्गमवलम्ब्याभ्यासार्थमाचार्या बहूनि स्थानानि प्रादर्शयन्—यथा (१) मूलाधारः, (२) स्वाधिष्ठानम्, (३) अनाहतम्,

---

विशेषतः । तेभ्यो हयरलवेभ्य उत्पन्नाः अ इ ऋ ऌ ३ एते स्वराः । एत एव वर्णाः सर्वासु भाषासु मूलभूताः सन्ति ।

पञ्चैव प्रथमान् स्पर्शान् एक आहुर्मनीषिणः ।
तेषां गुणोपसंचयादान्यभाव्यं प्रतीयते ॥

इत्यादिनाऽथर्वप्रातिशाख्यभाष्यप्रतिपादिताः सन्ति । ते च पीठिकायां संक्षेपतो दर्शिताः ।

(४) विशुद्धिः, (५) आज्ञा, (६) सहस्रारम्, (७) बिन्दुः, (८) अर्धचन्द्रः, (९) रोधिनी, (१०) नादः, (११) नादान्तः, (१२) शक्तिः, (१३) व्यापिका, (१४) समना, (१५) उन्मनी, (१६) महाबिन्दुः।

अत्र षोडशचक्राणि वरिवस्यारहस्यादौ प्रतिपादितानि सन्ति। अन्यत्र तु केवलं षट्चक्राणि दर्शितानि।

वस्तुतो यथा काशीतो दिल्लीं शकटेन गच्छन् मनुष्यो बहूनि स्थानानि रात्रावावासार्थं विश्रमार्थं निर्मायाद् आश्रयेद्वा, अश्वेन गच्छँस्त्वल्पानि, धूमशकटेन गच्छँस्त्वल्पतराणि, विमानेन गच्छतस्तु नास्त्यावश्यकता विश्रमस्थानस्य। एवमेव पुरा व्यासप्रभृतयो महर्षयोऽर्जुनादिभ्यो योग्येभ्यः शिष्येभ्यस्तपःप्रभावात् षट्चक्रादिभेदनमन्तरैव समुपदिदिशुर्योगमार्गान्।

अत एव वेदे वैदिकमार्गेण योगाभ्यासिनां कृते 'उद्वयम्' इत्यादिमन्त्रेण उत्तमस्य ज्योतिषः प्राप्त्यर्थं (१) तमः, (२) स्वः, (३) उत्तरो देवः, (४) दिव्यः सूर्य इति चतुर्णां प्राप्तिः क्रमशोऽपेक्षिता, वैदिककाले विशिष्टप्रतिभाजुषां जन्मकर्मतपोयोगादिभिर्विशुद्धचेतसां मनुष्याणां सत्त्वात्। नेदानीं स पन्था गन्तुं शक्यत आधुनिकैः संस्कृतैरप्यसंस्कृतान्तःकरणैर्मनुजैः।

आधुनिकानां सतां सन्तपदवाच्यानां कृते तु चतुर्दशानां पञ्चदशानां षोडशानां वा चक्राणां ज्ञानमपेक्ष्यते, तेषां तादृशमन्दगतीनामन्तःपातात्।

वैष्णवागमदर्शनेनाप्यागमानन्तरं त्रयी समुद्भूतेत्यायाति। तथाहि—

यत्तदाद्यं महच्छास्त्रं सुदर्शनमयं हरेः।
तस्मात् पृथक् पृथक् शास्त्रमाहुर्वाच्यायनादयः॥

"त्रयी सांख्यं तथा योगशास्त्रं पाशुपतं तथा" इत्यादिना आद्यशास्त्रादागमरूपादन्येषां त्रय्यादीनां समुद्भवः।

अहिर्बुध्न्ये त्वाद्यं शास्त्रं सुदर्शनमयं परा विद्येति यावत्। इदमेव शास्त्रं सुदर्शनमयं हरेः शास्त्रम्। अर्थाद् येन शास्त्रेण हरेर्दर्शनं भवति, तदेव शास्त्रं त्रयीतः प्रथमं समुद्भूतमागमपदाभिधेयम्।

अहिबुध्न्यसंहितायाम् (अ० ११)—

"सुदर्शनस्य देवस्य अर्थात्मना ब्रह्मक्षत्रादिभावेन ब्रह्मास्त्रादिभावेन चाविर्भावः, पुनस्तस्यैव सुदर्शनस्य देवस्य शब्दाकारत्वेनाविर्भावः। तच्च शास्त्रं सकलत्रय्याद्यन्वितमासीत्। तदेव शास्त्रं त्रेतादौ मन्दप्रचारमभवत्। ततस्त्रेतादौ हरेर्वाच्यायनः पुत्र उदभवत्, तस्मिन्नेव धीरूपम् ऋग्यजुस्सामसंकुलं विष्णुसंकल्पसमुद्भूतं त्रय्यादिशास्त्रं समुत्पन्नम्। तदेव बृहच्छास्त्रं कपिलादयस्ततक्षुः" इति।

छान्दोग्योपनिषदि ७ माध्याये ७ मप्रपाठके १ मखण्डे—

"अधीहि भगव इति होपससाद सनत्कुमारं नारदः। तꣳ होवाच (=तमुपसन्नं नारदं सनत्कुमार उवाचेत्यर्थः)। (तदेवाह) यद् वेत्थ तेन मोपसीद। ततस्त ऊर्ध्वं वक्ष्यामीति ॥१॥ सहोवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदꣳसामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पविद्यां देवजनविद्याम्। एतद् भगवोऽध्येमि।

अत्र एकायनपदेन नीतिशास्त्रं कश्चन जग्राह, एकायनशाखां रङ्गरामानुजः।

महाभारते शान्तिपर्वणि २१७ तमेऽध्याये—

ब्रह्मभूता विरजसस्ततो यान्ति परां गतिम्।
एवमेकायनं धर्मं प्राहुर्वेदविदो जनाः॥

'एकं ब्रह्म अयनं प्राप्तिस्थानं यस्मिन्' इति तट्टीकायां नीलकण्ठः। इयं ह्येकायनशाखा आगमान्तर्भूतेति प्रतीयते।

पुराकल्पेऽपि त्रयीविदामागमिनां च केषाञ्चित् परस्परमासीद्

वैपरीत्यभावः। तदवान्तभूता एव श्रमणा आसन् ब्राह्मणाश्च त्रयीमार्गावलम्बिनः।

अपि च पुरा श्रमणा एव मस्करिपदवाच्या आसन्। त एव पाराशरिपदवाच्याः कर्मन्दिशब्दबोध्याश्चाभूवन्। पाराशरिकर्मन्दिपदव्युत्पत्तिश्च 'पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः' 'कर्मन्दकृशाश्वादिनिः' इति सूत्राभ्यां दर्शिता। 'भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी' इति परमवैदिकामरसिंहोक्त्या पर्यायशब्दा एत इत्यायाति। पाराशर्यप्रोक्तभिक्षुसूत्राध्ययनकर्तृत्वं पाराशरिशब्दप्रवृत्तिनिमित्तम्। एवमेव कर्मन्दिप्रोक्तभिक्षुसूत्राध्ययनकर्तृत्वं कर्मन्दिशब्दस्य प्रवृत्तिनिमित्तं सिद्ध्यति। मस्करिशब्दोऽपि तत्समानार्थक एव। "मा कृत कर्माणि मा कृत कर्माणि शान्तिर्वः श्रेयसीत्याहातो मस्करी परिव्राजकः" इति महाभाष्योक्त्या कर्मत्यागिन एव भिक्षव आसन्।

ब्रह्मणस्तु "कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ४ समाः" इति वेदोक्त्या कर्मकरणकर्तृता ब्राह्मणानामाचार आसीत्। एतावता द्वयोर्महान् विद्वेषोऽभवदिति प्रतिभाति। 'येषां च विरोधः शाश्वतिकः' इति सूत्रस्थश्रमणब्राह्मणमित्युदाहरणमपि द्वयोः शाश्वतिकं विरोधं सूचयति। श्रमणशब्देनैवं भिक्षूणामेव ग्रहणं प्रागासीत्। यत्तु वैजयन्तीकारेण 'क्षपणश्रमणौ नग्नौ नग्नाटश्च दिगम्बरः' इत्यनेन श्रमणक्षपणयोः पर्यायत्वं प्रतिपादितम्, तत्र 'कुमारः श्रमणादिभिः', 'श्रमणाश्चापि भुञ्जते' इत्यादिबुद्धादिपौर्वकालिकपाणिनिवाल्मीकिप्रयोगेण श्रमणशब्दस्य तपस्विवाचकत्वमवगम्यते।

तथा च निगमात् पूर्वभाविन आगमस्यानुगन्तार एते भिक्षव आसन् ये हि कर्मपरैर्ब्राह्मणैर्विद्विष्टा बभूवुः।

अर्वाचीनाः शङ्कराचार्यप्रभृतयस्तु त्रय्यवयवभूतानामुपनिषदां मतान्यवलम्ब्य पूर्वोत्तरमीमांसाभेदेन द्वयोः सामञ्जस्यं प्रत्यपीपदन्।

वस्तुतस्तु आगममतावलम्बिन एते आसन् न तु त्रयीधर्मावलम्बिन इति समालोचनया सिद्धम्। 'त्रयीधर्ममधर्माढ्यं किम्पाकफलसन्निभम्' इत्युक्त्या,

'एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते'
'यावानर्थ उदपाने सर्वतः संप्लुतोदके।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥'
'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन'
'त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते'

इत्याद्युक्तिभिस्त्रयीरूपनिगममार्गस्य मध्यमाधिकारिमात्रविषयत्वं समायाति।

अपि च श्रीमद्भागवते ५ मस्कन्धे ९ मेऽध्याये ८ मे गद्ये—

"पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायाम्, जडमतिरिति भ्रातुरनुशासनान्न्यवृत्सन्त" तट्टीकायां जीवगोस्वामिना—"न परविद्यायामित्यनेन भगवद्भक्तेस्त्रयीविद्यातीतत्वं परविद्यात्वं च दर्शितम्" इत्यादिना, श्रीमद्वीरराघवाचार्येण च भागवतचन्द्रिकायाम्—'तत्रापि हेतुस्त्रय्यामेव विद्यायां कर्मावबोधात्मककेवलवेदविद्यायामेव पर्यवसितमतयो न ब्रह्मविद्यायाम्' इत्यादिना परविद्याया महार्हत्वं प्रदर्शितम्।

अत एव तत्तत्कालोद्भवा राजानो राजपुत्राश्च त्रयीविद्यया स्वकीयं मनोरथमनवाप्य आगमस्यापि पारगांस्तत्तन्महर्षीन् स्वेप्सितप्राप्तये समुपतस्थुः। तैश्च यथाकालं ते समुपदिष्टाः। एवमुपदिष्टा अपि ते नहि तां विद्यामन्यस्मै समुपदिदिशुः, तद्विषयकाधिकारस्य तादृशपुरुषधौरेयेष्वेव व्यवस्थापितत्वात्।

यावन्तः शान्तमतानुयायिनः सन्तः सन्ति ते सर्वे पराया विद्याया अङ्कुर प्राप्यैवोन्मत्तप्राया बभूवुः।

तथैव राजन्नुरुगार्हमेधविताने विद्योरुविजृम्भितेषु।
न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः॥
तत्तस्य तत्त्वग्रहणाय साक्षाद् वरीयसीरपि वाचः समासन्।
स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात्॥
यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वानुरुद्धम्।
चेतोभिराकूतिभिरातनोति निरङ्कुशं कुशलं चेतरं वा॥

श्रीमद्भागवतीयैतत्सन्दर्भदर्शनेन त्रयीतोऽतिदूरमागमिनः समासत इत्यायाति।

यद्यप्यत्र टीकाकृद्भिः—

वेदेषु ब्रह्मज्ञानस्यापि प्रतिपादनात् तत्त्ववादो न चकास्तीति विरोधः प्रतीयते। तथा चाल्पबुद्धीनां तत्त्वबोधो न चकास्ति, महाबुद्धीनां तु चकास्त्येवेति तत्परिहारः कार्यः। अत एव तत्र 'प्रायेण' इति, 'हि' इति च पदमुपात्तं ग्रन्थकृता।

तथा चोक्तम्—

न वेदेष्वल्पबुद्धीनां ब्रह्मतत्त्वं समीक्ष्यते।
महाबुद्धिस्तु वेदेषु पश्येद् ब्रह्मैव केवलम्॥

इत्यनया रीत्या सामञ्जस्यमुपपादितम्।

एवमेव देवानाम् ऋषीणां च पुरासीद् महान् विवादः। अजेन यष्टव्यमिति देवमतम्, व्रीहिभिर्यष्टव्यमिति ऋषीणां मतम्। द्वयोर्विवादे समुत्पन्ने उपरिचरो नाम वसुर्मध्यस्थ्यं प्रापितः। स च देवपक्षपातकलुषितमानसश्छागैर्यष्टव्यमिति निरणैषीत्। एवं पक्षपातपराभूतचित्तं वसुम् ऋषयः शेपुरित्यादिका कथा शान्तिपर्वणि दृश्यते।

एतेनापि त्रयीविहितपशुयागादिभिस्तर्पिता देवास्त्रयीविदामुपास्या आसन्। व्रीह्यादिभिस्तृप्यमानसाश्चाजानदेवाः कर्मदेवानतिक्रम्य स्थिता आगमप्रधानैर् ऋषिभिरुपास्या आसन्निति प्रतीयते। सृष्टिविषयविचारे

ऽपि प्रथमं व्रीहीणामुत्पत्तिस्तदनन्तरं च छागादीनाम्। तयैव रीत्या तत्तत्करणकायगानां तत्कर्तृणां च सत्तानुमेया।

पुराव्रीहिभिर्यजन्तो जना यदा अत्यन्तप्रेमास्पदभूतैर्भूतैर्यष्टव्यमिति भावभाविता अभूवँस्तदा ते स्वशरीरैरपि यष्टुमारेभिरे किमुत स्वपुत्रैः। परमत्र स भावः क्रमशो ह्रासमापद्यत। तदनन्तरं ब्राह्मणैः क्षत्रादिभिश्च करणभूतैर्यज्ञ आरब्धः। एवं शनैः शनैर्गोभिरश्वैश्छागैर्व्रीहिभिरित्यनया रीत्या साम्प्रतं छागा व्रीहयश्च हविष्ट्वेन गृह्यन्तेऽधिकारिभेदेन।

एवमेव सुराणामसुराणां च व्यवस्था रामायणे स्पष्टं प्रतिपादिताऽस्ति। तत्र हि समुद्रमथनोद्भूतायाः सुराया ग्रहणादादित्याः सुरा संजाता-स्तद्वञ्चिताश्च दैतेया असुरा बभूवुः।

तथैव आर्याणामनार्याणां च गतिर्बोद्धव्या। एतेषामप्यधुना विचारे आचारे च साङ्कर्यं समजनि। परस्परं विवदमानयोरन्यतरस्य जये पराजये च संजाते जितकाशिनामप्याचारे विजितवर्ग्या रीतिः स्थानं लभते।

यथा शाङ्करसम्प्रदायावलम्बिनामाचारेषु वाममार्गिणां रीतिः प्रविष्टाऽभूत्। तथाहि वामाचाराणामुपासनापद्धतौ पञ्चसु स्थानेषूपासीनाः साधकाः पञ्चोपनामानि पुरी-वन-पर्वत-भारती-सागरात्मकानि भेजिरे। तेषु च विजितेषु आश्रमारण्य-गिरि-सरस्वती-तीर्थात्मकानि पञ्चोपनामानि भगवत्पादशङ्कराचार्यवर्ग्याण्यपि सङ्कलितान्यभूवन्। अतो हि दशनामिनः सन्न्यासिनः संजाताः। इदानीं दण्डिनो भिन्नाः, अपरे दशनाम्यन्तर्गताः प्रायः स्वकीयां पौर्वकालिकीं पद्धतिं मद्यमांसादिभक्षणादिकां न त्यजन्ति। सेव्यन्ते चैते महन्तपदलाञ्छना द्रव्यलोलुपैः पण्डितनामधेयैर्जनैः। कतिभ्यश्चिद् वर्षेभ्यः पूर्वं विद्वत्पञ्चके जाग्रति नैवंविधाऽऽसीद्व्यवस्था पण्डितानाम्।

यथैव विदुषां स्थितिरस्ति शोचनीया तथैव आगममार्गोऽपि विनाशं प्रापितः। केवलमाधुनिकेषु तन्त्रेषु यत्र क्वचन पांसुमिश्रितसुवर्णकणसमूह इव दृश्यमानो महता प्रयत्नेनापि दुर्लभः करामलकतां नेतुम्।

यदा हि 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रलक्षणलक्षितशिष्टानां भवेत् समुदयस्तदैवागमा अपि लभेरन् स्वकीयां सत्ताम्। साम्प्रतं जीर्णशीर्णोऽपि वैदिकमार्गो वर्तते श्रेयानाधुनिकागमापेक्षया।

अपरे च नैतत् क्षमन्ते, नहि प्रशंसन्ति आधुनिकीमपि हिंसादिभिरमिश्रितां तान्त्रिकीमेव पद्धतिम्। उच्चारणप्राणभूतशिक्षापद्धतेर्लोपाद् वैदिकमन्त्राणां पुण्यजनकत्वापेक्षया पापजनकत्वस्यैव शिरसि संनिपातात् सान्निपातिकरोग इव दूरतो बहिष्करणीयत्वात्।

'सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः' इति गीतोक्त्या गृह्यतां वा कैश्चित् स इत्यलं रहस्योद्घाटनया।

अत्रायं सारांशः—कल्पादौ कृतयुग एक एव वर्णो ब्राह्मणो हंसपदवाच्यश्चासीत्। शास्त्रं चागमरूपम्। यज्ञश्च तपोयज्ञ-योगयज्ञभेदेन द्विविध आसीत्। तत्प्रक्रिया च प्राञ्जलरूपेण वर्तते निर्दिष्टा गीतादिग्रन्थेषु। स्वाध्यायज्ञानयज्ञयोरप्यनयोरेवान्तर्भावः समर्थनीयः। ते च ब्राह्मणा आसन् शुक्लकर्मिणो नासीदाचारसंमिश्रणमन्यैर्वर्णैस्तदानीं तेषामभावात्।

तदनन्तरमुत्पन्ना वर्णत्रयीं वर्णचतुष्टयीं वा स्वानुकूलां वेदत्रयीं वेदचतुष्टयीं वा भेजुरवरस्मिन् काले। तदात्वे तेषामाचारसाङ्कर्यमपि समजनि, ब्राह्मणाश्च नासंस्तथा तदा यथा पुरा। तथैव भेदे आगमेष्वपि समपद्यत। अद्यत्वे तु सन्ति केचन स्वरूपस्था वेदाः परं नागमास्तथा। इदानीं तेषामागमानां स्वतः प्रामाण्यं खपुष्पायमाणं संजातम्। वेदानुकूल्येनैव श्रद्धा संसज्ज्यते तेष्विदानीं विद्वद्भिः। अतो यथार्थत आगमानां लोप एव जागर्त्ति अस्मिन् युगे। ब्राह्मणा अपि वेदं विहायान्यस्मिन् मार्गे संलग्ना अभूवन्। सन्ति च अधुना दृश्यमानानि तन्त्राणि

प्रायोऽनृषिभिरेव प्रणीतानि विद्यन्ते। इदानीं तादृशान् विशुद्धशुक्रशोणितसम्भूतान् 'यत्र दशपुरुषानूकं शूद्रा न विद्येरन्' इति रीत्या परिज्ञाताँस्तपःश्रुताभ्यां परिष्कृतान् सात्त्विकधृत्या विशुद्धया च बुद्ध्या युक्तान् ब्राह्मणानन्विष्य शब्दब्रह्मण एव साक्षात्कारे (न परब्रह्मणः) नियोज्यैतत्संसारोपकृत्यै प्रयतनीयम्। येन सर्वे भूमण्डलवासिनो मानवा आर्यसंस्कृत्या संस्कृतमनस्का भवन्तु। दस्यूनां लुण्टाकानां च बुद्धिपरिवर्तनं भूयादिति भूयान् मङ्गलम्।

एतमेवागममधिकृत्य वाक्यपदीये (का. ३ पृ. ३७ श्लो. ४६) 'ज्ञानमस्मद्विशिष्टानां तासु सर्वेन्द्रियं विदुः' इत्यादिटीकायां हेलाराजेन—

"तथाहि—अस्मदादिभ्यो विशिष्टाः सर्वदृश आदिगुरवः सन्ति। ते च नित्याः, अन्यथा प्रलये वृत्ते पुनरुत्पन्नेषु ब्रह्मादिषु क उपदेष्टा स्यात्। सर्वशास्त्रेषु प्रलयस्मृतेर्वर्तमानत्वाद् जैमिनीयानां प्रलयानभ्युपगमोऽप्रामाणिक एव। अपि च सर्वज्ञेश्वरदेवतानां च शास्त्रार्थाधिगतानां न कञ्चन बाधकमुत्पश्यामः। किञ्च, ध्येये निर्ज्ञाते ध्यानादिरनुष्ठातुं शक्यत इति निष्प्रयोजनतापि नास्तीश्वरादिप्रतिपादकानां वाक्यानाम्। तथा च शास्त्रम्—'आत्मा ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः' इति। पातञ्जलमपि—"तस्य वाचकः प्रणवः", "तज्जपस्तदर्थभावनम्" इति।

अपि च मीमांसकैः स्मृतिकाराणां मन्वादीनामभ्युपगमो महेन्द्ररुद्रादीनां च प्रत्याख्यानमिति पक्षपातः। नहि मन्वादयो महर्षयो नहि सर्वज्ञा वीतरागा वा। रागादिमत्त्वे अज्ञत्वे वा तेषां कथं तद्वचनं प्रमाणम्। तस्मात् "साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च"(निरुक्ते, अ० १ ख० २० म० २) एवमिदम् ऋषिभ्यो निरुक्तशास्त्रमायातम्, इतराणि चाङ्गानीति

परिशोधित आगमः। तथा च तेभ्य एव ऋषिभ्यः कर्णाकर्णिकयाऽऽयातोऽयमागमः। शास्त्रस्य हि शब्दनित्यत्वेऽपि रचनावत्त्वादीश्वरप्रणीतत्वमेव। एवमपि च शास्त्रस्य नित्यत्वे क्षतिर्नास्ति, ईश्वरबुद्धिरूपत्वात्तस्य। ईश्वरस्य हि नित्यत्वं कालेनानवच्छेदादुक्तमेव। विशिष्टरचनावत एव वेदस्येश्वरबुद्धौ दर्शनात्मनि सदावस्थितत्वमिति स्मृतिवद् यथाकालं मन्वादिपदस्य रचनाकर्तापि नास्ती, इत्युक्तं ब्रह्मकाण्डे—

अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम्।
शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः॥ (श्लोक १४६) इति।

तदेवमागमप्रामाण्याद् भावतत्त्वविदः शिष्टाः सन्त्यतीन्द्रियार्थदर्शिन इति यथायथं गोत्वब्राह्मणत्वादिजातीराश्रयविवेकेनाध्यक्षयन्ति। तच्च तेषां शिष्टानां ज्ञानं सर्वेन्द्रियं प्रतिनियमानपेक्षत्वात्। सर्वज्ञा हि इन्द्रियान्तरेणापीन्द्रियान्तरव्यापारं कुर्वन्ति। तथा चागमः "नेदानीमिन्द्रियैरेव पश्यति, अप्यङ्गुल्यग्रेण सर्वेन्द्रियार्थानुपलभते" इति। अथवा न चाक्षुषमेव तेषां विप्रादिजातिविषयविज्ञानम्, अपि त्विन्द्रियान्तरसम्बन्ध्यपि, शब्दादौ सूक्ष्मजातिविशेषावधारणक्षममित्यर्थः। तदेवमागमप्रामाण्यमाश्रित्य सर्वज्ञसिद्धिरत्र सूचिता पूर्वार्धेन। विस्तरेणागमप्रामाण्यं वाक्यपदीयेऽस्माभिः प्रथमकाण्डे निर्णीतमिति तत एवावधार्यमित्युक्तम्।

अयमागमो द्विविधः—श्रुत्यागमः, स्मृत्यागमश्च। तत्र तमेवागमं मे भगवदनुग्रहीताः समाधिलेशं लभमाना अपश्यँस्तेषामेव मन्त्रा आर्षाः श्रुत्यागमपदव्यपदिष्टा अभवन्। अर्वाग्भाविभिर्भावुकैस्तत्त्वदर्शिभिः स्मृता न प्रत्यक्षं दृष्टास्ते च स्मृत्यागमपदेन व्यापादिश्यन्त।

श्रुत्यागम-स्मृत्यागमपदोपादानं च स्फोटसिद्धिटीकायाम् ऋषिपुत्रपरमेश्वरकृत य गोपालिकायां कृतमिति तत्र द्रष्टव्यम्। अत एव यथ-

गममिति स्फोटसिद्धौ मण्डनमिश्रा निर्दिशन्तः संप्रदायानुसारेण गुरु-परम्परया च वैयाकरणागमानां वेदाविरुद्धत्वं प्रादीदृशन्।

एवं च वैदिकमन्त्रा आगममन्त्रा वा केवलं दृश्यमानशब्दस्वरूपा नहि सन्ति। किन्तु दृश्यमाने शब्दस्वरूपे अङ्गारसदृशे वा भासमाना मन्त्रा अग्निसदृशा मन्तव्याः। अत एव नादकारिकायाम्—"सिद्धिर्मुक्तिश्च परा नादज्ञानक्रिया च सफलेति ॥ २० ॥ मन्त्रादिकारणत्वात्" इत्युक्तम्।

अतो हि यैः केवलं पठ्यमानानुपूर्व्यतिरिक्तमन्त्रस्वरूपं न दृश्यते तैरुच्चारितो मन्त्रो मन्त्रो न मन्तव्यः। नापि तत्पठनपाठनयोर्विधि-निषेधावनुसर्तव्यावित्यलम् ॥